

साहित्यदर्पणः ।



श्रीविश्वनाथ-कविराज-प्रणीतः ।

श्रीरामचरण-तर्कवागीश-भट्टाचार्य-कृतया

विवृत्या समेतः ।

जयपुरराजकीयसंस्कृतकालेजाध्यक्ष-काशीहिन्दुयूनिवर्सिटी-

सभास्तार-सत्संप्रदायाचार्य-महामहो-

पाध्यायपदभाजा

श्रीदुर्गाप्रसादद्विवेदेन

संकलितया छायाख्यविवृतिपूर्त्या परिष्कृतः ।



स च

मुम्बय्यां निर्णयसागराख्ययन्त्रालये तदधिपतिनाङ्कयित्वा

प्राकाश्यं नीतः ।

४ संस्करणम् ।

शके १८४४, सन १९२२.

मूल्यं ४ रूप्यकाः

पुरुषस्त्वमेव किल पञ्चविंशकः
स्फुटचूलिकार्थवचनैर्निगद्यसे ॥'
(हरविजये ६।११८)

'मैत्र्यादिचित्तपरिकर्मविदो विधाय
क्लेशप्रहाणमिह लब्धसबीजयोगाः ।
ख्यातिं च सत्त्वपुरुषान्यतयाऽधिगम्य
वाञ्छन्ति तामपि समाधिभृतो निरोद्धुम् ॥'
(शिशु. ४।५५)

[illegible] यथा—

'कर्ता शुभे जागरत्वमसि फलयोगे अनुमतो
[illegible] कर्म प्रभवस्त्वं फलति पुरुषाराधनकृते ।
अतस्त्वां संप्रेक्ष्य क्रतुषु फलदानप्रतिभुवं
श्रुतौ श्रद्धां बद्ध्वा कृतपरिकरः कर्मसु जनः ॥'
[illegible] ।

'[illegible] वेदा [illegible] पञ्च [illegible] ।
[illegible] ॥'

'कालः स्वभावो नियतिर्यदृच्छा
भूतानि योनिः पुरुष इति चिन्त्या ।
संयोग एषां न त्वात्मभावा-
दात्माप्यनीशः सुखदुःखहेतोः ॥' (१।२)

इति कालस्वभावादिवादवादिन्या श्वेताश्वतराणां मन्त्रोपनिषदा व्यक्ततरमव-सीयते । एवं वाजसनेयिना ब्राह्मणोपनिषदा—'इतिहासः पुराणं विद्या उप-निषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानि' इति । एवमेव छान्दो-ग्योपनिषदापि—'इतिहासपुराणं पञ्चमो वेदानां वेदः पित्र्यो राशिर्दैवो निधिर्वा-कोवाक्यमेकायनं देवविद्या ब्रह्मविद्या भूतविद्या क्षत्रविद्या नक्षत्रविद्या सर्पदे-वजनविद्या' इति । साहित्यप्रतिपाद्यं दृश्यकाव्यमधिकृत्य भगवता भरतेन तु स्पष्टमाम्नातम्—

'जग्राह पाठ्यमृग्वेदात्सामभ्यो गीतमेव च ।
यजुर्वेदादभिनयान्रसानाथर्वणादपि ॥'
(नाट्यशा० १।१७)

आग्नेये तु श्रव्यदृश्ये उभे अपि काव्ये सम्यग् व्युत्पादिते इत्युपरिष्टान्निवेदयि-ष्यते । एतेनान्यशास्त्रवत् साहित्यस्यापि वेदोपजीवकत्वम्, तत एव साहित्यमूलस्य वेदाङ्गोपाङ्गसमानकालिकत्वं च प्रतिपत्तव्यम् ॥

तत्रभवतो राजशेखरस्य काव्यमीमांसायां कविरहस्ये तु निरूपितार्थो महत्तार्थवादेन प्रस्तूयते—"यथोपदिदेश श्रीकण्ठः परमेष्ठिवैकुण्ठादिभ्यश्चतुःषष्टये शिष्येभ्यः । सोऽपि भगवान् स्वयंभूरिच्छाजन्मभ्यः स्वान्तेवासिभ्यः । तेषु सारस्वतेयः वृन्दीयसामपि वन्द्यः काव्यपुरुष आसीत् । तं च सर्वसमयविदं दिव्येन चक्षुषा भविष्यदर्थदर्शिनं भूर्भुवःस्वस्त्रितयवर्तिनीषु प्रजासु हितकाम्यया प्रजापतिः काव्यविद्याप्रवर्तनार्थं प्रायुङ्क्त । सोऽष्टादशाधिकरणीं दिव्येभ्यः काव्यविद्या-स्नातकेभ्यः सप्रपञ्चं प्रोवाच । तत्र कविरहस्यं सहस्राक्षः समाम्नासीत्, औक्ति-कमुक्तिगर्भः, रीतिनिर्णयं सुवर्णनाभः, आनुप्रासिकं प्रचेतायनः, यमकानि—चित्रं चित्राङ्गदः, शब्दश्लेषं शेषः, वास्तवं पुलस्त्यः, औपम्यमौपकायनः, अतिशयं पाराशरः, अर्थश्लेषमुतथ्यः, उभयालङ्कारिकं कुबेरः, वैनोदिकं कामदेवः, रूपक-निरूपणीयं भरतः, रसाधिकारिकं नन्दिकेश्वरः, दोषाधिकरणं धिषणः, गुणौपा-दानिकमुपमन्युः, औपनिषदिकं कुचमार इति । ततस्ते पृथक् पृथक् स्वशास्त्राणि विरचयांचक्रुः ।

इत्थंवं गुरुभ्यो गिरः पुण्याः पुराणीः शुश्रुम स्म, यत्किल धिषणं शिष्याः कथाप्रसङ्गे पप्रच्छुः, कीदृशः पुनरसौ सारस्वतेयः काव्यपुरुषो वो गुरुरिति । स तान् बृह-

. काल इति कालवादिनः, स्वभाव इति लौकायतिकाः, नियतिरिति मीमांसकाः, [illegible] निरीश्वराः, भूतानीति [illegible], योनिरिति प्रकृतिवादिनः, पुरुष [illegible] कारणं प्रतिपेदिरे[?] ॥

तापतिरुचे । पुरा पुत्रीयन्ती सरस्वती तुषारगिरौ (तपस्यामास) प्रीतेन मनसा तां विरिञ्चिः प्रोवाच—पुत्रं ते सृजामि । अथैषा काव्यपुरुषं सुषुवे । सोऽभ्युत्थाय सपादोपग्रहं छन्दस्वतीं वाचमुदचीचरत् ।

यदेतद्वाङ्मयं विश्वमर्थमूर्त्या विवर्तते ।
सोऽस्मि काव्यपुमानम्ब पादौ वन्देय तावकौ ॥

तामाम्नायदृष्टचरीमुपलभ्य भाषाविषये छन्दोमुद्रां देवी ससंभ्रमदङ्कपर्यङ्केनादाय तमुदलापयत् । वत्स, सच्छन्दस्काया गिरः प्रणेतः, वाङ्मयमातरमपि मातरं मां विजयसे । प्रशस्यतमं चेदमुदाहरन्ति यदुत 'पुत्रात्पराजयो द्वितीयं पुत्रजन्म' इति । त्वत्त पूर्वे हि विद्वांसो गद्यं ददृशुर्न पद्यम् । त्वदुपक्रममथात छन्दस्वद्वचः प्रवर्त्स्यति । अहो श्लाघनीयोऽसि । शब्दार्थौ ते शरीरम्, संस्कृतं मुखम्, प्राकृतं बाहु, जघनमपभ्रंशः, पैशाचं पादौ, उरो मिश्रम् । समः प्रसन्नो मधुर उदार ओजस्वी चासि । उक्तिचणं च ते वचः, रस आत्मा, रोमाणि छन्दांसि, प्रश्नोत्तरप्रवह्लिकादिकं च वाक्केलि, अनुप्रासोपमादयश्च त्वामलंकुर्वन्ति । भविष्यतोऽर्थस्याभिधात्री श्रुतिरपि भवन्तमभिस्तौति—

चत्वारि शृङ्गा त्रयो अस्य पादा
द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति
महो देवो मर्त्यां आ विवेश ॥ (ऋ सं. ३ अष्ट. ८ अ. १० व.)

'तथापि संवृणु प्रगल्भस्य पुंसः कर्म, बालोचितं चेष्टस्व' इति निगद्य निवेद्य चैनमनोकहाश्रयिणि गण्डशैलतलतल्पे स्नातुमभ्रगङ्गां जगाम । तावच्च कुशान् समिधश्च समाहर्तुं निःसृतो महामुनिरुशनाः परिवृत्ते पूषण्युष्मोपसृष्टं तमदाक्षीत् । कस्यायमनाथो बाल इति चिन्तयन् स्वाश्रमपदमनैषीत् । क्षणादाश्वस्तश्च स सारस्वतेयस्तस्मै छन्दस्वतीं वाचं समचारयत् । अकस्माद्विस्मापयन् स चाभ्युवाच—

या दुग्धापि न दुग्धेव कविदोग्धृभिरन्वहम् ।
हृदि नः संनिधत्तां सा सूक्तिधेनुः सरस्वती ॥ इति ।

तत्पूर्वकमधेतृणा च तमेनमध्यस्वनादिदेश । ततः प्रभृति तमुशनसं सन्तः कविरित्याचक्षते । तदुपचाराच्च कवयः कवय इति लोकयात्रा कविशब्दश्च 'कव वर्णे' इत्यस्य धातोः काव्यकर्मणो रूपम् । काव्यैकरूपत्वाच्च सारस्वतेयोऽपि काव्यपुरुष इति भक्त्या प्रयुज्यते । ततश्च विनिवृत्ता वाग्देवी तत्र पुत्रमपश्यन्ती मन्युदर्यं चक्रन्द । प्रसङ्गतश्च वाल्मीकिर्मुनिस्तथा सप्रश्रयं तमुदन्तमुदाहृत्य भगवत्यै भृगुसूतेराश्रमपदमदर्शयत् । सापि प्रस्नुतपयोधरा पुत्रायाङ्कपालीं ददाना शिरसि च चुम्बन्ती स्वस्तिमता चेतसा प्राचेतसायापि महर्षये निभृतं सच्छन्दांसि वचांसि प्रायच्छत् । अनुप्रेषितश्च स तया निषादनिहतसहचरीकं क्रौञ्चयुवानं करुणकारयानिशं क्रन्दन्तमुदीक्ष्य शोकवान् श्लोकमुज्जगाद—

[illegible] प्रणेतृ । तमात्मदेवं शरणं प्रपद्ये संसारसागरनिमज्जनत्रासत्रस्त
[illegible] । आत्मादिदेवो **योगदर्शने**—'क्लेशकर्मविपाकाशयैरपरामृष्ट'
[illegible] (१ । २४) इत्येवं लक्षणतः सूत्रितः पुनर्व्याचिख्यासायां—
[illegible] कालेनानवच्छेदात्' (१ । २६) इत्यनेन गुणप्राधान्यविभक्त
[illegible] सूत्र्यते । इत्थं च 'हिरण्यगर्भः समवर्तताग्रे—' (ऋ. सं. ८
[illegible]) इति श्रुत्यनुगुणतया 'स वै शरीरी प्रथमः स वै पुरुष उच्यते ।
[illegible] प्रजापतिः समवर्तत ॥' इति स्मृत्या प्रथमशरीरिणो ब्रह्मणो
[illegible] प्रतीयते । तत्र पूर्वं द्वितीयस्य शरीरिणः श्रवणस्मरणा
[illegible] ब्रह्मणो हृदि वेदाः प्रादुर्बभूवुरिति । तत एव 'तेने
[illegible]' इत्यादि स्मर्यते सोऽयमादिकालो ब्रह्मद्वारको वेदाना
[illegible] । तथा नारायणे—'यज्ञेन वाचः पदवीयमायन्तामन्व
[illegible]' (ऋ. सं. ८. २. २३) इति । 'युगान्तेऽन्तर्हितान्वे
[illegible] । लेभिरे तपसा पूर्वमनुज्ञाताः स्वयम्भुवा ॥' इति ।
[illegible] अनुपलम्भात् सृष्ट्यादिरपि तत्प्रणयनकालो न भवितु
[illegible] 'वाचा विरूप नित्यया' (ऋ. सं. ६. ५. २५)
[illegible] । एतदेवाकलय्य भगवता **जैमिनिना** पूर्वमी
[illegible] दर्शनात्' (१ । १ । ६) इत्यादिद्वादशसूत्रैरनित्यत
[illegible] परार्थत्वात्' (१ । १ । १८) इत्यादि
[illegible] । उत्तरमीमांसायामपि भगवता **पाराशर्येण**
[illegible] सूत्रयतापि । 'अत एव च नित्यत्वम्'
[illegible] व्यवस्थापितम् ।

[illegible] निरुक्ते—'उतासि मैत्रावरुणो वसि-
[illegible] । द्रप्सं स्कन्नं ब्रह्मणा दैव्येन विश्वेदेवाः पुष्करे
[illegible]) इति । एतद्व्याख्याने **निरुक्तम्** (५ अ
[illegible] प्रपा [illegible]) इति च,
[illegible] **निरुक्त** ([illegible]) इत्येतस्मादप्यस्मिन्नपि म-
[illegible]

[illegible]

मुपलभ्यन्ते। तथाहि—छान्दोग्ये "यो ह वै वसिष्ठं वेद, वसिष्ठो ह स्वानां भवति. वाग्वाव वसिष्ठः" इति वसिष्ठपदार्थव्युत्पादनम्। एवमन्येषामपि व्युत्पत्तिर्द्रष्टव्या। निरुक्ते "—इन्द्रशत्रुः तत्को वृत्रो मेघ इति नैरुक्ताः, त्वाष्ट्रोऽसुर इत्यैतिहासिका अपां च ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते तत्रोपमार्थेन युद्धवर्णा भवन्ति, अहिवत्तु खलु मन्त्रवर्णा ब्राह्मणवादाश्च—" (२. ५. २) इति वृत्रवधतत्त्वम्। एवं प्रजापतेः सुतानुगमनम्, इन्द्रस्य अहल्योपगमनम्, इत्यादि निगूढतात्पर्यतया नीचमानमुपलभ्यते। श्रूयते हि ऋक्संहितायां '[illegible] उषो न जार—' (१. ५. १३) इति। 'उषो न जार पृथुपाजो—' (५ २ १३) इति च। एतदेव पुनर्ऋक्संहितायां ऐतरेये ब्राह्मणे—'प्रजापतिर्वै स्वां दुहितरमभ्यध्यायद् दिवमित्यन्य आहुरुषसमित्यन्ये तामृश्यो भूत्वा रोहितं भूतामभ्यैत्— इति कथारूपेण निरूपितम्। अत्र कुमारिलभट्टतन्त्रवार्तिककारा —'प्रजापतिस्तावत्प्रजापालनाधिकारादादित्य एवोच्यते। स चारुणोदयवेलायामुषसमुद्यन्नभ्यैत्। सा तदागमनादेवोपजायत इति तद्दुहितृत्वेन व्यपदिश्यते। तस्यां चारुणकिरणाख्यबीजनिक्षेपात्स्त्रीपुरुषयोगवदुपचारः। इत्याह। अत्रैव 'प्रजानाथ [illegible] दुहितर [illegible] ॥' इति [illegible] द्रष्टव्यम्। एवमेव ऋक्संहितायां '[illegible]—' (७. ३ १०) इति। [illegible] तैत्तिरीयारण्यके '—[illegible], [illegible] जार. [illegible]—' (१. १२) इति पाणिनि[illegible] (१। २। २७) तथा शतपथ[illegible] (३. ३. ४. १८)। [illegible] (१ ४८-४९) [illegible] निरुक्तकारा—'[illegible] जार उच्यते [illegible]—' (३. ३ ४)। [illegible] [illegible] ॥

[illegible] पुरुषसूक्ते—[illegible]। [illegible] (ऋ [illegible] १० [illegible]) इति। [illegible] (५. ५. ७) इति। [illegible] (८. १ [illegible]) [illegible]। [illegible] सूक्ते [illegible]

[illegible]

भूमिका ।

ऽतत्सत्त्वापूर्त्तिरपि मन्वन्तरादीनां विवेचनीयात्र । अतो नित्या वेदा इत्येव स्थितम् ॥

यत्वत्र साम्प्रतिका वेदव्याख्यातारो दयानन्दस्वामिन ऋग्वेदादिभाष्यभूमिकायां वेदानां नित्यत्वप्रतिपत्त्यापि तद्रुत्पत्तिगणनामकार्षुरत्र त्रेधा क्रमोऽस्ति । स्वायंभुवादिमन्वन्तरप्रदर्शनं प्रथमो क्रमः । उत्पत्तिकालप्रदर्शने परिगणितो द्वितीयो मन्वन्तराधिकालस्य (१२०९६०००) एतावद्वर्षस्य मनुः सप्तमो दिने तु चतुर्दश क्रमः । यत्तद्गणनात्मकमला महायुगेरेतो मनु सप्तमो भवति ७१×१४=९९४ । तत्पूर्वं कालिकार-मन्व एवं षष्ठं सहस्रं ब्राह्मदिनं भवति वक्तव्यमिति ब्राह्मवत्सरान्तरिति तृतीयो क्रमः । परं नहि ब्राह्मणो नित्यभावे वेदनित्यत्वं सघटते । अत्रेदं गणनोक्तं चिरस्थायित्वेन उत्पत्तिकालोऽपि यदि [illegible] मानुषयुगानि । नपत्यति —

दैवयुगानि ।

१२००००=(३६०×१२००००)=४३२००००

ब्र. दि=१०००×१२००००=(१०००×४३२००००)=४३२००००००० ब्राह्म दि-

अथवा, एकसप्तति चतुर्युगं ४३२०००० इत्येकं मन्वन्तरं भवति ।

दैन =५९८०००००=१५×१७२८००० इति ।

ब्रह्मदिनगतवर्षाणि—

७१×मनु ४३२००००=३०६७२००००

६×३०६७२००००=१८४०३२००००

७×१७२८०००= १२०९६०००

२७×चतु. ४३२०००० = ११६६४००००

सत्य = १७२८०००

त्रेता = १२९६०००

द्वापर = ८६४०००

कलेर्गतानि = ४९७६

सर्वसंख्या = १९६०८५२९७६

* [illegible]

न च वेदविहारोऽयं संश्राव्यः शूद्रजातिषु ।
तस्मात्सृजापरं वेदं पञ्चमं सार्ववर्णिकम् ॥
एवमस्त्विति तानुक्त्वा देवराजं विसृज्य च ।
सस्मार चतुरो वेदान् योगमास्थाय तत्त्ववित् ॥
धर्म्यमर्थ्यं यशस्यं च सोपदेशं ससंग्रहम् ।
भविष्यतश्च लोकस्य सर्वकर्मानुदर्शकम् ॥
सर्वशास्त्रार्थसंपन्नं सर्वशिल्पप्रवर्तकम् ।
नाट्याख्यं पञ्चमं वेदं सेतिहासं करोम्यहम् ॥
संकल्प्य भगवानेवं सर्वान्वेदाननुस्मरन् ।
नाट्यवेदं ततश्चक्रे चतुर्वेदाङ्गसंभवम् ॥'

(१ अ. २—१६ श्लो)

एतेन वैवस्वताख्यस्य सप्तमस्य मनोः कस्मिंश्चित्त्रेतायुगे राज्ञो नहुषस्य राज्य[illegible], [illegible] प्राग् द्वापरयुगे प्रोक्तेभ्यः पुराणेभ्यः पूर्वं त्रेतायुगे नाट्यशास्त्रस्य प्रणयनमिति व्यक्तम् । तत्र प्रथमकोटावन्यो नहुषो द्वितीयको[illegible] [illegible] । नहुषश्च आयुषः पुत्रो ययातेः पितेति [illegible] (आदिपर्व. ९५ अध्या ७ ग.) ॥

[illegible] समाख्यते तावतो बह्वधिकनिबन्धनादिदानींतना इतिहासपुराणेषु [illegible] गमयन्तोऽपि वस्तुतो न विश्राम्यन्ति संध[illegible] । [illegible] । यद् यथोत्पादितं तत् तथैव परीक्षितं स्वरूपप्रतिष्ठितं [illegible] । [illegible] तु [illegible] । नहि मृद्व्यतिरेकेण [illegible] । एवमस्माकमार्यावर्तभुवामितिहास पुराणं [illegible], किंतु पातञ्जलादिप्रख्यातयोगवि[illegible] ([illegible]) तत्रतत्र [illegible] [illegible] । [illegible] भगवता वेदव्यासेन—

'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति ॥

(म. भा. आदिप. १ अ. २६७ श्लो.)

[illegible] निर्धार्यते । न स्यादस्यैवमादरमूरीति[illegible], [illegible] प्रवर्तमानं सिध्येत् । [illegible] । [illegible] प्रमेयानवबोधेन कुतर्कान्धा[illegible] [illegible] यो [illegible] न पश्यति' इत्यनेन परिलिख्यते । [illegible] [illegible] [illegible]

[illegible] [illegible]चिनवसंयम ।

[illegible]

यदि चात्र सांप्रतिकपर्यालोचनदृष्ट्या कालसंकोचचिकीर्षाया मीमांसकानां सहस्रसंवत्सरशब्दस्य सहस्रदिनपरताधिकरणन्यायोऽवतार्येत (जैमिनिद. ६ अ. ७ पा. १३ अधि.). तदापि विसंवादाधिरूढदवस्थ एवाभिलक्ष्यते। यतस्तत्र साधारण्येनाधिकारिचिन्तायां ब्राह्मणानुगृहीतः कालसंकोच आश्रीयते; इह पुनरविशेषेण कालकलनायां गमकाननुगृहीतः कालसंकोचो विकाशो वा कथमाश्रीयेत। या च शतायुःश्रुतिः, सापि युगपरतया मन्वादिभिः स्मर्यते (म. स्मृ. १ अ. ८१–८४ श्लो.), इत्थं सेतिहासपुराणाभ्यामेव किमपराद्धम्। यत्तदुक्तजातं गमकानुपलम्भेऽप्यन्यथा नीयते। एतेन हि भगवन्तं **रामभद्रं** तत्पितरं तत्रभवन्तं **दशरथं** चाभिलक्ष्यीकृत्य प्रवृत्तम्—

> 'दशवर्षसहस्राणि दशवर्षशतानि च।
> रामो राज्यमुपासित्वा ब्रह्मलोकं प्रयास्यति॥'
>
> रा. बा. का. १. स. ९७ श्लो.
>
> 'षष्टिर्वर्षसहस्राणि जातस्य मम कौशिक।'
>
> (रा. बा. का. २० स. १० श्लो.)

इत्यादिवाक्यं नासंगतं मन्तव्यम्। बलादन्यथानयने तु सौरमानेन $\frac{१००००}{३५२}=२८\frac{९}{२२}$ इति $\frac{६००००}{३६०}=१६६\frac{२}{३}$ इति तयोः कालावागच्छतः। अत्र द्वितीयस्याश्रद्धेयत्वेऽपि प्रथमः सर्वथाऽनुपपन्न एव। तथा तत्रैव **रामायणे** 'ऊनषोडशवर्षो मे रामो राजीवलोचनः' इत्येवमादिरल्पकालो दिनत्वेन परिणम्यमानोऽतितरामनुपपन्नो द्रष्टव्यः। नैवमत्रैवानुपपत्त्या पराक्रम्यते। यानि पुनर्ज्यौतिषे **होरा**स्कन्धे नानाप्रकाराणि योगोत्थितानि पुरुषायुषाणि पठितानि तत्रापि विसंवादगलग्रहान्न मुच्यामहे। जैमिनीयन्यायोऽपि स्वातन्त्र्येणावतार्यमाणः कालकलनासु प्रमाणपदवीं नाधिरोहतीत्यपि दर्शितमेव। देशकालविषयविप्रकृष्टानामेकस्वरालापोऽपि दूरदर्शिभिरेकहेल्याऽवहेलयितुमशक्यः। प्रक्षेपोऽपि साक्षात्तान् विशिष्य मूलस्कन्धादि कर्णेहत्य परीक्षणीयम्। तस्माद् वेदेष्विव तदङ्गोपाङ्गेष्वपि यद् यथा स्मर्यते व्यवस्थाप्यते वा तत् तथैव नीयमानं पूर्वापरं भवितुमर्हतीति स्थितम्॥

इदमपि पुरातत्त्वं प्रकृतं पर्यालोच्यम्—

> 'श्रुतौ शतायुः पुरुषः प्रदिष्टो
> बहुत्वयोगी शतशब्दशक्यः।
> रामादिकानामधिकायुरास्मै
> युक्तं प्रतीमः फलितेऽमितायुः॥' इति।

बहु यं चात्र तत्रानुसारेण प्रतिपत्तव्यम्। इदं च जैमिनीयन्यायानन्तरं पुनरिदमपि पर्यालोच्यते—

> 'स वार्षिको वासरिको भवन्न (भवन्न)-
> भोगो भवेद् भास्करलंघनेन।

तत्रापरं (न्तिमं) ब्राह्मणगौरवेण (दर्शनेन)
स स्वीचकारेति विरोधभङ्गः ॥' इति ।

अथवा भवृत्तीयापरभोगस्य प्रथमान्तत्वे । महर्षिणाग्राहि (ऽमानि) विरोधशान्त्यै' इत्येवं चरमपाद पठनीयः ॥

प्रास्तावयं च प्राक् (भूमि. १८ पृ.) साहित्यस्य प्रवन्धा वन्धकाश्च क इति । तत्रावशिष्यते पौराणिकी कोटि । यत्र सूक्ष्मेक्षिकया निरीक्षणायामनेके वैज्ञानिका विषया पुरस्क्रियन्ते । इदानी तु प्रस्तुतमुपक्षिप्यते यत्पुराणेष्वन्यतममाग्नेयमिति । इह विषयान्तरवत् साहित्यविषयोऽपि भामहादिग्रन्थेभ्यस्तत्पूर्वेभ्यो वा संक्रामित , आहोस्विद् वेदार्थोपबृंहकेभ्य आग्नेयादिभ्य एव भामहादिग्रन्था न्यधायिषत । तत्राद्यकोटिर्विशीर्यते वृहत्कथारघुवंशादिपर्यालोचनेन तत्कर्तृकालेऽपि कविकर्मपद्धतेरवश्यंभावाद्, यत्प्रयातान्येतानि गुणाढ्यकालिदासादिसूक्तान्यसाकमवलम्बनानीति । आलंकारिकेषु भामहवर्जं नान्य कश्चन चिरतनत्वेन सप्रति सभावनामारूढ इति वहव । भामहग्रन्थस्तदुपज्ञमित्यपि न सिध्यति । यस्मात्तस्मादेव—

'रूपकादिरलंकारस्तस्यान्यैर्बहुधोदितः ।
न कान्तमपि निर्भूषं विभाति वनिताननम् ॥ १३ ॥
रूपकादिमलंकारं बाह्यमाचक्षते परे ।
सुपां तिङां च व्युत्पत्तिं वाचां वाञ्छन्त्यलंकृतिम् ॥ १४ ॥
तदेतदाहुः सौशब्द्यं नार्थव्युत्पत्तिरीदृशी ।
शब्दाभिधेयालंकारभेदमिष्टं द्वयं तु नः ॥ १५ ॥'
(१ परिच्छे)

इत्यनेन, तथा—

'इति निगदितास्तास्ता वाचामलंकृतयो मया
बहुविधकृतीर्दृष्ट्वान्येषां स्वयं परितर्क्य च ।
प्रथितवचसः सन्तोऽभिज्ञाः प्रमाणमिहापरे
गुरुतरधियामस्याराध्यं मनोऽकृतबुद्धिभिः ॥ १६ ॥
(१५ परिच्छे)

इत्येवमादिना च नवीनेन सूक्तेन प्राचां काव्यानुशासनानां ज्ञापनात् । नाट्यशास्त्रेऽपि—

'उपमा दीपकं चैव रूपकं यमकं तथा ।
काव्यस्यैते ह्यलंकाराश्चत्वारः परिकीर्तिताः ॥'
(१६ अ ४१ श्लो.)

इत्येवमेके [illegible] तथा—

गूढार्थमर्थान्तरमर्थहीनं
भिन्नार्थमेकार्थमभिप्लुतार्थम् ।
[illegible] इत्युक्तम् ।'

भूमिका ।

न्यायादपेतं विषमं विसंधि
शब्दच्युतं वै दश काव्यदोषाः ॥'
(१६ अ. ८४ श्लो.)

श्लेषः प्रसादः समता समाधि-
र्माधुर्यमोजः पदसौकुमार्यम् ।
अर्थस्य च व्यक्तिरुदारता च
कान्तिश्च काव्यार्थगुणा दशैते ॥'
(१६ अ. ५२ श्लो.)

[illegible]व दश दोषा[illegible] गुणा उद्दिष्टा यथोद्देशं लक्षिताश्च । एत एव काव्या-
लंकारसूत्रे—'ओजःप्रसाद[illegible]समतासमाधिमाधुर्यसौकुमार्योदारता[illegible]
[illegible]गुणाः' (३ अधि. १ अध्या. ४ सू.) इति वामनेनोक्ता 'मा-
धुर्यौज प्रसाद[illegible] न पुनर्दश' इति प्रकाशकारादिभि[illegible]
[illegible]पितार्श्चेति । परमेते (दश गुणा) वामनत [illegible] गुणा भर
[illegible] दण्डिवामनयोर्भवतो गुणा [illegible]
[illegible] दण्डिन काव्यादर्शेऽपि सन्ति । [illegible] ख्यातिनारदपुष्करादीनां [illegible]
[illegible] । [illegible] इति [illegible] (५।३।११०–१११)
[illegible]
[illegible] शिलालिकृशा[illegible] भानल
इति पाणिनि[illegible] शिलालिकृशा[illegible]
[illegible]
[illegible]
[illegible] सम्भवे ।

[illegible]

वर्षाणां द्वादशशती षष्टिः पञ्चभिश्च संयुता ।
भूभुजां कालसंख्यायां तद्द्वापञ्चाशतो मता ॥'

इत्ययं द्वापञ्चाशतो राज्ञा काल =१२६६ स च न सुवदति । एतदुक्तं भवति—यदि नाम प्रकृतोपयुक्ता सप्तर्षीणां गतिर्नोपलभ्यते, तर्हि तया युधिष्ठिरकालनिर्णयोऽशक्यः । अत्र सिद्धान्ततत्त्वविवेके कमलाकरभट्टाः ।

'अद्यापि कैरपि नरैर्गतिरार्यवर्यै-
र्दृष्टा न या च कथिता किल संहितासु ।
तत्काव्यमेव हि पुराणवदत्र तज्ज्ञा-
स्तेनैव तत्त्वविषयं गदितुं प्रवृत्ताः ॥"

(भग्रह. ३२)

इत्यादि निर्णयन्ति । तथा सिद्धान्तदर्पणे चन्द्रशेखराचार्या अपि—

'सप्तर्षीणां ध्रुवः प्राग्भिर्नोक्त· संचारसंभवात् ।
तथाप्यनुभवात्तेषां व्यवस्था क्रियतेऽधुना ॥
पूर्वाग्रं शकटाकारमुदक्स्थमुडुसप्तकम् ।
सप्तर्षिमण्डलं प्रोक्तं व्यक्तं विश्वनमस्कृतम् ॥
तत्पूर्वोन्नतरेखाग्रे मरीचिः पश्चिमे ततः ।
वसिष्ठोऽरुन्धतीयुक्तस्तत्पश्चादङ्गिराः स्थितः ॥
तत्पश्चाच्चतुरस्रस्य शम्भुदिश्यत्रिरस्य तु ।
पुलस्त्यो दक्षिणे तस्य पश्चिमे पुलहः स्थितः ॥
क्रतुस्तदुत्तरस्थानस्तत्प्रोक्तौ पुलहक्रतू ।
ध्रुवसूत्रेण यद्भग्नौ तदृक्षस्था महर्षयः ॥
कथ्यन्ते सांप्रतं (४९७०)सिद्धे भूभुजां(२१)शान्तगौ हि तौ ।
कालांशैर्विश्वकैः १३ प्राच्यां पुलस्त्यो वर्तते ततः ॥
ततम्नः सायकै (५) रत्रिरङ्गिरा नवभि(९)स्ततः ॥
ततोऽष्टाभि(८)र्वसिष्ठोऽस्मान्मरीचिर्वर्ततेऽष्टभिः(८) ॥'

[illegible]—

'प्रत्यब्दं प्राग्गतिः प्रोक्ता पुराणैरष्टलिप्तिकाः ।
तेषां नो निश्चिता पूर्वानुभवाद्दर्शनान्मया ॥'

[illegible] । [illegible] ६५३ [illegible] तदानीं [illegible] । [illegible] वर्षानन्तर्यमेव ६५३ वर्षानन्तरमपि [illegible] ([illegible]) इव कलियुगसंवत् ([illegible]) [illegible] । नहि ३१७५-[illegible]=६५३ [illegible], वा [illegible], [illegible] युधिष्ठि[illegible] । तस्मात्—

भारतं द्वापरान्तेऽभूद्वार्तयेति विमोहिताः।
केचिदेतां मृषा तेषां कालसंख्यां प्रचक्रिरे॥'

इत्यन्यथा परिणतां महामात्यचण्पकसूनोः कल्हणस्य कृतिमुपेक्ष्यात्रायमष्ट- नृपावलौ ६५२ एतावन्ति वर्षाणि सङ्कल्प्य ३१७९ एतावदेव सर्वसमत्या कलि- गतं (कलियुगसंवत्) शकारम्भसमये मन्तव्यम्। एवमप्यत्र नीलमुनिरात्मन काश्मीरिकपुराणमतं न जहातीति परीक्षणीयम्। इत्थंच पूर्वदत्तसंहितावाक्ये युधिष्ठिर इत्यस्य लक्षणया कस्मिंश्चित्तत्सन्ताने नृपतौ पृथ्वीं शासतीत्युन्नेयम्। किंवा, यथाश्रुतार्थे 'गोद्विनृगाद्वत्रियुतः' इति पाठश्च स्यादिति सङ्क्षेपः॥

अथात्र किञ्चिदैतिहासिकदृष्ट्यापि विविच्यते—राज्ञः शंतनोर्गङ्गायां गाङ्गेयो भीष्मो जज्ञे (म. भा. आदिप. १०० अ.)। कन्ये पराशरात् सत्यवत्या पारा- शर्यो व्यासः कानीनश्च (म. भा. आदिप. १०५ अ.) शंतनुर्विवाहितायां सत्यवत्यां चित्राङ्गदविचित्रवीर्यौ जनयामास। तत्र विचित्रवीर्योऽम्बिकाऽम्बा- लिके काशिराजसुते उपयेमे। ततश्च—

'ताभ्यां सह समाः सप्त विहरन्पृथिवीपतिः।
विचित्रवीर्यस्तरुणो यक्ष्मणा समगृह्यत॥
सुहृदां यतमानानामाप्तैः सह चिकित्सकैः।
जगामास्तमिवादित्यः.

(म. भा. आदि प. १०२ अ.)। मातुः सत्यवत्या आज्ञया पाराशर्यो विचित्रवी- र्यस्य क्षेत्रेऽम्बिकायां धृतराष्ट्रं तथाम्बालिकायां पाण्डुमुत्पादयामास (म. भा. आदिप. १०६ अ.)। पाण्डोर्युधिष्ठिरादयः (म. भा. आदिप. १२३ अ.) 'तृती- यार्जुनादभिमन्युः, अभिमन्योः परीक्षित्, परीक्षितो जनमेजयः' [illegible]। [illegible] [illegible] जनमेजय, वैशम्पायनो व्यासशिष्यो महाभारतं (जय) जगौ (म. भा. आदि- प. १ अ.)। [illegible] जनमेजयस्य [illegible] ३६ वर्षाणि [illegible], तथा—

'आकर्णपलितः श्यामो वयसाशीतिपञ्चकः (८५)
रणे पर्यचरद् द्रोणो वृद्धः षोडशवर्षवत्।'

(म. भा. द्रोणप. १२५ अ. ७२ श्लो.) इत्यनेन, तथा—

'वयः प्राप्य परीक्षित्तु [illegible] च। ६३।'
[illegible] सर्वांस्तान्[illegible]।
[illegible] [illegible] [illegible]। ६४।
षष्टिं (६०) वर्षाणि धर्मात्मा वसुधां [illegible]।'

(म. भा. [illegible]. ४६ अ.) [illegible] ८५-६०-३६=१८९ [illegible] [illegible] [illegible] [illegible] [illegible]। [illegible]
[illegible] [illegible]—

'अन्तरे चैव संप्राप्ते कलिद्वापरयोरभूत्।
समन्तपञ्चके युद्धं कुरुपाण्डवसेनयोः।'

(म. भा. आदिप. २ अ.) इत्यनेन [illegible] [illegible]

र्थात् ३१००—४८७=२६१३ कलिगतम् । एष च—'यदुदुम्बरवर्णाना मण्डलं महत् । पीतं न गमयेत्स्वर्गं तत्कि क्रतुगतं नयेत् ॥' इत्येवमुक्तवान् शायाम्—'प्रमत्तगीत एष तत्रभवतो यस्त्वप्रमत्तगीतस्तत्प्रमाणम्' इत्येवं भाष्यकारेण प्रत्युच्यते । यद्युक्तो बुद्धनिर्वाणकालः सर्ववादिसंमत. तीर्थंकर-**महावीर**सत्ताकालो व्यक्त एव, यतो वीरनिर्वाणसंवत्—५२७ ऊर्ध्वम् अर्थात् कलिगतम् २५७३। 'चन्द्रगुप्तसभा' इति प्रत्युदाहरणं तु महाभाष्ये काशिकायामपि न दृश्यते, केवलं सिद्धान्तकौमुद्याम् । चन्द्रगुप्तवन्नि तया संभाव्यमानः पुष्यमित्रो वर्तमाने लट्सूत्रभाष्ये—'इह पुष्यमित्रं याजयाम (३।२।१२३) इत्येवं स्मृतोऽपि कुशकाशावलम्बनायितः । नहि देवदत्तेन्द्रदत्तो न्द्रपालितप्रायैरुदाहरणे (८।२।८३) केचन नियता व्यक्तिविशेषा भाष्यकारा मता भवितुमर्हा इति दिक् ।

अथ किंचिद्दर्शनान्तरमुपक्षिप्य भूय. प्रकृतप्रघट्टकफलं दर्शयिष्यते । दर्शनेषु योगितया प्रतियोगितया वा परस्परस्य परस्परं प्रवेशो लक्ष्यते । सोऽयं शब्दो ऽर्थत इति यथोत्तर भूयान् प्रेक्षाविषयः । तद्बीजं तु—'कालः स्वभावो नियति यदृच्छाभूतानि योनि —' पृ. ८) इत्येवं जातीया भगवती श्रुतिरेव । नहि श्रुतिरुपालभ्या, तदनुवर्तिप्रमातृणा प्रवृत्तिर्वा, यदेष प्रमेयस्य प्राकृतिको दौर स्वभावो वा यथार्थं विचार सहते, तथागत्या तैर्थिकैर्नीयत इति । अत्रेदं स्थूल पर्यालोचनम्—

वैशेषिकं न्यायश्चेति द्वये दर्शने समानतन्त्रे तत्र उलूकापरनाम्ना महामुनि **कणादेन** विशेषं पञ्चमं पदार्थभेदमधिकृत्य कृतो ग्रन्थो वैशेषिकम् । विशेषस्य साधर्म्यनेतरेभ्यो व्यावर्तनाय प्रभवतीति वैशेषिकस्तत्प्रमाता । तथाचोक्तमौलूक्य दर्शने **माधवाचार्ये**—'द्वित्वे च पाकजोत्पत्तौ विभागे च विभागजे । यस्य न स्खलिता बुद्धिस्तं वै वैशेषिकं विदु. ॥' इह भूतात्मपुरस्कारेण पदार्थाना साधर्म्य वैधर्म्याभ्या स्वरूपनिरूपणपर्यन्तिकी परमात्मचिन्ता । अत्र दश अध्यायाः प्रत्यध्यायं द्वे आह्निके । सर्वसूत्राणि ३६९। [illegible]

चार—' (१।२।४५—५०) इत्यादिना पञ्चाप्युपदिष्टाः। एतेन पूर्वं त्रय एव हेत्वाभासा आकलिताः, पश्चात् पञ्चत्वमुपनीता इति व्यक्तम्। अत्र 'विरुद्धासिद्धसंदिग्धमलिङ्गं काश्यपोऽब्रवीत्' इति वैशेषिक-पदार्थधर्मसंग्रहकारः प्रशस्तपादाचार्योऽपि उवाच। एवं वृत्तौ जयनारायण-तर्कपञ्चाननोऽपि। तदेतन्महामहोपाध्याय-चन्द्रकान्तभट्टाचार्य स्वभाष्यभूमिकायां स्पष्टमुक्तवान्। किञ्च, न्यायसूत्रापेक्षया वैशेषिकसूत्राणां प्रणयनशैलीसारल्यमपि तत्प्राचीनतामवगमयतीति प्रत्यक्षं परीक्षकाणाम्। एतदपि न्यायकोशभूमिकायां महामहोपाध्यायभट्टभीमाचार्येण विपरीतमुच्यते तन्न हृदयारोहीति द्रष्टव्यम्।

प्रमाणैः प्रमेयपरीक्षणं न्यायः, नीयते प्रमेयसिद्धिरनेनेति वा। एषोऽक्षपादापरनाम्ना महामुनिना गोतमेन न्यरूपि। दृष्टान्तरत्नपुरस्कारेण पदार्थतत्त्वज्ञानादि श्रेयसपर्यन्तिकी परमात्मचिन्ता। अत्र पञ्च अध्यायाः। प्रत्यध्यायमाह्निकद्वयम्। सर्वसूत्राणि ५३१। भगवतो गौतमस्य समये आयुर्वेद इव मन्त्रखण्डोऽपि दृष्टफलद आसीत्, तत एव दृष्टान्तविधया द्वयोरप्युपादानं वेदप्रामाण्यादरे इतम्—'मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात् २।१।६८' इति। स्वारस्याद्विशेषेणागमिया मन्त्रा लभ्यन्ते। आगमश्च—'आगतं शिववक्त्रेभ्यो गतं च गिरिजामुखे। मतं श्रीवासुदेवस्य तस्मादागम उच्यते॥' इति शब्दार्थचिन्तामणौ निरुक्तम्। वक्त्राणि-तत्पुरुष-घोर-सद्योजात-वामदेवे-शानरूपाणि पूर्वदक्षिणपश्चिमोत्तरोर्ध्वरूपाणि पञ्च। तत्पुरुषादिवक्त्रप्रतिपादका मन्त्रास्तु तैत्तिरीये आरण्यके दशमप्रपाठके दृश्यन्ते॥

सांख्यं योगश्चेति समानतन्त्रे। तत्र तत्त्वानां समासो यत्र स [illegible] कपिलेनोक्तम्। तत्र चोक्तम्—'पञ्चमं कपिलं नाम सिद्धेशं कालविप्लुतम्। प्रोवाचासुरये सांख्यं तत्त्वग्रामविनिर्णयम्॥' इति भागवते (१ स्क. ३ अ. १० श्लो.)। [illegible]

[illegible]

नैरुक्ति । भेदाभिन्नभेदेन द्विधा भिन्ना भूरिणो भवति ॥ द्रव्याश्रयवर्ती भवति गुणो नित्यनित्यनिष्प्रभाव । नानाऽऽश्रयोऽऽश्रितरूपादविशेषादत्र त्रेधा ॥ नित्यं क्रियानुमेया व्यभिचारेण भवति भावार्थ । सा च नाम्ना द्वेधा सकर्मिकाऽकर्मिका चेति ॥ भिन्नेष्वभिन्नरूपेष्वपि वस्तुषु जात्येषु भिन्नभावेषु । एकाकारा बुद्धिर्भवति यत सा भवेज्जाति ॥" इत्येवं शब्दविभाग । एव एवालंकारिकाणामभिमतो जातिगुणक्रियाद्रव्याणां चतुर्धा शब्देन निरूपणात् । शब्दोऽर्थो रसश्च मुख्य । शब्दो वाचक, लाक्षणिकव्यञ्जकाभ्यां प्रागुपस्थानात्; अर्थो वाच्य, लक्ष्यव्यङ्ग्यतात्पर्येभ्य प्रागवगमनात्, मुख्यात्मुख्य इति व्यपदिश्यते । रसस्तु सर्ववादिनामादरास्पदं मुख्य एव । रसादिशब्दस्य रसादिप्रत्यायने संकेताभावान्नाभिधाव्यापार प्रभवति । अत एवाभिधेयेन अविनाभूतस्य प्रतीतिराहित्याल्लक्षणापि नाक्रमते । अभिधापूर्वको हि लक्षणाव्यापार इति । अतएव च "साक्षात्संकेतविषयो मुख्य ॥ मुख्यार्थबाधे निमित्ते प्रयोजने च भेदाभेदाभ्यामारोपितो गौण । मुख्यार्थसम्बद्धत्वेन लक्ष्यमाणो लक्ष्य ॥" इति सूच्यते । अथ तात्पर्याख्या वृत्तिरपि संसर्गमात्रे विरतव्यापारा । इत्यगत्या अभिधादिपथातिशायिनी तुरीया व्यञ्जनावृत्ती रसादिबोधने **स्फोटायन**मतानुसारिभिरालंकारिकैरङ्गीकृता । यद्यपि रसो न केनापि निह्नोतुं पार्यते तथापि तस्य बोधनव्यापारे वैमत्याद् विकल्पा । व्यञ्जनावृत्तिप्रतिपाद्यो व्यङ्ग्यो हि वस्त्वलंकाररसादिलक्षणः, स तावत्प्रतीयमान एव (छा० २३८ पृ०) । अन्येनाप्यन्ववाचि—'मुख्यादव्यतिरिक्तः प्रतीयमानो व्यङ्ग्यो ध्वनि. ।' ध्वनति, ध्वन्यते, ध्वननं चेति यथायोगमवधातव्यम् । अस्य व्यतिरेकविधा, यथा खलु ध्वनिकारेण अङ्कुरिता, आलोककारेण पल्लविता; लोचनकारेण पुष्पिता, तथैव प्रकाशकारेण फलिता, नान्येन केनापि कोऽपि विशेषोऽद्यावधि वस्तुतोऽत्र प्राकाशि ॥

अथ प्रतीयमानो व्यङ्ग्यो ध्वनिरित्यपि रसादिवेदनभङ्गिमात्रम्, न प्रत्येकमर्थान्तरम् । यथा खलु व्यवहारभूमौ वाच्यस्तात्पर्यार्थो लक्ष्यो वेति । 'विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः' (छा० ७२ पृ०) इति सर्ववादिसम्मता भारतीया रसनीवी । एतदुक्तं भवति—कारणादीनां विभावनादिव्यापारवत्त्वाद् विभावादिपदाभिधाने दृष्टान्तमर्यादया विभावादिविभागलाभ । संयोगादिति सौत्रपञ्चम्या विभावानुभावव्यभिचारिण. समूहालम्बनतया रसं प्रति हेतुता प्रतिपन्नाः । तत्र शब्दोपहितरूपाणां विभावादीनां व्यापाराद् उत्पाद्योत्पादक–गम्यगमक–पोष्यपोषक–व्यङ्ग्यव्यञ्जकरूपा भावा वादिभिरादृता. । रसबोधने निरूपितदशा अभिधातात्पर्ये निरस्ते अपि पुनर्मीमांसकमतेन **लोल्लटा**दिभिरुत्प्रेक्ष्यमाणोऽभिधाया दीर्घदीर्घतरो व्यापारो रसस्यानुकार्यगतत्वं च निरस्यते (सा. द. ८९ पृ० २५३ पृ०) "भट्टलोल्लटादयस्तु—रसस्य व्यङ्ग्यत्वमेवाङ्गीकुर्वन्ति" इति विवृतिग्रन्थस्तु पेक्ष्यः (८० पृ०) एव संयोगादिति बुद्धो रसस्य विभावादेश्च ७८ । । '५५ सुदूर निरस्तो मन्तव्य. । लक्षणापि निरस्तैव, यत्पुनस्तार्किकमन्यै श्री २। महिमभट्टप्रभृतिभी रसोऽनुमाप्य इत्यास्थीयते, तदपि तस्यानुकर्तृगतत्वेन

स्यात्काव्याङ्गत्वं, न रूपिता ॥ शब्दप्राधान्यमाश्रित्य तत्र शास्त्रं पृथग्विदुः। अर्थतत्त्वेन युक्तं तु वदन्त्याख्यानमेतयो ॥ द्वयोर्गुणत्वे व्यापारप्राधान्ये काव्यधीर्भवेत्। अभिधा भावना चान्या तद्भोगीकृतिरेव च ॥ अभिधाधामता याते शब्दार्थालंकृती ततः। भावनाभाव्य एषोऽपि शृङ्गारादिगणो मतः ॥ तद्भोगीकृतिरूपेण व्याप्यते सिद्धिमान्नरः। रसयमानाथवा मोक्षे यालङ्कलिकयं स्मृतम् ॥" इति। तदित्थमन्यथान्यथा प्रतीयमानो नीत इत्यपि द्रष्टव्यम्। इति शब्दार्थीयम् ॥

अथ श्रव्यदृश्यीयस्य शब्दार्थीयस्य च विभावनाद् व्याकरणानिशायीवार्थवाचकत्वाश्रयणान्मीमांसादिसमयातिक्रान्तस्फोटवादाभ्युपगमान्न्यायादिविरुवादिव्यञ्जनारोहणाच्च साहित्यमलंकारशास्त्रं काव्यानुशासनं न कस्याप्यनुयायि पुच्छनङ्गं वा भवितुमर्हति, किंतु—

'प्रसक्तेर्यः पात्रं, तिलकमति यं सूक्तरचना,
य आद्यः साधूनां श्रुतिचुलुकलेह्येन मधुना।
यदात्मानो विद्याः, परिणमति यश्चार्थवपुषा,
स गुम्फो वाणीनां कविवृषनिषेव्यो विजयते ॥'

इत्येवमादिनिरूपितलिङ्गबलेन प्रधानमङ्गीति सिध्यति। अत एव मयाप्यवोचि—

'शब्दार्थयोरुक्तिविशेषसत्त्वे लक्ष्येषु काव्यव्यवहारयोगात्।
न्यायादिवद् दर्शनकोटिमाप्तं साहित्यमङ्गीति वदन्ति विज्ञाः ॥

साहित्यस्य भामहालंकारादयः कतिपये प्रबन्धाः प्रागुक्ताः, (भू० ४४ पृ०) टीकाप्रबन्धा मम्मटसमयदर्शने निर्दिष्टाः, अन्येऽपि यत्र तत्र प्रसङ्गादुपात्ताः। केचिदिह लक्ष्यभूता निरूप्यन्ते—

तत्र ध्वनिग्रन्थाः।

(१) ध्वनिकारिका। (२) आलोकः। (३) लोचनम्। (४) हृदयदर्पणः। (५) व्यक्तिविवेकः। एते पञ्चापि कश्मीरजन्मानोऽत्यन्तप्रौढाः।

वृत्तिप्रकरणानि।

(१) कश्मीरवास्तव्यस्य भट्टकल्लटसूनोर्मुकुलस्य अभिधावृत्तिमातृका। (२) सुप्रसिद्धराजानक—मम्मटस्य शब्दव्यापारविचारः। (३) दाक्षिणात्यस्य अप्पदीक्षितस्य वृत्तिवार्तिकम्।

अस्यैव शिष्यः प्रतीहारेन्दुराज उद्भटालंकारवृत्तिकर्ता, य आत्मानं कौङ्कणं नि स.

अलंकारग्रन्थाः।

(१) काश्मीरकस्य राजानक—रुय्य(च)कस्य **अलंकारसर्वस्वम्**। (२) काश्मीरकस्य राजानक—जयरथस्य अलंकारविमर्शिनी। (३) काश्मीरकस्य भट्टशोभाकरमिश्रस्य **अलंकाररत्नाकरः**। (४) दाक्षिणात्यस्य अप्पयदीक्षितस्य **चित्रमीमांसा**। (५) दाक्षिणात्यस्य पण्डितराज—जगन्नाथस्य **चित्रमीमांसाखण्डनम्**।

नायिकारसप्रकरणानि।

(१) रुद्रटस्य शृङ्गारतिलकम्। मैथिलस्य भानुदत्तमिश्रस्य (२–३) **रसमञ्जरी-रसतरङ्गिण्यौ**। (४) शिवरामत्रिपाठिनो **रसरत्नहारः**।

कतिपयविचारप्रकरणानि।

(१) काश्मीरकस्य राजानक—रुय्यकस्य **सहृदयलीला**। (२–४) काश्मीरकस्य व्यासदासापरनाम्नः क्षेमेन्द्रस्य **कविकण्ठाभरणसुवृत्ततिलकौचित्यविचारचर्चाः**। (५) राजशेखरस्य **काव्यमीमांसा**। (६) जैनयोररिसिंहामरचन्द्रयोः **काव्यकल्पलतावृत्ती**। (७) देवेश्वरस्य **कविकल्पलता**। (८) पर्वतीयस्य विश्वेश्वरपण्डितेन्द्रस्य **कवीन्द्रकर्णाभरणम्**।

साहित्यग्रन्थाः।

(१) धारापतेर्भोजदेवस्य **सरस्वतीकण्ठाभरणम्**। (२) महामाहेश्वरस्य **एकावलीशास्त्रम्**। (३) दाक्षिणात्यस्य विद्यानाथस्य **प्रतापरुद्रीयम्**। (४) केशव-

---

१. अस्यैव महापण्डितस्य शिष्यो राजानक–मङ्खक–महाकविरित्येतेन कृतस्य **श्रीकण्ठचरितस्य** पञ्चविंशात्सर्गाद् व्यक्तम्. २. अयमेव जयरथ आचार्याभिनवगुप्तकृतस्य **श्रीतन्त्रालोकमहार्णवस्य** कर्णधारो बभूव. ३. अयं महानुभावो वेदान्तकल्पतरु–परिमलादिकर्ता। उक्तं चानेन–'कणभक्षपदक्षकपक्षपरिष्करणक्षणतत्परदक्षगिरम्। अनिकर्कशतर्कशतक्षुभितक्षपितक्षपणक्षणमक्षपदम्॥ कपिलोक्तिनिराकरणप्रवणं कृतपन्नगसूक्तिपरिष्करणम्। नयमौक्तिकभूषितभट्टमत विमलाद्वयचित्सुखमद्वयिनम्॥ महतामपि मान्यतमं विदुषां विनिवेश्य गुरुं (श्रीरङ्गराजदीक्षित) हृदि वैश्वजितम्। नयसंहतिशालिनि कल्पतरौ विवृतश्रमणः प्रथमः प्रथितः॥' इत्यादि. ४. अनेनैव सिद्धान्तकौमुदीव्याख्याया. प्रौढमनोरमाया. खण्डनरूपं **मनोरमाकुचमर्दनं** निरमायि। उक्तं च तदारम्भे—'लक्ष्मीकान्तपदाम्भोजमानम्य श्रेयसां पदम्। पण्डितेन्द्रो जगन्नाथः स्मृति गर्वं गुरुद्रुहां (भट्टोजिदीक्षितानाम्)' इत्यादि. ५. काव्यकल्पलता–कविकल्पलते श्लोकरचनाप्रकारदर्शिके. ६. कवीन्द्रकर्णाभरणं बौद्धस्य धर्मदासस्य विदग्धमुखमण्डनमप्यतिशेते. ७. अस्यैकावलीनाम्नोऽलंकारशास्त्रस्योपरि सुप्रसिद्धाना कोलाचलमल्लिनाथसूरीणां तरलाख्या व्याख्या वर्तते। अत्रोदाहरणनायकः कलिङ्गेश्वरो नृसिंहभूपः। नृसिंहवर्णनश्लोका अत्रत्याश्चित्रमीमांसादावुदाहृताः. ८. कोलाचलमल्लिनाथसूरिसूनुना कुमारस्वामिसोमपीथिना कृता प्रतापरुद्रीयस्य रत्नापणाख्या व्याख्या। अत्रोदाहरणनायकः काकतीयकुलोत्पन्नो रुद्रभूपालः प्रसिद्धः.

मिश्रस्य **अलंकारशेखरः** । (५) जैनस्य आचार्यहेमचन्द्रस्य स्वोपज्ञालंकारचूडामणिवृत्तिसहितं **काव्यानुशासनम्** । (६) जैनस्य वाग्भटस्य **काव्यानुशासनम्** । (७) जैनस्य वाग्भटस्य **वाग्भटालंकारः** । (८) दाक्षिणात्यस्य अच्युतराजस्य स्वोपज्ञसरसामोदसहितः **साहित्यसारः** । (९) दाक्षिणात्यस्य कृष्णकवेर्**मन्दारमरन्दः** ।

रूपकप्रकरणानि ।

धनंजयस्य **दशरूपकं** धनिककृतालोकसवलितम् । भारतीयस्य नाट्यशास्त्रस्य अष्टादश एकोनविंशो विंशश्चतुस्त्रिंशश्चाध्यायाः । अनेके रूपकग्रन्थाः सर्वतन्त्रस्वतन्त्रस्य **राघवभट्टपादस्य** अभिज्ञानशाकुन्तलार्थद्योतनिकातोऽवधेया इति ।

अथ प्रसङ्गात्साहित्यस्य लक्ष्यभूताः प्राच्योदीच्यप्रतीच्यदाक्षिणात्याः कतिचित् कविकर्मणः श्रव्यदृश्यग्रन्था निरूप्यन्ते—

तत्र काव्यग्रन्थाः ।

(१–३) कालिदासस्य **रघुवंश–कुमारसंभव–मेघदूतानि** । (४) छत्र–भारवेः **किरातार्जुनीयम्** । (५) घण्टा–माघस्य **शिशुपालवधम्** । (६) श्रीहर्षस्य **नैषधीयचरितम्** । (काव्यशास्त्रम्) (७) काश्मीरिकस्य तालरत्नाकरस्य **हरविजयम्** । (८) काश्मीरिकस्य बिह्लणस्य **विक्रमाङ्कदेवचरितम्** । (९) काश्मीरिकस्य जगद्धरस्य **स्तुतिकुसुमाञ्जलिः** । (१०) शालिवाहनस्य **गाथासप्तशती** (गाहासत्तसई)। (११) प्रवरसेनस्य **सेतुबन्धम्** (दसमुहवहो)। (१२) वाक्पति·

१. काव्यानुशासनं काव्यप्रकाशानुसारि । वाग्भटीय काव्यानुशासनं तु प्राचीनशैलीकम्. २. एते हालसाहिबै. स्वमुद्रिते दशरूपकपुस्तके सङ्क्षेपिताः. ३. दक्षिणापथे गोदावरीतीरे कुन्तलेषु **प्रतिष्ठानं** नाम नगरमासीत् । यस्मानी हालसातवाहनादिनामा शकप्रवर्तकः **शालिवाहनः** । येन च गाथासप्तशती सङ्कलिता । इय बाणस्य हर्षचरिते कोपतया स्तुता । गोवर्धनाचार्यस्य आर्यासप्तशत्या–'वाणी प्राकृतसमुचितरसा बलेनैव संस्कृतं नीता । निम्नानुरूपनीरा कलिन्दकन्येव गगनतलम् ॥' इत्येव स्मृता । सरस्वतीकण्ठाभरणे तु द्वितीयपरिच्छेदे 'केऽभूवन्नाढ्यराजस्य राज्ये प्राकृतभाषिणः । काले श्रीसाहसाङ्कस्य के न संस्कृतभाषिणः ॥' इत्युक्तम् । तत्र आढ्यराजः शालिवाहनः; साहसाङ्को विक्रमादित्य इति तट्टीकाकृतो रत्नेश्वरमिश्राः । शालिवाहनस्यैव सभायां भूतभाषामयबृहत्कथानिर्मातृ–गुणाढ्य–कालापव्याकरणकर्तृ–शर्ववर्मप्रभृतयो महाविद्वांस आसन् । अतः शकप्रवृत्तेरासन्नकाले गाथासप्तशतीसङ्कलनकालो भवितुमर्हतीति दिक्. ४. राजतरङ्गिणीगणनया एकः **प्रवरसेनः** ३१८९ कलिगतेऽभूत् । अस्यैव पौत्रो द्वितीयः प्रवरसेनः । एतत्समये उज्जयिन्यां ·· ·· विक्रमादित्योऽप्यभूत् । उक्तप्रवरसेनयोरन्यतरेण **सेतुबन्धापरनामधेयं** प्रणीतं स्यात् । अकब्बरजल्लालदीन्द्र (अबुल्मुजफ्फरजलालुद्दीनमहम्मद) सचिवो **रामदास**भूपतिस्तु स्वकृतसेतुबन्धटीकारम्भे–'महाराजप्रवरसेननिर्मितं

देवस्य गउडवहो (गौडवधम्)।

आख्यानग्रन्थाः।

(१) दण्डिनो दशकुमारचरितम्। (२) सुबन्धोर्वासवदत्ता। (३-४) बाणभट्टस्य हर्षचरित-कादम्बर्यौ। (५) विष्णुशर्मणः पञ्चतन्त्रम्। (६) नारायणस्य हितोपदेशः।

चम्पूग्रन्थाः।

(१) त्रिविक्रमस्य दमयन्तीकथा। (२) भोजदेवस्य रामायणचम्पूः। (३) अनन्तस्य भारतचम्पूः।

नाटकग्रन्थाः।

(१-३) कालिदासस्य अभिज्ञानशाकुन्तल-विक्रमोर्वशीय-मालविकाग्निमित्राणि। (४-६) श्रीहर्षस्य रत्नावली-प्रियदर्शिका-नागानन्दानि। (७-९) भवभूतेर्महावीरचरित-मालतीमाधवोत्तररामचरितानि। (१०-१२) राजशेखरस्य बालरामायण-विद्धशालभञ्जिका-कर्पूरमञ्जर्यः। (१३) भट्टनारायणस्य वेणीसंहारम्। (१४) मुरारेरनर्घराघवम्। (१५) विशाखदत्तस्य मुद्राराक्षसम्। (१६) श्रीकृष्णमिश्रस्य प्रबोधचन्द्रोदयम्।

एतेष्वनेकान्काव्यसाहित्यग्रन्थान्काव्यमालानुपङ्गादुद्धरद्भिरस्मत्तातपादानां सुहृद्भिर्महामहोपाध्यायश्रीदुर्गाप्रसादपण्डितवरैः काव्यसंसारः साधूपकृत इति॥

५। साहित्यदर्पणस्य च किमितिवृत्तम्? अयं दर्पणो यावदुपयुक्तकाव्यशिक्षाधायकत्वात् साहित्यशास्त्रमिति व्यपदिश्यताम्। यदयं न सरस्वतीकण्ठाभरणवद् अनतिप्रयोजनीयविषयविस्तीर्णो नवीनविचारविकलश्च, न काव्यप्रदीपवद् रूपकप्रकरणरहितोऽतिस्थगितप्रमेयश्च, न साहित्यसारवद् विषयसकलनैकतात्पर्यो दुरूहरचनश्च। एकदेशीयैः सह तु तुलनावकाश एवास्य नास्ति। सोऽयं कारिकावृत्त्युदाहृतिभिस्त्रिधा विभज्यते। तत्र कारिका वृत्तयश्च स्वकीया एव, उदाहृतयस्तु क्वचिदेव स्वकीयाः। प्रमेयाणामुपपादनशैली प्रायेण सर्वत्र प्राञ्जलैव, यत्र क्वापि

महाराजाधिराजविक्रमादित्येनाहूत. कालिदासमहाशयः सेतुबन्धं चिकीर्षुः' इत्यनेन कालिदासस्यैव सेतुबन्धकर्तृत्वं व्यलिखत्। तत्र तादृशसम्बन्धदर्शने मूलं मृग्यम्। विक्रमकालिदासयोः सम्बन्धस्तु न निरूप्यते तयोरनेकत्वात्। वाकाटकवंशे गृहीतजन्मनोः खिस्ताब्दस्य चतुर्थ-पञ्चमशतकयोर्वर्तमानयोः प्रवरसेनभूभुजोः सेतुबन्धकर्तृत्वं तु दण्डिनः स्थितिकालात्प्राक् पतति। यतो दण्डी काव्यादर्शे सेतुबन्धं स्मरतीति दिक्।

१. गौडवधे का(क)न्यकुब्जाधिपतेर्यशोवर्मणो महिमा लाक्ष्यकर्ता मस्या वाक्पतिराजेनावर्णि अत्र १२०९ गाथाः। रामाभ्युदयादिनाटककर्त्रापि स्वयमेव यशोवर्मा कालगत्या कश्मीराधिपतिना ललितादित्येन पराजितः। 'कविर्वाक्पतिराजश्रीभवभूत्यादिसेवितः। जितो ययौ यशोवर्मा तद्गुणस्तुतिवन्दिताम्॥' इति राजतरङ्गिणी ४।१४४)। अस्य समयः खिस्ताब्दीयाष्टमशतकोत्तरार्धम्.

गहना सा तावद् विषयस्वभावात्समुद्भूता । शास्त्रकारेण तु सुखाववोधायैव यतितम् । उक्तं च चरमे—'साहित्यदर्पणममुं सुधियो विलोक्य साहित्यतत्त्वमखिलं सुखमेव वित्त ॥' इति ॥

यत्त्वत्र कुत्रचिच्छृङ्गारतरङ्गितः प्रस्तावः स चापरिहार्यतया नैतस्य दूषणाय प्रभवति । इति दोषमाशङ्क्यैव काव्यालंकारे रुद्रटेनाभ्यधायि—

'नहि कविना परदारा एष्टव्या नापि चोपदेष्टव्या ।
कर्तव्यतयान्येषां न च तदुपायोऽभिधातव्यः ॥
किं तु तदीयं वृत्तं काव्याङ्गतया स केवलं वक्ति ।
आराधयितुं विदुषस्तेन न दोषः कवेरत्र ॥'

किं बहूक्त्या, अङ्गिनि कामसूत्रेऽप्येवमभिहितम्—'धर्ममर्थं च कामं च' इति (चौ. ११९ पृ०) ।

साहित्यदर्पणकारो विश्वनाथः । अयं दर्पणस्य चतुर्थे परिच्छेदे (२४४ पृ.) अलावदीनं स्मरति । 'यः कौमारहर—' इति काव्यप्रकाशोदाहरणविचारे ग–सङ्केतकपुस्तकपाठे (सा. द. १७ पृ०) जयन्तं स्मरति । काव्यप्रकाशस्य दर्पणव्याख्याने 'यदाहु श्रीकलिङ्गभूमण्डलाखण्डलमहाराजाधिराजश्रीनरसिंहदेवसभायां **धर्मदत्तं** स्थगयन्त सकलसहृदयगोष्ठीगरिष्ठकविपण्डितास्मत्पितामहश्रीमन्नारायणदासपादाः' इत्युद्गिरति । तत्र **अलावदीनः** (अलाउद्दीन मसऊद) दिल्लीपरिवृढः, यः खीस्ताब्दे १२४६ मारितः । **जयन्तः** काव्यप्रकाशस्य दीपिकाव्याख्यान्ते संवत् १३५० अर्थात् खिस्ताब्द १३५०–५७=१२९३ लिखति । एवमेताभ्यामवस्तनो दर्पणकारो **विश्वनाथः** खिस्तीयचतुर्दशशतकस्य पूर्वभागेऽवश्यं भवितुमर्हति । यस्मादयं कलिङ्गेश्वरस्य नरसिंहदेवस्य सभायां स्वपितामहं नारायणं निर्दिशति । स च नरसिंहदेवः 'अस्मिन्मदगोनरुद्धादशशतकवत्सरे (१२१८) चतुर्दशभुवनाधिपत्यादिविरुदावलीविराजमानः श्रीवीरनरसिंहदेवमहीपतिः स्वराज्यस्यैकत्रिंशदङ्केऽभिलिख्यमाने सिंहशुक्लसप्तम्यां सोमवारे' इत्यैतिहासिकफलिकया खिस्ताब्दे ११६० सिद्ध्यति । तदपि १२९३–११६०=१३३ इत्युभयोरब्दयोरन्तरं पुरुषत्रयपर्याप्तं किंचिदधिकमपि । तथापि दर्पणे (७८ पृ) नारायणस्य वृद्धप्रपितामहत्वेन लेखात्तनाम्नोऽभेदः । प्रकाशदर्पणे नारायणस्य अन्ते दास–दर्शनात्, साहित्यदर्पणे [illegible] नामकः । विश्वनाथात्मजस्य **अनन्तदास**नाम्नोऽपि विश्वनाथपितामहानुजस्य **चण्डीदास**स्यापि तथानामनिर्देशाच्च (सा. ६६ पृ०) । दर्पणे विश्वनाथपित्रा **चन्द्रशेखरेण** वर्णिताद् **उमाभानु**[illegible] (सा. द० ६३) ।

१. [illegible] । नरसिंह [illegible]

विश्वनाथस्य नाम सान्धिविग्रहिक-महापात्र-कविराजेत्युपाधिभिर्घटितं दृश्यते । अत्र सान्धिविग्रहिक इति राज्याधिकारविशेषः । तदानीं विद्याप्रणयिनां कलिङ्गाधिपानां राज्याधिकारे विश्वनाथस्य पूर्वपुरुषास्तदनुबन्धिनः श्रीधर-राघवानन्द-कृष्णानन्दप्रभृतयश्चासन् । अत एतन्नामापि सान्धिविग्रहिक-महापात्र-विशेषणाभ्यां भूषितम् । अत्र श्रीधर-राघवानन्दौ काव्यप्रकाशस्य टीकाकृतावपि । कृष्णानन्दस्तु वैदर्भरीतिप्रधानस्य सहृदयानन्दाख्यस्य नलचरित-महाकाव्यस्य रचयिता । राघवानन्दनाम दर्पणस्य प्रथमपरिच्छेदे; सहृदयानन्दस्य 'सूर्यानुगेन–'इति पद्यं सप्तमपरिच्छेदे वर्तते । सान्धिविग्रहिक इति संधिविग्रहाधिकृतः । 'तत्र नियुक्तः–' (पा० सू० ४।४।६९) इति ठक् । एष उपाधी राजतरङ्गिण्यादौ सुप्रसिद्धः । महापात्रो ब्राह्मणविशेष इति केचित्, सङ्गेत्यपरे । नतु महामात्र इति सम्भावनीयम् । कविराज इति महाकविसमानार्थकम् । नतु अवध(अयोध्या)प्रान्तीयप्रधानहिंदीभाषायां 'भाट' इति प्रसिद्धब्राह्मणजातेर्वाचकम् । श्रीनारायणचरणारविन्देत्यादि तु आस्तिक्यादिप्रदर्शनार्थम् । काव्यप्रकाशदर्पणे तु '...सङ्गीतविद्याविद्याधर कलाविदामालतीमधुकर-विविधविद्यार्णवकर्णधार...' इति विश्वनाथस्य त्रीणि विशेषणान्यधिकानि । वस्तुतोऽयं महाकुलप्रसूतो बहुज्ञः सहृदयश्चेति । एतत्प्रणीतग्रन्थास्त्वेते ज्ञायन्ते—(१) राघवविलासमहाकाव्यम् (२) कुवलयाश्वचरितप्राकृतमहाकाव्यम् (३) चन्द्रकला नाटिका (४) प्रभावती नाटिका (५) षोडशभाषामयी प्रशस्तिरत्नावली (एतेषां निर्माणोत्तर) (६) साहित्यदर्पणः (७) नरसिंहविजयम् (८) काव्यप्रकाशदर्पणः । एतेभिस्तु चन्द्रशेखरस्य पुष्पमाला नाटिका, भाषार्णव इति ग्रन्थद्वयी दर्पणतो व्यक्ता । तत्र—

'भाषामध्यमपात्राणां नाटकोक्तौ विशेषतः ।
महाराष्ट्री सौरसेनीत्युक्ता भाषा द्विधा बुधैः ॥
हीनैर्भाष्या विभाषा स्यात्सा च सप्तविधा स्मृता ।
प्राच्यावन्ती मागधी च शाकारी च तथापरा ॥
चाण्डाली शाबरी चापि तथाऽऽभीरीति भेदतः ।'

[illegible]

[illegible]

'धन्वन्तरिः क्षपणकोऽमरसिंहशङ्कु-
वेतालभट्ट-घटखर्पर-कालिदासाः ।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य ॥'

इत्येवमादिश्लोकाः परीक्षापेक्षाः । अत्रेयं भ्रान्तिदिक्—वराहमिहिरो हि 'सप्ताश्विवेदसङ्ख्य शककाल-(४२७)' इति स्वसमयं निर्दिदेश । तेन [illegible] समयो व्यभिचरितो द्रष्टव्यः । कालकलनानादरे तु—

'भासो रामिल-सोमिलौ वररुचिः श्रीसाहसाङ्कः कवि-
र्माघो भारवि-कालिदास-तरलाः स्कन्धः सुबन्धुश्च यः
दण्डी बाणदिवाकरौ गणपतिः कान्तश्च रत्नाकरः
सिद्धा यस्य सरस्वती भगवती के तस्य सर्वेऽप्यमी ॥'

इत्येवमादिश्लोका अदुष्टा इत्यलम् ।

दण्डी ।

अस्मदाचार्यदण्डी कविः कुत्र कदा बभूवेति विज्ञानं दुःशकम् । दण्डीति ना[illegible] चतुर्थाश्रमिणमेव मन्यन्ते कतिपये । कतिपये पुनः काव्यादर्शे वैदर्भीरीतेर्[illegible] प्रशंसनाद् विदर्भजनपदस्थं दाक्षिणात्यं कीर्तयन्ते । अथ—

'त्रयोऽग्नयस्त्रयो वेदास्त्रयो देवास्त्रयो गुणाः ।
त्रयो दण्डिप्रबन्धाश्च त्रिषु लोकेषु विश्रुताः ॥'

इति [illegible]-राजशेखरमहाकविश्लोकाद्दण्डिनो ग्रन्थत्रयस्[illegible] [illegible] । तत्र काव्यादर्श-दशकुमारचरिते तावदतिरोहिते । तृतीयो ग्र[illegible] [illegible]—'छन्दोविचित्या सकलस्तत्प्रपञ्चो निरूपित' इति काव्याद[illegible] 'छन्दोविचितिरिव [illegible]' इति सौबन्धवीयवासवदत्ताश्लेषेण 'छ[illegible] [illegible]' इति त्रिपाठिशिवरामप्रणीतया तट्टीकया च छन्दोविचि[illegible] [illegible] । [illegible] मन्यन्ते । तथाच विचिति[illegible] [illegible] । [illegible] तृतीयं ग्रन्थं कलापरिच्छेदं कल्पयन्ते । मल्लिकामारुतनिर्[illegible] [illegible] । [illegible] समयस्तु प्रवरसेनादर्वाग् रुद्रटा[illegible] [illegible] ॥

धनिकः ।

[illegible] दशरूपकस्यावलोककर्ता, दशरूपस्य तु विष्णुसूनुजन्मना [illegible] [illegible] ग्रन्थः । धनञ्जय —

[illegible]

[illegible] । [illegible] रामवर्मा [illegible] । [illegible] १२०० [illegible]
[illegible] ।

विष्णोः सुतेनापि धनञ्जयेन विद्वन्मनोरागनिबन्धहेतुः ।
आविष्कृतं मुञ्जमहीशगोष्ठीवैदग्ध्यभाजा दशरूपमेतत् ॥'

इत्यनेनात्मानं वाक्पतिराजदेवापरनाम्नो मुञ्जभूभुजः सभासदमाख्यत । स च [illegible] ९९४ खिस्ताब्दे आसीदिति [illegible] ज्ञायते । अयमेव काले धनिकस्यापि भवितुं युक्तम् । धनिकेन काव्यनिर्णयोऽपि निरमायीति दशरूपालो[illegible]न्तो लब्धम् ॥

नखकुट्टः ।

कोऽयं कदा कुत्र निर्मितो निबन्ध इति नाद्यावधि ज्ञायते । एतन्मतं तु दर्पणस्य षष्ठपरिच्छेदे 'नेपथ्योक्तं श्रुतं तत्र' इत्याद्युक्तम् ॥

पुरुषोत्तमः ।

द्वौ पुरुषोत्तमौ ज्ञायेते । एकस्त्रिकाण्डशेषकर्ता, अन्यो विष्णुभक्तिकल्पलतारचयिता । तत्राद्यस्य त्रिकाण्डशेषस्थनाम्ना पुरुषोत्तमदेव इति नाम, द्वितीयस्य तु पुरुषोत्तम इति । परन्त्वाद्यस्यापि पद्यरचनायां पुरुषोत्तम इत्येव नामधेयं दृश्यते । तथाहि त्रिकाण्डशेषप्रारम्भे 'एष प्रयत्नः पुरुषोत्तमस्य' इति । हारावलीप्रारम्भे 'हारावली विरचिता पुरुषोत्तमेन' इति च । अतो द्वयोरेकता सम्भवति । यद्यप्येवं दर्पणस्य नवमपरिच्छेदे 'पुरुषोत्तमस्त्वाह' इत्यादिना स्मृतस्तथापि [illegible] पुरुषोत्तमस्ता [illegible] भावनीया ॥

भरतः ।

एतद्नाम्नैव नाट्यशास्त्रं लोके प्रसिद्धम् । एतस्य [illegible] । एतस्मादादिभरतनामकमपि [illegible] । [illegible] भरत, आदिभरत इति द्वेधा [illegible] । [illegible]

भर्तृहरिः ।

[illegible]

व्याख्यातारौ । तत्र तेषामत्र [illegible] प्राचीनः । शतकानि तु स्वपरपद्योपनिबद्धानीति ग्रन्थान्तरसमादर्शेनावगम्यते । दुःशीलपत्नीमानसेन भर्तृहरिणा राज्यलक्ष्मीवशाय वैराग्यमाश्रितमिति निगमप्रसिद्धिः । तत्र—"यां चिन्तयामि सततं मयि सा विरक्ता, साप्यन्यमिच्छति जनं, स जनोऽन्यसक्तः । अस्मत्कृते च परितुष्यति काचिदन्या, धिक् तां च, तं च, मदनं च, इमां च, मां च ॥" इति तदीयं पद्यं विज्ञम् । इद-राज्ञो [illegible], [illegible] पुष्पाले, पुष्पालस्य अन्यनादुर्गमयनीति किंवदन्ती । अयमेव भर्तृहरिर्हरिहरो [illegible] भर्तृहरिनिर्वेदव्यनाटकस्य कथानायको विभाव्यते । तत्र राज्ञी भानुमती विशुद्धचरितैव, तद्गत किंवदन्तीगन्धोऽपि । राज्ञो योगि-गोरक्षतो दीक्षाग्रहणं चेति दिक् ॥

भोजदेवः ।

सरस्वतीकण्ठाभरणादिनानाविधसदक्षरचयिता कृतिशकुन्तकल्पतरुर्धारानगरनाथो भूपालरत्नं भोजदेवो विक्रमार्कसंवत् १०७८ आसीत्, तदेतदस्यो निर्दिष्टदानपत्राद्व्यक्तम् ।

रुद्रटस्य काव्यालङ्कारात्परस्मिन् मम्मटस्य काव्यप्रकाशात् पूर्वस्मिन् काले सरस्वतीकण्ठाभरणमालङ्कारिकाणां वस्तुतः कण्ठाभरणमेवाभूत् । तत एवास्य बहवो विषया उदाहृतयश्चालङ्कारग्रन्थेषूद्धृता लभ्यन्ते । अस्य च पञ्च परिच्छेदाः । तत्र प्रथमे परिच्छेदे विस्तरतो दोषगुणविवेचनम् । द्वितीये बाह्यसंज्ञाः शब्दालङ्काराः, तृतीये आभ्यन्तरसंज्ञा अर्थालङ्काराः, चतुर्थे बाह्याभ्यन्तरसंज्ञा उभयालङ्कारा विवेचिताः । पञ्चमे तु प्राचीनरीत्या रसादिर्दर्शितः । यद्यप्यत्र मौलिकविषयाणामवान्तरभेदा नातिप्रयोजनीयास्तथाप्यनेके पदार्था उदाहरणश्लोकाश्च साहित्यसाम्प्रदायिकविवेकादर्शभूता अवश्यं पर्यालोचनीयाः ।

एतत् कण्ठाभरणं महाराजश्रीभोजदेवेन अलङ्कारशास्त्रत्वेन व्यपदिष्टम् । एतस्य प्रारम्भसमासौ—

"ध्वनिर्वर्णाः पदं वाक्यमित्यास्पदचतुष्टयम् ।
यस्याः सूक्ष्मादिभेदेन वाग्देवीं तामुपास्महे ॥'
'यावन्मूर्ध्नि हिमांशुकन्दलभृति स्वर्वाहिनी धूर्जटे-
र्यावद्वक्षसि कौस्तुभस्तबकिते लक्ष्मीर्मुरद्वेषिणः ।
यावच्चित्तभुवस्त्रिलोकविजयप्रौढं धनुः कौसुमं
भूयात्तावदियं कृतिः कृतधियां कर्णावतंसोत्पलम् ॥"

इत्येवमुपश्लोकिते ।

तद्दानपत्रस्यापेक्षिताशोऽयम्—

"...... परमभट्टारकमहाराजाधिराजपरमेश्वरश्री-सीयकदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरश्रीवाक्पतिराजदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरश्रीसिन्धुराजदेवपादानुध्यातपरमभट्टारकमहाराजाधिरा-

जपरमेश्वरश्रीभोजदेवः कुशली नागहृदपश्चिमपथकान्त-पातिवीराणके समुपगता-न्समस्तराजपुरुषान्ब्राह्मणोत्तरान्प्रतिनिवासिपट्टकिलजनपदादींश्च समादिशति—अस्तु वः संविदितम्, यथा अतीताष्टसप्तत्यधिकसाहस्रिकसंवत्सरे (१०७८) माघासि-ततृतीयायां रवावुदगयनपर्वणि कल्पितहलाना लेख्ये श्रीमद्धारायामवस्थितैरस्माभिः स्नात्वा चराचरगुरुं भगवन्तं भवानीपतिं समभ्यर्च्य संसारस्यासारतां दृष्ट्वा

'वाताभ्रविभ्रममिदं वसुधाधिपत्य-
मापातमात्रमधुरो विषयोपभोगः ।
प्राणास्तृणाग्रजलबिन्दुसमा नराणां
धर्मः सखा परमहो परलोकयाने ॥
भ्रमत्संसारचक्राग्रधाराधारामिमां श्रियम् ।
प्राप्य ये न ददुस्तेषां पश्चात्तापः परं फलम् ॥'

इति जगतो विनश्वरं स्वरूपमाकलय्य उपरिलिखितग्रामः स्वसीमातृणगोचर-यूतिपर्यन्तः सहिरण्यभागभोगः सोपरिकरः सर्वदायसमेतो ब्राह्मणधनपतिभट्टाय भट्टगोविन्दसुताय बह्वृचाश्वलायनशाखाय त्रिप्रवराय वेल्वलप्रतिबद्धश्रीवादाविनि-र्गतराधरस्तद्धकर्णाटाय मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धये अदृष्टफलमङ्गीकृत्य आचन्द्रार्कार्णवक्षितिसमकालं यावत्परया भक्त्या शासनेनोदकपूर्वं प्रतिपादित इति मत्वा यथा दीयमानभोगकरहिरण्यादिकमाज्ञाश्रवणविधेयैर्भूत्वा सर्वमस्मै समुपनेतव्यम् । सामान्यं चैतत्फलं बुद्ध्वा अस्मद्वंशजैरन्यैरपि भाविभोक्तृभिरस्मत्प्रदत्तधर्मदायोऽय-मनुमन्तव्यः पालनीयश्च ....

इति कमलदलाम्बुबिन्दुलोलां श्रियमनुचिन्त्य मनुष्यजीवितं च ।
सकलमिदमुदाहृतं च बुद्ध्वा नहि पुरुषैः परकीर्तयो विलोप्याः ॥

इति । संवत् १०७८ चैत्रसुदि १४ स्वयमाज्ञा [illegible] [illegible] । स्वहस्तोऽयं श्रीभोजदेवस्य ॥

(इण्डियन् आण्टिक्वेरी ६।५३—५४)

महिमा ।

[illegible] श्रीमत्सु राजानकमहिमा[illegible] [illegible] अभिनवगुप्त-पादान् [illegible] [illegible] [illegible], [illegible] [illegible] बभूव । [illegible] [illegible] [illegible]-[illegible] ([illegible]) [illegible] [illegible] व्यक्तिविवेकं[1] [illegible] । [illegible] [illegible] [illegible] श्रीधीरैः [illegible] [illegible] परिच्छेदे—

'दोषं व्यक्तिविवेकेऽमुं यदिहोपदिलोचने ।
काव्यमीमांसिषु प्रातनम्नो महिमाऽऽहत ।'

[illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible]

१. [illegible]

परमेश्वरश्रीभोजदेवः कुशली नागह्रदपश्चिमपथकान्त-पातिवीराणके समुपगता-न्समस्तराजपुरुषान्ब्राह्मणोत्तरान्प्रतिनिवासिपट्टकिलजनपदादींश्च समादिशति—अस्तु वः संविदितम्, यथा अतीताष्टसप्तत्यधिकसाहस्रिकसंवत्सरे (१०७८) माघासित-तृतीयायां रवावुदगयनपर्वणि कल्पितहलानां लेख्ये श्रीमद्धारायामवस्थितैरस्माभिः स्नात्वा चराचरगुरुं भगवन्तं भवानीपतिं समभ्यर्च्य संसारस्यासारतां दृष्ट्वा

'वाताभ्रविभ्रममिदं वसुधाधिपत्य-
मापातमात्रमधुरो विषयोपभोगः ।
प्राणास्तृणाग्रजलबिन्दुसमा नराणां
धर्मः सखा परमहो परलोकयाने ॥
भ्रमत्संसारचक्राग्रधाराधारामिमां श्रियम् ।
प्राप्य ये न ददुस्तेषां पश्चात्तापः परं फलम् ॥'

इति जगतो विनश्वरं स्वरूपमाकलय्य उपरिलिखितग्रामः स्वसीमातृणगोचर-यूतिपर्यन्तः सहिरण्यभागभोगः सोपरिकरः सर्वादायसमेतो ब्राह्मणभट्टभट्टाय भट्टगोविन्दसुताय बह्वृचाश्वलायनशाखाय त्रिप्रवराय [illegible]प्रतिबद्धश्रीवादादिति-निर्गताय [illegible]कर्णाटाय मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धये [illegible] आचन्द्रार्कार्णवक्षितिसमकालं यावत्परया भक्त्या शासनेनोदकपूर्वं प्रतिपादित इति मत्वा [illegible] यथादीयमानभागभोगकरहिरण्यादिकमाज्ञाश्रवणविधेयैर्भूत्वा सर्वमस्मै समुपनेतव्यम् । सामान्यं चैतत्पुण्यफलं बुद्ध्वा अस्मद्वंशजैरन्यैरपि भाविभोक्तृभिरस्मत्प्रदत्तधर्मदायोऽय-मनुमन्तव्यः पालनीयश्च ....

इति कमलदलाम्बुबिन्दुलोलां श्रियमनुचिन्त्य मनुष्यजीवितं च ।
सकलमिदमुदाहृतं च बुद्ध्वा नहि पुरुषैः परकीर्तयो विलोप्याः ॥

इति । संवत् १०७८ चैत्र सुदि १४ [illegible] । स्वहस्तोऽयं श्रीभोजदेवस्य ॥

([illegible] ६।५३–५४)

महिमा ।

[illegible]

'[illegible] ।
[illegible] ।'

[illegible]

---

१. [illegible]
[illegible]

व्या[illegible] । [illegible] । [illegible] तु [illegible]नीति प्र[illegible] । [illegible]रमा[illegible] भर्तृहरिणा राज्य[illegible] [illegible] । [illegible]—"[illegible] मयि सा [illegible], [illegible] । अस्मत्कृ[illegible] परितुष्यति [illegible], [illegible], इमां च, मां च ॥" इ[illegible] तदीय पद्य [illegible] । [illegible] पूर्वान्ते [illegible]गमयन्तीति [illegible] । [illegible] भर्तृहरिनिर्वे[illegible] [illegible]नाटकस्य [illegible] । [illegible] भर्तुर्गुरुत्वेनैव, नकु[illegible] किंवदन्तीगतो[illegible]ऽपि । [illegible]-गोरक्षनो [illegible] ॥

भोजदेवः ।

सरस्वतीकण्ठाभरणा[illegible] [illegible]नाथो भूपालरत्नं भोजदेवो [illegible] । [illegible], [illegible] निर्दिष्टेन दानपत्राद्व्यक्तम् ।

[illegible] पूर्वस्मिन् काले [illegible]तीकण्ठाभरणमालङ्कारिकाणा[illegible] । तत्र एतस्य [illegible] विषया उदाहृतश्चालङ्कारग्र[illegible] । अस्य च पञ्च परिच्छेदाः । तत्र प्रथमे परिच्छेदे [illegible] । [illegible] शब्दालङ्कारा, तृतीये आभ्यन्तरसञ्ज्ञा अर्थालङ्कारा, चतु[illegible] उभयालङ्कारा वि[illegible]चिताः । पञ्चमे तु प्राचीन[illegible] । [illegible]विषयाणाम[illegible]वान्तरभेदा नातिप्रयोजनीया[illegible] । उदाहरण[illegible] साहित्यसाम्[illegible]कालिकविवेकादर्शभूता अत्र[illegible] पर्यालोचनायाः ।

एतत् [illegible]कण्ठाभरण महाराज[illegible] [illegible] व्यादिष्टम् । एतत्प्रारम्भसमाप्ती—

"ध्वनिर्वर्णाः पदं वाक्यमित्यास्पदचतुष्टयम् ।
यस्याः सूक्ष्मादिभेदेन वाग्देवीं तामुपास्महे ॥'
'यावन्मूर्ध्नि हिमांशुकन्दलभृति स्वर्वाहिनी धूर्जटे-
र्यावद्वक्षसि कास्तुभस्तबकिते लक्ष्मीर्मुरद्वेषिणः ।
यावच्चित्तभुवस्त्रिलोकविजयप्रौढं धनुः कौसुमं
भूयात्तावदियं कृतिः कृतधियां कर्णावतंसोत्पलम् ॥"

इत्येतमुप[illegible] ।

[illegible]दानपत्रस्यापेक्षिताशोऽयम्—

परमभट्टारकमहाराजाधिराजपरमेश्वरश्री सीयकदेवपादानुध्यातप-रमभट्टारकमहाराजाधिराजपरमेश्वरश्रीवाक्पतिराजदेवपादानुध्यातपरमभट्टारक-महाराजाधिराजपरमेश्वरश्रीसिन्धुराजदेवपादानुध्यातपरमभट्टारकमहाराजाधिरा

जपरमेश्वरश्रीभोजदेवः कुशली नागहृदपश्चिमपथकान्तःपातिवीराणके समुपगता-
समस्तराजपुरुषान्ब्राह्मणोत्तरान्प्रतिनिवासिपट्टकिलजनपदादींश्च समादिशति—अस्तु वः संविदितम्, यथा अतीताष्टसप्ततिविक्रमादित्यसंवत्सरे (१०७८) माघासिततृतीयायां रवावुदगयनपर्वणि कल्पितहलानां लेख्ये श्रीमद्धारायामवस्थितैरस्माभिः स्नात्वा चराचरगुरुं भगवन्तं भवानीपतिं समभ्यर्च्य संसारस्यासारतां दृष्ट्वा

'वाताभ्रविभ्रममिदं वसुधाधिपत्य-
मापातमात्रमधुरो विषयोपभोगः ।
प्राणास्तृणाग्रजलबिन्दुसमा नराणां
धर्मः सखा परमहो परलोकयाने ॥
भ्रमत्संसारचक्राग्रधाराधारामिमां श्रियम् ।
प्राप्य ये न ददुस्तेषां पश्चात्तापः परं फलम् ॥'

इति जगतो विनश्वरं स्वरूपमाकलय्य उपरिलिखितग्रामः स्वसीमातृणगोचर-यूतिपर्यन्तः सहिरण्यभागभोगः सोपरिकरः सर्वादायसमेतो ब्राह्मणधनपतिभट्टाय भट्टगोविन्दसुताय बह्वृचाश्वलायनशाखाय त्रिप्रवराय वाराणसीविनिर्गतश्रीवादाविनि-[illegible] मातापित्रोरात्मनश्च पुण्ययशोऽभिवृद्धये अदृष्टफलमङ्गीकृत्य चन्द्रार्कार्णवक्षितिसमकालं यावत्परया भक्त्या शासनेनोदकपूर्वं प्रतिपादित इति मत्वा यथा दीयमानभोगभागहिरण्यादिकमाज्ञाश्रवणविधेयैर्भूत्वा सर्वमस्मै समुपनेतव्यम् । सामान्यं चैतत्पुण्यफलं बुद्ध्वा अस्मद्वंशजैरन्यैरपि भाविभोक्तृभिरस्मत्प्रदत्तधर्मदायोऽय-मनुमन्तव्यः पालनीयश्च ....

1. इतीति । इति अन्तःपुरसुन्दरीः प्रति विज्ञाय यस्या यद् वक्तव्यं तदवगम्य मया विज्ञापिते विनिश्चय निवेदिते सति । एतदुक्तं भवति—ऋतुस्नातैव तावदनुपेक्षणीया कुन्तलमहाराजतनया, साधारणोऽपि तनयो दुर्लङ्घ्यः [illegible], सामान्येऽपि [illegible] कमलालालकमल्लाप्रयुक्ते । एवमुत्तरोत्तराधिककार्यसमानेऽपि महाराज्ञाः प्रसादनं तावत्सर्वोपरीति रहस्यम् ॥

2. नाडिका इति । अत्यन्तसंयोगे द्वितीया ॥

3. 'वक्त्रमवेक्ष्य चुम्बितुमहं' इति प्राचीनः पाठः ॥

---

१. [illegible] तु [illegible] कि [illegible] । [illegible] [illegible] ' इति [illegible] २. '[illegible]' इति [illegible] [illegible] '[illegible]' [illegible].

अर्थचिन्तने सहायमाह—

मन्त्री स्यादर्थानां चिन्तायां—

अर्थास्तन्त्रावापादयः। यत्त्वत्र सहायकथनप्रस्तावे— 'मन्त्री स्वं चोभयं वापि सखा तस्यार्थचिन्तने' इति केनचिल्लक्षणं कृतम्, तदपि राज्ञोऽर्थचिन्तनोपायलक्षणप्रकरणे लक्षयितव्यम्, न तु सहायकथनप्रकरणे। 'नायकस्यार्थचिन्तने मन्त्री सहायः, इत्युक्तेऽपि नायकस्यार्थत एव सिद्धत्वात्। यदप्युक्तम्—'मन्त्रिणा ललितः शेषा मन्त्रिष्वायत्तसिद्धयः' इति, तदपि स्वलक्षणकथनेनैव लक्षितस्य धीरललितस्य मन्त्रिमात्रायत्तार्थचिन्तनोपपत्तेर्गतार्थम्। न चार्थचिन्तने तस्य मन्त्री सहायः। किं तु स्वयमेव सपादकः। तस्यार्थचिन्तनाद्यभावात्।

शरीरचेष्टाविशेष इत्यर्थः ॥ **मन्त्रीति** । अस्य इति सहायः इति चानुषज्यते। चिन्तायामुपायनिरूपणे। स्वमण्डले क्रियमाणं कर्म तन्त्रम्। परमण्डले क्रियमाणं कर्म आवाप। आदिना शत्रुनिग्रहादय। **यत्त्विति** । स्वं चेति चकारो वार्थे। उभयं मन्त्रिसद्वयम्। **तस्य** नायकस्य। सहायकथनपरत्वे दोषमाह—**नायकस्येति**। एवं च स्वं चेत्यादि निरर्थकम्। तदनुपादानेऽपि तल्लाभात्। स्वयं चिन्तापक्षे स्वस्य सहकारित्वरूपसहायत्वानुपपत्तेरुभयचिन्ताया कारणान्तरप्रसङ्गाच्चेति भाव। सखिशब्दस्योपायार्थत्वम्, न तु सहायपरत्वमित्यवगन्तव्यम्। **मन्त्रिणेति**। आयत्तसिद्धिरित्यन्वय। ललितो धीरललित। शेषा धीरोदात्तादयः। **स्वलक्षणेति**। **चिन्तन इति**। धीरललितलक्षणनिविष्टेन तस्यार्थचिन्तनाद्यभाव.। तेन च मन्त्रिमात्रायत्तार्थसिद्धिकत्वं प्रतीयत इति भाव। **तस्य** धीरललि-

---

1. **तन्त्रेति**। तन्त्रण तन्त्रम्। स्वाधीनत्वात्स्वराष्ट्रे क्रियमाण कर्मापि तन्त्रशब्देनोच्यते। आ समन्ताद् वपन्ति इतिकर्तव्यताबीजमत्रेत्यावापः। 'डुवप् बीजतन्तुसताने' 'हलश्च' इति घञ्। 'पर प्रत्यावाप फलति कृतसेकस्तरुरिव' इति ॥

2. **केनचिदिति**। **दशरूपके** धनञ्जयेनेत्यर्थः। तत्राय सुगमः सदर्भः—अथ नेतुः कार्यान्तरसहायानाह—'मन्त्री स्व वोभय वापि सखा तस्यार्थचिन्तने। तस्य नेतुः अर्थचिन्ताया तन्त्रावापादिलक्षणाया मन्त्री वा आत्मा वा उभय वा सहाय। तत्र विभागमाह—'मन्त्रिणा ललित, शेषा मन्त्रिष्वायत्तसिद्धय.।' उक्तलक्षणो ललितो नेता मन्त्रायत्तसिद्धि.। शेषा धीरोदात्तादय अनियमेन मन्त्रिणा स्वेन वा उभयेन वा अङ्गीकृतसिद्धय इति ॥

---

१ क पुस्तके तथा मुद्रितपुस्तकेषु 'मन्त्री स्यादर्थाना चिन्ताया तद्धदवरोधे।' इत्यार्धे ... न 'मन्त्री स्यादर्थचिन्तायामर्थास्तन्त्रावापादय।' इत्येवमनुष्टुप्रूपस्य भावितम् 'तथा ...नि सन्ह गद्ये योजितम् २ 'स्वस्योभयस्यापि' क.

अथान्तःपुरसहायाः—

तद्वदवरोधे ।

वामनशण्ढकिरातम्लेच्छाभीराः शकारकुब्जाद्याः ॥ ४३ ॥

मदमूर्खताभिमानी दुष्कुलतैश्वर्यसंयुक्तः ।

सोऽयमनूढाभ्राता राज्ञः श्यालः शकार इत्युक्तः ॥ ४४ ॥

आद्यशब्दान्मूकादयः । तत्र शण्ढवामनकिरातकुब्जादयो यथा लावल्याम्—

नष्टं वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपा-
मन्तःकञ्चुकिकञ्चुकस्य विशति त्रासादयं वामनः ।
पर्यन्ताश्रयिभिर्निजस्य सदृशं नाम्नः किरातैः कृतं
कुब्जा नीचतयैव यान्ति शनकैरात्मेक्षणाशङ्किनः ॥

शकारो मृच्छकटिकादिषु प्रसिद्धः । अन्येऽपि यथादर्शनं ातव्याः ।

अथ दण्डसहायाः—

दण्डे सुहृत्कुमाराटविकाः सामन्तसैनिकाद्याश्च ।

दुष्टनिग्रहो दण्डः । स्पष्टम् ।

ऋत्विक्पुरोधसः स्युर्ब्रह्मविदस्तापसास्तथा धर्मे ॥ ४५ ॥

स्य । स्वयमेव [illegible] निष्पादकः प्रधानकारणम् ॥ तद्वदिति । अवरोधेऽन्तः-पुरे । वामनादयो नायकस्य सहाया इत्यर्थः । [illegible] क्लीबो वा । शका-रमाह—मदेति । [illegible] । मदा-[illegible] ॥ नष्टमिति । [illegible] पुरप्रविष्टं [illegible] । [illegible] । वर्षवरैः [illegible] । '[illegible]' इत्यमरः । [illegible] इति [illegible] सदृशं योग्यं पर्यन्तदेशं [illegible] इत्यर्थः ॥ [illegible] । [illegible] ॥ ऋत्विगिति । धर्मे [illegible]

---

1. [illegible]

2. [illegible]

अथ विलासः—

धीरा दृष्टिर्गतिश्चित्रा विलासे सस्मितं वचः ।

यथा—

दृष्टिस्तृणीकृतजगत्त्रयसत्त्वसारा
धीरोद्धता नमयतीव गतिर्धरित्रीम् ।
कौमारकेऽपि गिरिवद्गुरुतां दधानो
वीरो रसः किमयमेत्युत दर्प एव ॥

संक्षोभेष्वप्यनुद्वेगो माधुर्यं परिकीर्तितम् ॥ ५२ ॥

ऊह्यमुदाहरणम् ।

भीशोकक्रोधहर्षाद्यैर्गाम्भीर्यं निर्विकारता ।

यथा—

आहूतस्याभिषेकाय विसृष्टस्य वनाय च ।
न मया लक्षितस्तस्य स्वल्पोऽप्याकारविभ्रमः ॥

व्यवसायादचलनं धैर्यं विघ्ने महत्यपि ॥ ५३ ॥

यथा—

श्रुताप्सरोगीतिरपि क्षणेऽस्मिन्हरः प्रसंख्यानपरो बभूव ।
आत्मेश्वराणां नहि जातु विघ्नाः समाधिभेदप्रभवो भवन्ति ॥

अधिक्षेपापमानादेः प्रयुक्तस्य परेण यत् ।
प्राणात्ययेऽप्यसहनं तत्तेजः समुदाहृतम् ॥ ५४ ॥

तादि ॥ **तृणीकृतौ** तुच्छीकृतौ जगत्त्रयस्य सत्त्वमुत्साह सारो बलं च यया सा । धीरा मन्थरा । उद्धता उद्भटा च । एतेन गतेश्चित्रत्वं नैकरूपत्वं च । अत्र नायकस्य उत्साहदर्पयोरतिशयसूचनाय वीररसत्वेन दर्पत्वेन चोल्लेख ॥ **ऊह्यमुदाहरणमिति** । यथा मम रामविलासे—'तन्निपीय कटु कर्णपदव्या खेदमाप न मनागपि राम । शूलपाणिरिव घोरमुदग्रं कालकूटपटलं किल पूर्वम् ॥' तस्य[2] श्रीरामस्य । आकारो मुखनेत्रादि तस्य विभ्रमो वैपरीत्यं येन हर्षशोकादयो लक्ष्यन्ते ॥ **व्यवसायात्** प्रारब्धकर्मण । **अचलनम्** अप्रच्यवनम् ॥ **प्रसंख्यानपरो** योगनिष्ठ । **आत्मेश्वराणा** मनोनिरोधक्षमाणाम् ॥ **अधिक्षेपो**

1. **अस्मिन्निति** । अस्मिन्क्षणे वसन्ताविर्भावसमये ॥

घ. २. 'तस्य—' इत्यादि लक्ष्यन्ते' इत्यन्त पाठो टि 'मनोनिरोधक्षमाणाम्' इत्यस्याग्रे

वाग्वेषयोर्मधुरता तद्वच्छृङ्गारचेष्टितं ललितम् ।
दानं सप्रियभाषणमौदार्यं शत्रुमित्रयोः समता ॥ ५५ ॥

एषामुदाहरणान्यूह्यानि ।

अथ नायिका त्रिभेदा स्वान्या साधारणस्त्रीति ।
नायकसामान्यगुणैर्भवति यथासंभवैर्युक्ता ॥ ५६ ॥

नायिका पुनर्नायकसामान्यगुणैस्त्यागादिभिर्यथासंभवैर्युक्ता भवति । सा च स्वस्त्री अन्यस्त्री साधारणस्त्रीति त्रिविधा ।

तत्र स्वस्त्री—

विनयार्जवादियुक्ता गृहकर्मपरा पतिव्रता स्वीया ।

यथा—

'लज्जापज्जत्तपसाहणाइं परभत्तिणिप्पिवासाइं ।
अविणअदुम्मेधाइं धण्णाण घरे कलत्ताइं ॥'

[illegible] । अपमानः पराभवः । आदिना [illegible] । प्रयुक्तस्य [illegible] । परे- [illegible] ॥ उदाहरणं यथा [illegible] — [illegible] । [illegible] ।' [illegible] । [illegible] । [illegible] । [illegible] । स्वा [illegible] । अन्या [illegible] । साधारणी [illegible] । यथासंभवैरिति । [illegible] । [illegible] । [illegible] स्त्रीति । [illegible]

पुनश्च—

अवस्थाभिर्भवन्त्यष्टावेताः षोडशभेदिताः ।
स्वाधीनभर्तृका तद्वत्खण्डिताथाभिसारिका ॥ ७२ ॥
कलहान्तरिता विप्रलब्धा प्रोषितभर्तृका ।
अन्या वासकसज्जा स्याद्विरहोत्कण्ठिता तथा ॥ ७३ ॥

तत्र—

कान्तो रतिगुणाकृष्टो न जहाति यदन्तिकम् ।
विचित्रविभ्रमासक्ता सा स्यात्स्वाधीनभर्तृका ॥ ७४ ॥

यथा—'अस्माकं सखि वाससी—' इत्यादि (९२पृ.) ।

पार्श्वमेति प्रियो यस्या अन्यसंयोगचिह्नितः ।
सा खण्डितेति कथिता धीरैरीर्ष्याकषायिता ॥ ७५ ॥

यथा—'तदवितथमवादीः—' इत्यादि (११३पृ.) ।

अभिसारयते कान्तं या मन्मथवशंवदा ।
स्वयं वाभिसरत्येषा धीरैरुक्ताभिसारिका ॥ ७६ ॥

क्रमेण यथा—

न च मेऽवगच्छति यथा लघुतां, करुणां यथा च कुरुते स मयि ।
निपुणं तथैनमभिगम्य वदेरभिदूति काचिदिति संदिदिशे ॥

'उत्क्षिप्तं करकङ्कणद्वयमिदं, बद्धा दृढं मेखला,
यत्नेन प्रतिपादिता मुखरयोर्मञ्जीरयोर्मूकता ।

[illegible] । ईर्ष्याकषायिता ईर्ष्या कलुषीकृतचित्ता ॥ [illegible] —अभिसारयत इति ॥ न चेति । [illegible] ॥ उत्क्षि-

[illegible]

आरब्धे रभसान्मया प्रियसखि क्रीडाभिसारोत्सवे,
चण्डालस्तिमिरावगुण्ठनपटक्षेपं विधत्ते विधुः ॥'

संलीना स्वेषु गात्रेषु मूकीकृतविभूषणा ।
अवगुण्ठनसंवीता कुलजाभिसरेद्यदि ॥ ७७ ॥
विचित्रोज्ज्वलवेषा तु रणन्नूपुरकङ्कणा ।
प्रमोदस्मेरवदना स्याद्वेश्याभिसरेद्यदि ॥ ७८ ॥
मदस्खलितसंलापा विभ्रमोत्फुल्ललोचना ।
आविद्धगतिसंचारा स्यात्प्रेष्याभिसरेद्यदि ॥ ७९ ॥

तत्राद्ये 'उत्क्षिप्तं–'इत्यादि (१२० पृ.) । अनयोरूह्यमुदाहरणम् ।

प्रसङ्गादभिसारस्थानानि कथ्यन्ते—

क्षेत्रं वाटी भग्नदेवालयो दूतीगृहं वनम् ।
मालापञ्चः श्मशानं च नद्यादीनां तटी तथा ॥ ८० ॥

तम् [illegible] । एतेन तयो [illegible] शब्दप्रतिरोधः । प्रतिपादित [illegible] । तिमिरमेव अवगुण्ठनपट [illegible] आच्छादनवस्त्रं तस्य क्षेपं [illegible] ॥ [illegible]—

संलीनेति । गात्रेषु [illegible] । [illegible] । अवगुण्ठनेन [illegible] संवीता [illegible] । [illegible] । [illegible] संवीता । [illegible] [illegible] । [illegible] । [illegible]—'[illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] ।', '[illegible] [illegible] । [illegible] [illegible] ॥' आविद्ध [illegible] । '[illegible]' [illegible] [illegible] । आद्ये [illegible] । अनयो[illegible] । [illegible] । यथा [illegible]—'[illegible] [illegible] ।', '[illegible] । [illegible] [illegible] ।' [illegible] '[illegible]' [illegible] '[illegible]' [illegible]

[illegible]

'तव कितव किमाहितैर्वृथा नः क्षितिरुहपल्लवपुष्पकर्णपूरैः ।
ननु जनविदितैर्भवद्व्यलीकैश्चिरपरिपूरितमेव कर्णयुग्मम् ॥'
'मुहुरुपहसितामिवालिनादैर्वितरसि नः कलिकां किमर्थमेनाम् ।
वसतिमुपगतेन धाम्नि तस्याः शठ कलिरेष महांस्त्वयाद्य दत्तः ॥'
'इति गदितवती रुषा जघान स्फुरितमनोरमपक्ष्मकेसरेण ।
श्रवणनियमितेन कान्तमन्या सममसिताम्बुरुहेण चक्षुषा च ॥'

इयं हि वक्रोक्त्या परुषवचनेन कर्णोत्पलताडनेन च धीरमध्यताधीरमध्यताधीरप्रगल्भताभिः संकीर्णा । एवमन्यत्राप्यूह्यम् ।

इतरा[1] अप्यसंख्यास्ता[2] नोक्ता विस्तरशङ्कया ॥ ८८ ॥

ता नायिकाः ।

पिबति पाति वेति व्युत्पत्तिद्वयेन सैव विटपा अयमपि विटप इति तुल्ययोर्योगो योग्यो भवतीत्यर्थः । भवद्व्यलीकैर्भवतोऽप्रियवचनैः । स्फुरितो मनोरमः पक्ष्मवत्केसरो यस्य तेन । चक्षुः पक्षे—पक्ष्मैव केसरो यस्य तेन । **वक्रोक्त्येति** । विटशब्दस्य नानार्थकल्पनाविचित्रोक्त्येत्यर्थः ॥ **इतरा** अपि पद्मिनीहस्तिनीप्रभृतयः ॥

अमुं विटान्पातीति विटपं पल्लवम् । 'विटपः पल्लवे पिङ्गे' इति विश्वः । ददस्व प्रयच्छ । व्रज गच्छ । यतो दानाच्चिराय सदृशोरनुरूपयोर्योगो भवतु । उभयोरपि विटपत्वादिति भावः ॥ हे कितव धूर्त, वृथा व्यर्थमेवाहितैः । तत्कार्यस्यान्यथासिद्धत्वादिति भावः । तव सबन्धिभिः क्षितिरुहाणां पल्लवाः पुष्पाणि च तान्येव कर्णं पूरयन्तीति कर्णपूराः कर्णावतंसाः । तैर्नोऽस्माकं किं तत्साध्यम् । न किंचिदस्तीत्यर्थः । ननु अद्धा, जनविदितैर्भवद्व्यलीकैस्तवाप्रियवचनैः कर्णयुग्मं चिरपरिपूरितं नित्यं पूर्णमेव । अतः पूरितस्य पूरणायोगादलमेभिरिति ॥ अलिनादैर्मुहुरुपहसितां प्रतारणार्थेति प्रहस्यमानामिव स्थितामेनां कलिकां कोरकम्, अन्यत्र कलिं कलहं च । 'कलहे च युगे कलिः' इति **वैजयन्ती** । स्त्रीप्रत्ययस्त्वविवक्षितः श्लेषे । नः अस्माकं किमर्थं वितरसि । हे शठ गूढविप्रियकारिन्, तस्याः त्वत्प्रियाया धाम्नि भवने वसतिं स्थितिमुपगतेन त्वया अद्यैव वर्तमानो महान् कलिः कलहो दत्तः । स्वदत्त एव महति कलौ स्थिते किं कल्यन्तरेणेत्यर्थः ॥ इति गदितवती उक्तवती अन्या स्त्री रुषा कान्तं स्फुरितान्युज्ज्वलानि मनोरमाणि च पक्ष्माणीव केसराणि । अन्यत्र केसराणीव पक्ष्माणि, यस्य तेन श्रवणे नियमितेन श्रोत्रे निरुद्धेन असिताम्बुरुहेण नीलोत्पलेन चक्षुषा च समं युगपज्जघान ताडयामासेति ॥

1. **इतरा इति** । तथा चोक्तम्—'पुनश्च त्रिधा ज्ञेया दिव्यादिव्योभयात्मना । चतुर्धा चोद्धतोदात्ता ललिता शान्तिका तथा ॥ अक्षता च क्षता यातायाता यायावरेत्यपि ।

---

१ अयं श्लोकः क-ग-घ पुस्तके नास्ति, २ 'इतरा–' इति कारिकार्धं नास्ति ग पुस्तके.

अथ विव्वोकः—

विव्वोकस्त्वतिगर्वेण वस्तुनीष्टेऽप्यनादरः ॥ १०० ॥

यथा—

'यासां सत्यपि सद्गुणानुसरणे दोषानुवृत्तिः परा,
याः प्राणान्वरमर्पयन्ति, न पुनः संपूर्णदृष्टिं प्रिये ।
अत्यन्ताभिमतेऽपि वस्तुनि विधिर्यासां निषेधात्मक-
स्तास्त्रैलोक्यविलक्षणप्रकृतयो वामाः प्रसीदन्तु ते ॥'

अथ किलकिञ्चितम्—

स्मितशुष्करुदितहसितत्रासक्रोधश्रमादीनाम् ।
सांकर्यं किलकिञ्चितमभीष्टतमसंगमादिजाद्धर्षात् ॥ १०१ ॥

यथा—

'पाणिरोधमविरोधितवाञ्छं भर्त्सनाश्च मधुरस्मितगर्भाः ।
कामिनः स्म कुरुते करभोरूर्हारि शुष्करुदितं च सुखेऽपि ॥'

यासामिति । कंचित्कामिनं प्रति सखीवचनमिदम् । सद्गुणानुसरणे [illegible] दोषाणामनुवृत्तिः सैव पुनःपुनरनुवर्तनम् ॥ सांकर्यं मेलनम् ॥ पाणिरोधं करक्षेपणादिप्रतिबन्धम् [illegible] । हारि मनोहरम् । [illegible]

1. प्राणानिति । [illegible] ।
2. वस्तुनीति । [illegible] ॥
3. वामा इति । [illegible]

अथ विलासः—

यानस्थानासनादीनां मुखनेत्रादिकर्मणाम् ॥ ९९ ॥
विशेषस्तु विलासः स्यादिष्टसंदर्शनादिना ।

यथा—

'अत्रान्तरे किमपि वाग्विभवातिवृत्त-
वैचित्र्यमुल्लसितविभ्रममायताक्ष्याः ।
तद्भूरिसात्त्विकविकारमपास्तधैर्य-
माचार्यकं विजयि मान्मथमाविरासीत् ॥'

अथ विच्छित्तिः—

स्तोकाप्याकल्परचना विच्छित्तिः कान्तिपोषकृत् ।

यथा—

'स्वच्छाम्भःस्नपनविधौतमङ्गमोष्ठ-
स्ताम्बूलद्युतिविशदो विलासिनीनाम् ।
वासस्तु प्रतनु विविक्तमस्त्वितीया-
नाकल्पो यदि कुसुमेषुणा न शून्यः ॥'

जूटो यस्या अस्तीति ॥ **अत्रान्तरे** नायकसंदर्शनादिसमये । वाग्विभवमतिक्रम्य स्थितं वैचित्र्यं गमनादिचातुरी यस्मात्तत् । ते प्रसिद्धा भूरिसात्त्विकविकाराः स्तम्भादयो यस्मात्तत् । आचार्यकमुपाध्यायकर्म । उपदेश इत्यर्थः ॥ **स्तोका** अल्पा आकल्परचना वेषविन्यासः । **प्रतनु** अतिसूक्ष्मम् । **विविक्तं** निर्मलम् ॥

महाकुलोत्पन्ना, कुलं स्वामिकुलमपि च निष्कलङ्कम् । अयं मदक्षणो जनः न तेन स्थिरः, जीवितं च न स्थिरम् । अचिरावस्थायिनः शरीरस्य कृते मातृपितृभर्तृकुलकलङ्कनमतितरामनुचितमिति भावः ॥

1. इतीति । इत्थंरूपः स्यात् एतावानेव विलासिनीनामाकल्पो नेपथ्यमस्तु । निरन्तरमित्यर्थः । यदि स कुसुमेषुणा कामेन शून्यो न स्यात् । अन्यथा उक्तिविनानालंकारभूषणादि सम्पादनं व्यर्थमेवेति भावः ॥

---

१. '[illegible] विलासः [illegible]' इति ग. २. 'स्तोकस्याप्याकल्प[illegible]' इति ग. ३ '[illegible]' इति ग.

अथ विब्बोकः—

बिब्बोकस्त्वतिगर्वेण वस्तुनीष्टेऽप्यनादरः ॥ १०० ॥

यथा—

'यासां सत्यपि सद्गुणानुसरणे दोषानुवृत्तिः परा,
याः प्राणान्वरमर्पयन्ति, न पुनः सपूर्णदृष्टिं प्रिये ।
अत्यन्ताभिमतेऽपि वस्तुनि विधिर्यासां निषेधात्मक-
स्तास्त्रैलोक्यविलक्षणप्रकृतयो वामाः प्रसीदन्तु ते ॥'

अथ किलकिञ्चितम्—

स्मितशुष्करुदितहसितत्रासक्रोधश्रमादीनाम् ।
सांकर्यं किलकिञ्चितमभीष्टतमसंगमादिजाद्धर्षात् ॥ १०१ ॥

यथा—

'पाणिरोधमविरोधितवाञ्छं भर्त्सनाश्च मधुरस्मितगर्भाः ।
कामिनः स कुरुते करभोरूर्हारि शुष्करुदितं च सुखेऽपि ॥'

यासामिति । कंचित्कामिनं प्रति सख्युराशीर्वचनमिदम् । सद्गुणानामनुसरणे परै-रुद्भावने दोषाणामनुवृत्तिः स्वयं पुनः पुनरुद्भावनम् ॥ **सांकर्यं** मेलनम् ॥ **पाणि-रोधं** वस्त्रक्षेपणादिप्रवृत्तनायककरप्रतिबन्धम् । हारि मनोहरम् । कारणं विना रुदितं

---

1. प्राणानिति । मानग्रहग्रस्तत्वात्प्राणार्पणं तावत्सुकरम्, न पुनः सपूर्णदृष्ट्यर्पणम् ॥

2. वस्तुनीति । नीवीस्तनादिरूपे ॥

3. वामा इति । वामा योषितः । इष्टेपि वस्तुनि अनिष्टोद्भावनं विलक्षणप्रकृतित्वे बीजम् ।

4. पाणीति । करभोरूः स्त्री अविरोधितवाञ्छमनिवारितप्रियमनोरथं यथा तथा का-मिनः पाणिरोधं नीवीमोक्षणे व्यापृतस्य प्रियपाणेर्निवारणं कुरुते स्म । तथा मधुरं स्मितं गर्भे अन्तर्वर्ति यासु ता मन्दहासमिश्रा भर्त्सनास्तर्जनाश्च कुरुते स्म । तथा सुखेऽपि अधरपीड-

---

१ 'गर्वाभिमानादिष्टेऽपि बिब्बोकोऽनादरक्रिया ।' तथा वात्स्यायने—'ज्ञानार्थस्यानि[illegible] [illegible]-न्नवधीरणम् । ताडनं वा वन्दनेन [illegible] [illegible] ॥ [illegible] [illegible] ज्ञानकृ[illegible] इति । दन्तक्षतिनखैश्चाधरोरन्यानेऽपि [illegible] ॥ [illegible] [illegible]क्रीडनकाले । बिब्बोकस्य [illegible] हाव [illegible] ॥ अभिनवगुप्तस्त्वत्र [illegible] [illegible]नादरत्वम् । [illegible] [illegible] वचन (न) ताडनमानिधादि बिब्बोक ॥' अवधीरणे यथा का[illegible]—'[illegible] [illegible] [illegible] च [illegible]वधीरणा । [illegible] [illegible] [illegible] [illegible]हेतुकम् ॥' इति ग २ 'यासा—' इति श्लोको नास्ति ग-पुस्तके. ३. '[illegible] [illegible] [illegible] [illegible] ।' इति ग ४ '[illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] ॥' इति ग.

यथा—

'वृद्धोऽन्धः पतिरेष मञ्चकगतः, स्थूणावशेषं गृहं,
कालोऽभ्यर्णजलागमः, कुशलिनी वत्सस्य[1] वार्तापि नो ।
यत्नात्सञ्चिततैलबिन्दुघटिका भग्नेति पर्याकुला
दृष्ट्वा गर्भभरालसां निजवधूं[2] श्वश्रूश्चिरं रोदिति ॥'

अथ श्रमः—

खेदो रत्यध्वगत्यादेः श्वासनिद्रादिकृच्छ्रमः[3] ।

यथा—

'सद्यः[2] पुरीपरिसरेऽपि शिरीषमृद्वी
सीता जवात्त्रिचतुराणि पदानि गत्वा ।
गन्तव्यमस्ति कियदित्यसकृद्ब्रुवाणा
रामाश्रुणः कृतवती प्रथमावतारम्[4] ॥'

अथ मदः—

संमोहानन्दसंभेदो मदो[5] मद्योपयोगजः ॥ १४६ ॥

स्थूणा स्तम्भः । अभ्यर्णजलागमो निकटस्थवर्षासमयः । तैलबिन्दूनां घटिका क्षुद्रभाजनम् ॥ **सद्य इति** । वारंवारं गन्तव्याध्वपरिमाणजिज्ञासया सीताया स्वल्पपथलङ्घनश्रममवधार्य श्रीरामस्य रोदनम् ॥ **संमोहानन्दयोः** संभेदो मेलकः ।

---

1. **वत्सस्येति** । वत्सस्य पुत्रस्य ॥

2. **निजवधूमिति** । निजवधूं आत्मस्नुषाम् ॥

3. **श्रम इति** । बहुतरशारीरव्यापारजन्मा निःश्वासाङ्गसमर्दनिद्रादिकारणीभूतः खेदविशेषः श्रम इति । यदाहुः—'अध्वव्यायामसेवाद्यैर्विभावैरनुभावकैः । गात्रसंवाहनैरास्यसंकोचैरङ्गमोटनैः ॥ निःश्वासैर्जृम्भितैर्मन्दैः पादोत्क्षेपैः श्रमो मतः ॥' इति । अयं च सत्यपि बले जायते, शारीरव्यापारादेव च जायते न तु ग्लानिः । अतो ग्लानिः श्रमस्य भेदः ॥

4. **प्रथमेति** । प्रथमावतारः पूर्वाविष्करणम् ॥

5. **मद इति** । मद्याद्युपयोगजन्मा उल्लासाख्यः शयनहसितादिहेतुश्चित्तवृत्तिविशेषो

---

१ '—श्रमः खेदादिकारकः रताध्वमार्गगमनादेश्च यः खेदः स श्रमः खेदमर्दनाद्यनुभावजनकः ।' इति ग. २ 'यथा' ग-पुस्तके नास्ति ३ ग-पुस्तके तु 'सद्य' इति श्लोकस्य स्थाने 'अइ पिहुलं घेत्तूण समागदम्हि सहि तुरिअम् । समसेअसलिलणीसासणीसहा वीसमानि खणम् ॥' इति ४ 'च' घ ५ 'हर्षोत्कर्षो मदः पानात्स्खलदङ्गवचोगतिः । मद्यादिपानाद्यो हर्षोत्कर्षवचनगत्यादिस्खलनानुमापकः ।' इति ग.

अमुना चोत्तमः शेते, मध्यो हसति गायति ।
अधमप्रकृतिश्चापि परुषं वक्ति रोदिति ॥ १४७ ॥

यथा—

'[1]प्रातिभं त्रिसरकेण गतानां वक्रवाक्यरचनारमणीयः ।
गूढसूचितरहस्यसहासः सुभ्रुवां प्रववृते परिहासः ॥'

[2]अथ जडता—

अप्रतिपत्तिर्जडता स्यादिष्टानिष्टदर्शनश्रुतिभिः ।
अनिमिषनयननिरीक्षणतूष्णींभावादयस्तत्र ॥ १४८ ॥

[3]यथा मम कुवलयाश्वचरिते प्राकृतकाव्ये—

'णवरिअ तं जुअजुअलं अण्णोण्णं णिहिदसजलमन्थरदिट्ठिं ।

मद्यस्यानवस्य उपयोगाद् भक्षणाज्जात । **अमुना** मदेन ॥ **प्रातिभं** प्रागल्भ्यम् । त्रिसरकेण मद्येन । गूढं सूचितं रहस्य यत्र स चासौ हासश्चेति ॥ **अप्रतिपत्तिः** कर्तव्यानिश्चयः । तूष्णींभावो मौनम् । तत्र जडतायाम् ॥ **णवरिअ**

मद इति । तत्रोत्तमे पुरुषे स्वापोऽनुभावः । मध्यमे हसितगाने । अधमे तु रोदनपरुषोक्त्यादि । अयं च मदस्त्रिविधः । तरुणमध्यमाधमभेदात् । अव्यक्तालुलितवाक्यैः सुकुमारस्खलद्गत्या च योऽभिनीयते स आद्यः । भुजाक्षेपस्खलितघूर्णितादिभिर्मध्यमः । गतिभङ्गस्मृतिनाशहिक्काछर्द्यादिभिरधमः । प्रदीपे तु 'उत्तमसत्त्वः प्रहसति गायति तद्वच्च मध्यमप्रकृतिः । परुषवचनाभिधायी शेते रोदित्यधमसत्त्वः ॥' इति व्यत्यासोऽस्ति ॥

1. प्रातिभमिति । मदानुभाववर्णनमिदम् । त्रयाणां सरकाणां समाहारस्त्रिसरकं त्रिवारमधुपानम् । 'सरकः शीधुपात्रे स्याच्छीधुपाने च शीधुनि ।' इति विश्वः । तेन त्रिसरकेण[4]। 'त्रिपानं मदाभिव्यक्तिः' इति पानप्रसिद्धिः । प्रतिभैव प्रातिभं प्रतिभाविशेषः । तत्प्रातिभं गतानां त्रिवारमधुपानोत्कटमदोद्भूतप्रागल्भ्यभाजां सुभ्रुवां वक्रवाक्यरचनारमणीयः वक्रोक्तिशोभनः । गूढानि पूर्वं लज्जया गुप्तानि, सूचितानि सम्प्रति मदेन प्रकाशितानि रहस्यानि [illegible]चेष्टाप्रकटितानि यस्मिन् स गूढसूचितरहस्यः, स चासौ हासश्चेति विशेषणसमासः । प्रववृते प्रवृत्तः ॥

2. जडतेति । चिन्तोत्कण्ठाभयविरहेष्टानिष्टदर्शनश्रवणादिजन्यावश्यकर्तव्यार्थानुसंधानविकला चित्तवृत्तिर्जडता । इयं च मोहात्पूर्वं परतश्च जायते । यदाहुः—'कार्याविवेको जडता पश्यतः शृण्वतोऽपि वा । तद्विभावाः प्रियानिष्टदर्शनश्रवणे रुजा ॥ अनुभावास्त्वमी तूष्णींभावविस्मरणादयः । सा पूर्वं परतो वा स्यान्मोहादिति विदां मतम् ॥' इति ॥

3. यथेति । स्पष्टमिदम् । [illegible]—'[illegible] चतुष्क-

---

1. 'मद इत्यत्र' इति नास्ति क्वचित्. 2. 'यथा—' इत्यादिर्ग्रन्थो नास्ति क्वचित्.

आलेक्खओपिअं विअ खणमेत्तं तत्थ संट्ठिअं मुअसण्णं ॥'

अथोग्रता[1]—

शौर्यापराधादिभवं भवेच्चण्डत्वमुग्रता[1] ।
तत्र स्वेदशिरःकम्पतर्जनाताडनादयः ॥ १४९ ॥

यथा—

'प्रणयिसखीसलीलपरिहासरसाधिगतै-
र्ललितशिरीषपुष्पहननैरपि ताम्यति यत् ।
वपुषि वधाय तत्र तव शस्त्रमुपक्षिपतः
पततु शिरस्यकाण्डयमदण्ड इवैष भुजः ॥'

अथ मोहः—

मोहो[2] विचित्तता[1]भीतिदुःखावेगानुचिन्तनैः ।
मूर्च्छनाज्ञानपतनभ्रमणादर्शनादिकृत् ॥ १५० ॥

यथा—

'तीव्राभिषङ्गप्रभवेण वृत्तिं मोहेन संस्तम्भयतेन्द्रियाणाम् ।

इति । 'केवलं तद्युवयुगलमन्योन्य निहितसजलमन्थरदृष्टि । आलेख्यार्पितमिव क्षणमात्रं तत्र संस्थितं मुक्तसञ्ज्ञम् ॥' इति संस्कृतम् । णवरिअशब्द केवलार्थे देशी ॥ चण्डत्वमत्यन्तासहिष्णुत्वम् । प्रणयिनी या सखी तस्याः परिहासरसेनाधिगतैः प्राप्तैः । **अकाण्डयमदण्ड इति** । अकालयमदण्ड इत्यर्थः । अत्र मालतीशरीरे शस्त्रप्रहारं कुर्वतोऽघोरघण्टस्यापराधेन माधवस्य चण्डत्वमेतादृशोक्त्या व्यज्यते ॥ चित्तस्य निमीलनत्वं **विचित्तता** । सुषुप्तिवारणायाह—**भीतीति** । आवेगः सम्भ्रमः । **अनुचिन्तनमत्यन्तचिन्ता** । **अदर्शनमज्ञानम्** ॥ **अभिषङ्ग**

ल्गनाटकेनार्धं स्यात् । तत्तन्यनग्रिमदल भवति चतुःषष्टिमात्रकशरीरमिदम् ॥' इति दामोदरमिश्राः ॥

1. **उग्रतेति** । अधिक्षेपापमानादिप्रभवा किमस्य करोमीत्याद्याकारा चित्तवृत्तिरुग्रता । यदाहुः—'नृपापराधोऽसद्दोषकीर्तनं चोरधारणम् । विभावाः स्युरथो बन्धो वधस्ताडनभर्त्सने ॥ एते यत्रानुभावास्तदौग्र्यं निर्दयतात्मकम् ॥'

2. **मोह इति** । भयवियोगादिप्रयोज्या वस्तुतत्त्वानवधारिणी चित्तवृत्तिर्मोहः । 'अतत्त्वावगाहिनी चित्तवृत्तिः' इति तु नव्याः ॥

---

१. 'अथोग्रता' इति नास्ति ग पुस्तके. २ [illegible] ३ [illegible] इति ग.

अज्ञातभर्तृव्यसना मुहूर्तं कृतोपकारेव रतिर्बभूव ॥'

अथ विबोधः—

निद्रापगमहेतुभ्यो [1]विबोधश्चेतनागमः ।
जृम्भाङ्गभङ्गनयनमीलनाङ्गावलोककृत् ॥ १५१ ॥

यथा—

'चिररतिपरिखेदप्राप्तनिद्रासुखानां
चरममपि शयित्वा पूर्वमेव प्रबुद्धाः ।
अपरिचलितगात्राः कुर्वते न प्रियाणा-
मशिथिलभुजचक्राश्लेषभेदं तरुण्यः ॥'

अथ स्वप्नः—

स्वप्नो निद्रामुपेतस्य विषयानुभवस्तु यः ।

कोपावेगभयग्लानिमुखदुःखादिकारकः ॥ १५२ ॥

यथा—

'मामाकाशप्रणिहितभुजं निर्दयाश्लेषहेतो-
लब्धायास्ते कथमपि मया स्वप्नसंदर्शनेन ।
पश्यन्तीना न खलु बहुशो न स्थलीदेवतानां
मुक्तास्थूलास्तरुकिसलयेष्वश्रुलेशाः पतन्ति ॥'

अथापस्मारः—

मनःक्षेपस्त्वपस्मारो ग्रहाद्यावेशनादिजः ।
भूपातकम्पप्रस्वेदफेनलालादिकारकः ॥ १५३ ॥

'आश्लिष्टभूमिं रसितारमुच्चैर्लोलद्भुजाकारबृहत्तरङ्गम् ।
फेनायमानं पतिमापगानामसावपस्मारिणमाशशङ्के ॥'

अथ गर्वः—

गर्वो मदः प्रभावश्रीविद्यासत्कुलतादिजः ।
अवज्ञासविलासाङ्गदर्शनाविनयादिकृत् ॥ १५४ ॥

तत्र शौर्यगर्वो यथा—

'धृतायुधो यावदहं तावदन्यैः किमायुधैः ।
यद्वा न सिद्धमस्त्रेण मम तत्केन साध्यताम् ॥'

भुजाक्षेपं कर्तुमर्हतीति । अस्य निद्राभङ्गो नोचित इति भाव ॥ **मामिति** । यक्षस्य मेघं प्रति प्रियार्थं वाचनिकार्पणमिदम् । मा यक्षम् । कथमपि महता कष्टेन । मुक्ता इव स्थूला ॥ **मनःक्षेप इति** । मनसो नाडीविशेषनिवेशेन घूर्णनमित्यर्थ. । ग्रहादीत्यादिना भूतादिपरिग्रह । मध्यमादिपदेन धातुवैषम्यादिपरिग्रह· ॥ **फेनायमानं** फेनमुद्वमन्तम् । असौ श्रीकृष्ण. आशशङ्के ज्ञातवान् ॥ **मद**श्चित्तविकारविशेष. । राज्ञ कोशदण्डादिजन्य. प्रताप· **प्रभावः** । श्रीत्रि-

1. **मामिति** । मया कथमपि स्वप्नमदर्शनेन लब्धायाः ते तव निर्दयाश्लेषहेतोः गाढालिङ्गनार्थम् आकाशप्रणिहितभुज शून्यार्पितबाहु मा पश्यन्तीना स्थलीदेवताना वनदेवताना

१. 'मात्सर्यमयकोपादेरुभावस्य कारणम् । निद्राणस्यापि विषयज्ञान स्वप्न· । मात्सर्यानुभाव· रेनु । इति ग. २ 'भूयश्चाह त्वमपि शयने कण्ठलग्ना पुरा मे–'इत्युदाहरणान्तरं ग पुस्तके ३ 'आवेशो ग्रहदुःखाद्यैरपस्मारः स्मृतो बुधैः । घुर्घुरध्वनिभूपातफेनाक्रान्दोलनादिकृत् ॥' इति ग ४. 'लोलद्' ग ५ 'मोद्धत्यदर्शनावज्ञासहेलागोरनादिकृत् । प्रभावादिजन्यो मदो गर्व । आदि शब्दाद्दारण्यसौमाग्यादिः । स चाविनयाद्यनुभावहेतु ।' इति ग. ६. 'यथा' क घ. ७ अस्मादग्रे 'नानन्यदप्यूह्यम्' इत्यधिकं ग-पुस्तके

अथ मरणम्—

शराद्यैर्मरणं जीवत्यागोऽङ्गपतनादिकृत् ।

यथा—

'राममन्मथशरेण ताडिता दुःसहेन हृदये निशाचरी ।
गन्धवद्रुधिरचन्दनोक्षिता जीवितेशवसतिं जगाम सा ॥'

अथालस्यम्—

आलस्यं श्रमगर्भाद्यैर्जाड्यं जृम्भासितादिकृत् ॥ १५५ ॥

वर्गसपत्ति. । अवज्ञा परस्मिन् ॥ अन्यैर्मद्धृतायुधनिचे ॥ रामेति । सा निशाचरी ताडका राक्षसी, सैव निशाचरी अभिसारिका नायिका । राम एव मन्मथ तस्य शरेण हृदये वक्षसि मनसि च ताडिता सती जीवितेशो यम एव जीवितेश· प्रिय तस्य वसतिं जगाम । कीदृशी । गन्धवद्रुधिरमेव चन्दनं तेनोक्षिता लिप्ता ॥ 'जाड्यम्' इत्यत्र क्वापि 'जडत्वम्' इति पाठ । स न सम्यक् असङ्गतार्थापत्ते ।

मुक्तास्थूला अश्रुलेशा नयनोदबिन्दवः तरुकिसलयेषु बहुशः न खलु न पतन्ति । अपि तु पतन्त्येव । एवंविध मानवलोक्य वनदेवता अपि रुदन्तीति भावः ॥

1. शरेति । अत्र विशेषमाह रसगङ्गाधरकारः 'रोगादिजन्या मूर्च्छारूपा मरणप्रागवस्था मरणम् । न चात्र प्राणवियोगात्मकं मुख्यं मरणमुचितं ग्रहीतुम् । चित्तवृत्त्यात्मकेषु भावेषु तस्याप्रसक्तेः । भावेषु च सर्वेषु कार्यतरवर्तितया शरीरप्राणयोगस्य हेतुत्वात् । उदाहरणम्—'दयितस्य गुणाननुस्मरन्ती शयने सम्प्रति या विलोकितासीत् । अधुना खलु [illegible] सा कृशाङ्गी गिरमङ्गीकुरुते न भाषितापि ॥' प्रियविरहोऽत्र विभावः । वचननिरासोऽनुभावः । [illegible] भावः [illegible] । [illegible] अत्र च भावः [illegible] विप्रलम्भस्य, अन्यथा तु करुणस्य पोषक इति विवेकः । [illegible] वर्णयन्ति । [illegible]' इति । प्राचीनैस्तूक्तम्—'[illegible] परेतीविरह । [illegible] ॥' इति ॥

2. आलस्यमिति । [illegible] । अत्र च [illegible] । [illegible] ॥

---

1 [illegible] 2. [illegible]
3. [illegible] 4. [illegible] 5. [illegible]
[illegible]

अथ मतिः—

नीतिमार्गानुसृत्यादेरर्थनिर्धारणं मतिः ।
स्मेरता धृतिसंतोषौ बहुमानश्च तद्भवाः ॥ १६३ ॥

यथा—

'असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः ।
सतां हि संदेहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः ॥'

अथ व्याधिः—

व्याधिर्ज्वरादिर्वाताद्यैर्भूमीच्छोत्कम्पनादिकृत् ।

तत्र दाहमयत्वे भूमीच्छादयः । शैत्यमयत्वे उत्कम्पनादयः । स्पष्टमुदाहरणम् ।

अथ त्रासः—

निर्घातविद्युदुल्काद्यैस्त्रासः कम्पादिकारकः ॥ १६४ ॥

पुनः स्मितयुक्तं वदनं स्मरामीत्यर्थः ॥ **नीतिमार्गो** नीतिशास्त्रं तस्यानुसृतिरनुगमः । आदिना अनुमानादेर्ग्रहणम् । **निर्धारणं** निश्चयः ॥ **असंशय**मिति । शकुन्तलामालोक्य दुष्यन्तस्यानुमानमिदम् । क्षत्रपरिग्रहक्षमा क्षत्रियविवाहोचिता । 'इयम्' इति शेषः । अस्यां शकुन्तलायाम् । समर्थयति—**सता**मिति । प्रमाणं निश्चयबीजम् । अन्तःकरणस्य मनसः प्रवृत्तयः सङ्कल्पादयः ॥ **वाताद्यै**रिति । आद्यपदेन पित्तश्लेष्मणोर्ग्रहणम् । भूमीच्छा भूमिपतनेच्छा । तत्र व्याध्युदाहरणं यथा मम—'प्रियजनपरिपश्लाद्वेपमाना कृशाङ्गी शिथिलतनुलतां स्वेदसंसिक्तगात्रीम् । विपुलपुलककलेवरामाकलय्य ज्वरार्तां दुमतिरभिनवनगरे निर्भमन ॥' **निर्घात** इति । 'यदान्तरिक्षे बलवान्मारुतो मरुता

यथा—

'परिस्फुरन्मीनविघट्टितोरवः सुराङ्गनास्त्रासविलोलदृष्टयः ।
उपाययुः कम्पितपाणिपल्लवाः सखीजनस्यापि विलोकनीयताम् ॥'

अथ व्रीडा—

धार्ष्ट्याभावो व्रीडा वदनानमनादिकृद्दुराचारात् ।

यथा—'मयि सकपटं—' इत्यादि (१५७ पृ.) ।

अथ हर्षः—

हर्षस्त्विष्टावाप्तेर्मनःप्रसादोऽश्रुगद्गदादिकरः ॥ १६५ ॥

हत. । पतत्यध स निर्घातो जायते वायुसंभव ॥' इत्युक्तलक्षणो निर्घात । 'बृहच्छिखा च सूक्ष्माग्रा रक्तनीलशिखोज्ज्वला । पौरुषी च प्रमाणेन उल्का नानाविधा स्मृता ॥' इत्युक्तलक्षणा चोल्का । आद्यपदेन भूकम्पादेर्ग्रहणम् । अत्र 'मन क्षोभ ' इति पूरणीयम् ॥ **परिस्फुरदिति** । जलविहारवर्णनमिदम् । अपिना नायकस्य

---

1. **परीति** । परितः स्फुरद्भिर्विवर्तमानैर्मीनैर्विघट्टिता ऊरवो यासां ताः [illegible] त्रासविलोलदृष्टयः कम्पितपाणिपल्लवाश्च सुराङ्गना सखीजनस्यापि विलोकनीयताम् उपाययुः । किमुत प्रियजनस्येति भाव. ॥

2. **व्रीडेति** । स्त्रीणां पुरुषमुखावलोकनादेः पुंसां च प्रतिज्ञाभङ्ग[illegible] वैवर्ण्याधोमुखत्वादिकारणीभूतश्चित्तवृत्तिविशेषो व्रीडा । केचित्तु—'[illegible] व्रीडा [illegible] ।' इत्याहुः । [illegible] ॥

3. **हर्ष इति** । [illegible] सुखविशेषो हर्षः । [illegible]—'[illegible] प्रसादः प्रियसंगम. । [illegible] ॥ [illegible] यत्र जायते । [illegible] ॥ [illegible] ।' इति ॥

[illegible]

तत्र भर्त्सनपारुष्यस्वच्छन्दाचरणादयः ॥ १६९ ॥

यथा—

'अन्यासु तावदुपमर्दसहासु भृङ्ग
लोल विनोदय मनः सुमनोलतासु ।
मुग्धामजातरजसं कलिकामकाले
व्यर्थं कदर्थयसि किं नवमालिकायाः ॥'

अथ ग्लानिः—

रत्यायासमनस्तापक्षुत्पिपासादिसंभवा ।
ग्लानिर्निष्प्राणताकम्पकार्श्यानुत्साहतादिकृत् ॥ १७० ॥

यथा—

'किसलयमिव मुग्धं बन्धनाद्विप्रलूनं
हृदयकुसुमशोषी दारुणो दीर्घशोकः ।
ग्लपयति परिपाण्डुक्षाममस्याः शरीरं
शरदिज इव घर्मः केतकीगर्भपत्रम् ॥'

अथ चिन्ता—

ध्यानं चिन्ता हितानाप्तेः शून्यताश्वासतापकृत् ।

मुष्मिकी' परलोकभवा । नीवारस्तृणधान्यम्, कृते निमित्तम् । साम्प्रतं वार्धके । अत्र तत्त्वज्ञानेन निःस्पृहत्वम् ॥ **अन्यास्विति** । मधुपानकालीनश्चरणप्रहारादिरुपमर्दः । पक्षे संभोगकालीनश्चुम्बनालिङ्गनादि । लोलं सतृष्णम् । मुग्धा कोमला सुरतमूढा च । रजः परागः आर्तवं च । अकाले मकरन्दाभावदशायां बाल्ये च । अत्रोपभोक्तरि बालाया अस्थैर्यं परुषवचनेन प्रतीयते ॥ **निष्प्राणता** असामर्थ्यम् ॥ **बन्धनात्** उत्पत्तिस्थनात् । निष्प्राणत्वानौजस्यसत्त्वसक्षयाणां बलहानिरूपत्वेऽपि

---

1. नवेति । सप्तलायाः 'सप्तला नवमालिका' इत्यमरः । 'नवमल्लिकायाः' इति पाठे तु मुग्धेत्यादिनैव नवत्वलाभे पुनर्मल्लिकाया नवत्वविशेषणं व्यर्थम् । नवा तुला माला अस्याः, कप् । इति **भानुजिद्दीक्षिताः** ॥

2. **चिन्तेति** । इष्टाप्राप्त्यनिष्टप्राप्त्यादिजनिता ध्यानापरपर्याया वैवर्ण्यभूलेखनाधोमुखत्वादिहेतुश्चित्तवृत्तिविशेषश्चिन्ता । यदाहु—'विभावा यत्र दारिद्र्यमैश्वर्यभ्रंशनं तथा ।

'उद्वेगास्थितिनैरस्यप्रमुखैरवबुध्यते ।' इति ग. २ 'नवमल्लिकायाः' इति क. ३ 'रत्याद्यायासनिनिष्प्राणता मता । अनुत्साहादौर्बल्यखेदाधैर्यक्तिमेति सा ॥' ग. ४ 'कार्श्य' घ. 'उन्मितनयनतारा क्षामचन्द्रद्युतिन्वा रजनय इव निद्राक्लान्तनीलोत्पलाक्ष्य । तिमिरमिव दधाना केशपाशानवनिपतिगृहेभ्यो यान्त्यमूर्वारवध्व ॥' इति ग.

तद्भेदानाह—

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगुप्सा विस्मयश्चेत्थमष्टौ प्रोक्ताः शमोऽपि च ॥ १७५ ॥

तत्र

रतिर्मनोनुकूलेऽर्थे मनसः प्रवणायितम् ।
वागादिवैकृतैश्चेतोविकासो हास इष्यते ॥ १७६ ॥
इष्टनाशादिभिश्चेतोवैक्लव्यं शोकशब्दभाक् ।
प्रतिकूलेषु तैक्ष्ण्यस्यावबोधः क्रोध इष्यते ॥ १७७ ॥
कार्यारम्भेषु संरम्भः स्थेयानुत्साह उच्यते ।
रौद्रशक्त्या तु जनितं चित्तवैक्लव्यदं भयम् ॥ १७८ ॥

त्वेन सबन्धी । तैर्भावैः पुष्यते रसरूपतां नीतः प्रवृद्धः क्रियते ॥ **तद्भेदान्** स्थायिभावान् । अष्टौ भावाः स्थायिभावाः । **शमोऽपि च** । स्थायिभाव इत्यर्थः ॥ **रतिरिति** । मनसोऽनुकूले प्रिये वस्तुनि प्रवणायितम् । प्रेमार्द्रं मनो रतिरित्यर्थः । तच्चोत्कटावेश एव पर्यवस्यति । स चानुराग एव सोऽपि प्रकृते सुरतेच्छारूप एव । केचित्तु—"स चानुराग एव सोऽपीष्टसाधनताज्ञानधारारूपः, अभिलाषहेतुत्वेनोक्तत्वात्" इत्याहुः । तन्न । सुरतेच्छाया आलम्बनप्राप्त्यभिलाषं प्रति हेतुत्वसंभवेन लक्षणाया अयोगात् । **चेतोविकास** उपहसनीयत्वेन ज्ञानसुखविकासरूपहास्यहेतुः । **चेतोवैक्लव्यं** दुःखम् । **तैक्ष्ण्यस्य** अपचिकीर्षाया अवबोध उत्कटत्वम् । **कार्यारम्भेषु** चानिकृष्टकार्येषु **संरम्भ** उत्कट आवेशः । केचित्तु—'संरम्भः सहर्षप्रवृत्तिः' इत्याहुः । तन्न । आद्यप्रवृत्तिरूपस्यारम्भस्य प्रवृत्त्यसंभवात्, वीररसे उत्कटावेशस्यैव स्थायित्वेनास्वाद्यमानत्वाच्च । **रौद्रशक्त्येति** । शस्त्रादेरनिष्टदर्श-

1. **रतिरिति** । रत्यादीनां विशदतरं लक्षणमभिहितं रसगङ्गाधरे—'स्त्रीपुंसयोरन्योन्यालम्बनः प्रेमाख्यश्चित्तवृत्तिविशेषो रतिः । गुरुदेवतापुत्राद्यालम्बनस्तु व्यभिचारी । वागङ्गादिविकारदर्शनजन्मा विकासाख्यो हासः । पुत्रादिवियोगमरणादिजन्मा वैक्लव्याख्यश्चित्तवृत्तिविशेषः शोकः । गुरुबन्धुवधादिपरमापराधजन्मा प्रज्वलनाख्यः क्रोधः । अयं च परविनाशादिहेतुः । क्षुद्रापराधजन्मा तु परवचनात्मापमानादिहेतुः । अयमेवामर्षाख्यो व्यभिचारीति विवेकः । परपराक्रमदानादिस्मृतिजन्मा औन्नत्याख्य उत्साहः । व्याघ्रदर्शनादिजन्मा परमानर्थविषयको वैक्लव्याख्यः स भयम् । परमानर्थविषयकत्वाभावे तु स एव त्रासो व्यभिचारी । अपरे तु—औत्पातिकमनःक्षोभस्त्रासः, स्वापराधोत्थं भयमिति भेदमाहुः । कदर्यवस्तुविलोकनजन्मा विचिकित्साख्यश्चित्तवृत्तिविशेषो जुगुप्सा । अलौकिकवस्तुदर्शनादिजन्मा आश्चर्याख्यो विस्मयः ॥

१. 'वैक्लव्य' ग. २. 'आदिदूष्या न चित्तविशेषेण क्रोध उच्यते ।' इति ग. ३ 'अवधानात्मिका कर्तुरुत्साहोऽध्यवसायिता । आर्तदर्शनं नीतिरासिद्धिदर्शनादिभिः ।' इति ग.

वान्ता । हासः पुनरुत्पद्यमानो व्यभिचार्येव । व्यभिचारिलक्षणयोगात् । तदुक्तम्—

'रसावस्थः परं भावः स्थायितां प्रतिपद्यते ।' इति ।

तत्कस्य स्थायिनः कस्मिन्रसे संचारित्वमित्याह—

शृङ्गारवीरयोर्हासो वीरे क्रोधस्तथा मतः ॥ १७२ ॥
शान्ते जुगुप्सा कथिता व्यभिचारितया पुनः ।
इत्याद्यन्यत्समुन्नेयं तथा भावितबुद्धिभिः ॥ १७३ ॥

अथ स्थायिभावः—

अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमाः ।
आस्वादाङ्कुरकन्दोऽसौ भावः स्थायीति संमतः ॥ १७४ ॥

यदुक्तम्—

'स्रक्सूत्रवृत्त्या भावानामन्येषामनुगामकः ।
न तिरोधीयते स्थायी तैरसौ पुष्यते परम् ॥' इति ।

[illegible] ॥ परमिति । [illegible] ॥ अक्षमा इति । 'आस्वा[illegible] ॥ स्रक्सूत्रवृत्त्या स्रक्सूत्रन्यायेन । अनुगामकः [illegible]

तद्भेदानाह—

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगुप्सा विस्मयश्चेत्थमष्टौ प्रोक्ताः शमोऽपि च ॥ १७५ ॥

तत्र

रतिर्मनोनुकूलेऽर्थे मनसः प्रवणायितम् ।
वागादिवैकृतैश्चेतोविकासो हास इष्यते ॥ १७६ ॥
इष्टनाशादिभिश्चेतोवैक्लव्यं शोकशब्दभाक् ।
प्रतिकूलेषु तैक्ष्ण्यस्यावबोधः क्रोध इष्यते ॥ १७७ ॥
कार्यारम्भेषु संरम्भः स्थेयानुत्साह उच्यते ।
रौद्रशक्त्या तु जनितं चित्तवैक्लव्यदं भयम् ॥ १७८ ॥

त्वेन सम्बन्धी । तैर्भावैः पुष्यते रसरूपतां नीतः प्रकृष्टः क्रियते ॥ तद्भेदान् स्थायिभावान् । अष्टौ भावाः स्थायिभावाः । शमोऽपि च । स्थायिभाव इत्यर्थः ॥ रतिरिति । मनसोऽनुकूले प्रिये वस्तुनि प्रवणायितम् । प्रेमार्द्रं मनो रतिरित्यर्थः । तच्चोत्कटावेश एव पर्यवस्यति । न चानुराग एव सोऽपि प्रकृते सुरतेच्छारूप एव । केचित्तु—"स चानुराग एव सोऽपीष्टसाधनताज्ञानधारारूपः, [illegible]त्वेनो-त्कटत्वात्" इत्याहुः । तन्न । सुरतेच्छाया आलम्बनप्राप्त्यभिलाषं प्रति हेतुत्वसम्भवेन लक्षणाया अयोगात् । चेतोविकासः [illegible] हेतुः । चेतोवैक्लव्यं दुःखम् । तैक्ष्ण्यस्य [illegible] । कार्यारम्भेषु [illegible] संरम्भ [illegible] । केचित्तु—'संरम्भः सहर्षप्रवृत्ति' रित्याहुः । तन्न । [illegible], [illegible] स्थायित्वेनास्वादनानर्हत्वात् । रौद्रशक्त्येति । [illegible]-

---

1. रतिरिति । रत्यादीनां [illegible] रसगङ्गाधरे—'[illegible] प्रेम[illegible] रतिः । [illegible] हासः । [illegible] शोकः । [illegible] क्रोधः । [illegible] उत्साहः । [illegible] भयम् । [illegible] जुगुप्सा । [illegible] विस्मयः ॥

---

१. [illegible]

तत्र

यत्र तु रतिः प्रकृष्टा नाभीष्टमुपैति विप्रलम्भोऽसौ ।

अभीष्टं नायकं नायिकां वा ।

स च पूर्वरागमानप्रवासकरुणात्मकश्चतुर्धा स्यात् ॥१८७॥

तत्र

श्रवणाद्दर्शनाद्वापि मिथः संरूढरागयोः ।

ग्रहणम् ॥ **तद्भेदौ** शृङ्गारभेदौ ॥ **तत्र** तयोर्मध्ये । विप्रलम्भमाह—**यत्रेति** । तुशब्दश्चार्थः । तत्र रसे प्रकृष्टा प्रकरणादिना प्रधानत्वं प्राप्ता रतिरस्ति । नायिका नायको वा अभीष्टं नायकं नायिका वा नोपैति नोपभुङ्क्ते असौ विप्रलम्भ इत्यर्थः । तथा चोपभोगाभावसवलितप्रकृष्टरतिविषयो रसो विप्रलम्भ इत्यर्थः । करुणादौ शोकोद्दीपनतया रतिसत्त्वेन तत्रातिव्याप्तिवारणाय प्रकृष्टेति । सभोगेऽतिव्याप्तिवारणाय उपभोगाभावेति । विप्रलम्भसमानविषयके ज्ञानान्तरे संस्कारे वा अतिव्याप्तिवारणाय रस इति । अन्ये तु—'यत्र तु रससंवलितत्वाद्रतिर्न प्रकृष्टा अभीष्टमुपैति विषयीकरोति स विप्रलम्भः' इति व्याकुर्वन्ति । तन्न । करुणेऽतिव्याप्तेः । यदि च 'यत्र' इत्यस्य 'शृङ्गारे' इति व्याकारात्करुणे नातिव्याप्तिरित्युच्यते तदा 'अभीष्टमुपैति' इत्यस्यानर्थक्यम् । अभीष्टविषयरतेरेव शृङ्गारत्वेन परिणामात् । अपरे तु—'नायिकादिभिरभीष्टं नोपैति न सगच्छते । तथा चाभीष्टविच्छेदसवलिता रतिर्यत्र स विप्रलम्भः' इत्याहुः । तन्न । प्रणयमानादावभीष्टविच्छेदाभावेनाव्याप्तेः । केचित्तु—"संयोग सुरससमितो विप्रलम्भस्तु तु गयुरः । रतिस्तयोः प्रकर्षः स्यादाविष्क्यात्सुगतु गयो ॥' इति दर्शनाद् दुःखसवलितरतिस्थायिभावको रसो विप्रलम्भः" इत्याहुः । तन्न । प्रणयमाने दुःखायोगादव्याप्तेः ॥ **स च** विप्रलम्भः चतुर्धा इतीदमुपलक्षणम् । विरहोऽपि वेदितव्यः । स च गुर्वादिपरतन्त्रत्वात् । संगमप्रतिरोधो यथा—'किं रुद्धः प्रियया—' इत्यादि (१२४ पृ॰) । अन्यथा

ग्रन्थे प्रथमः । वियोगकालावच्छिन्न वे [illegible] । संयोगश्च न [illegible] सामानाधिकरण्यम् । [illegible] विप्रलम्भस्यैव वर्णनात् । [illegible] वियोगेऽपि न वैदग्ध्यम् । [illegible] । तस्मादाविमौ संयोगवियोगाख्यावन्तःकरणवृत्तिभेदौ । [illegible] पौ । तत्रादो यथा—'[illegible] [illegible] निराशे ॥' इति । [illegible] यथा—'[illegible] [illegible] [illegible] ॥' इति [illegible] रसगङ्गाधरे ॥

दशाविशेषो योऽप्राप्तौ पूर्वरागः स उच्यते ॥ १८८ ॥
श्रवणं तु भवेत्तत्र दूतवन्दिसखीमुखात् ।
इन्द्रजाले च चित्रे च साक्षात्स्वप्ने च दर्शनम् ॥ १८९ ॥

अभिलाषश्चिन्तास्मृतिगुणकथनोद्वेगसंप्रलापाश्च ।
उन्मादोऽथ व्याधिर्जडता मृतिरिति दशात्र कामदशाः १९०

अभिलाषः स्पृहा चिन्ता प्राप्त्युपायादिचिन्तनम् ।
उन्मादश्चापरिच्छेदश्चेतनाचेतनेष्वपि ॥ १९१ ॥
अलक्ष्यवाक्प्रलापः स्याच्चेतसो भ्रमणाद्भृशम् ।
व्याधिस्तु दीर्घनिःश्वासपाण्डुताकृशतादयः ॥ १९२ ॥
जडता हीनचेष्टत्वमङ्गानां मनसस्तथा ।

शेषं स्पष्टम् ।

क्रमेणोदाहरणानि—

'प्रेमार्द्राः प्रणयस्पृशः परिचयादुद्गाढरागोदया-
स्तास्ता मुग्धदृशो निसर्गमधुराश्चेष्टा भवेयुर्मयि ।

तस्य निरुक्तप्रकारचतुष्टयानन्तर्भावात्लक्ष्यलाभावेन तत्र सामान्यलक्षणस्यातिव्याप्तिप्रसङ्गात् । तत्र पूर्वरागादिषु । मिथ इति । अन्योन्यमित्यर्थः । दशाविशेषोऽवस्थाभेदः । अप्राप्तौ परस्परासङ्गमे । वन्दिनः स्तुतिपाठकाः । दशाविशेषानाह—अभिलाष इति । दश प्रकाराः । अत्र पूर्वरागे । कामकृता रतिजन्या दशाः कामदशाः । स्पृहा अभीष्टप्राप्तीच्छा । अपरिच्छेदो विशेषानिर्धारणाभावः । अलक्ष्यवाक् निर्विषयं वचः । शेषं स्पष्टमित्यादिकम् ॥ प्रेमार्द्रा इति । प्रेम्णा आर्द्राः निबिडसम्पृक्ताः । प्रेमाभिव्यञ्जिका इति यावत् । प्रणयं स्नेहं स्पृशन्ति जनयन्ति । परिचयात् मुहुर्मुहुर्दर्शनात् । उद्गाढ उत्कटो यो रागः सुरतेच्छा तस्योदयो याभ्यस्ताः । मुग्धदृशो नायिकायाः । चेष्टा नेत्रविक्षेपादिरूपाः

---

1. स्मृतीत्यादि । [illegible]

---

१. [illegible]

द्वयोः प्रणयमानः स्यात्प्रमोदे सुमहत्यपि ॥ १९८ ॥
प्रेम्णः कुटिलगामित्वात्कोपो यः कारणं विना ।

द्वयोरिति नायकस्य नायिकायाश्च उभयोश्च प्रणयमानो वर्णनीयः । उदाहरणम् । तत्र नायकस्य यथा—

'अलीअपसुत्तअणिमीलिअच्छ देसु सुहअ मज्झ ओआसं ।
गण्डपरिउम्बणापुलइअङ्ग ण पुणो चिराइस्सं ॥'

नायिकाया यथा कुमारसंभवे संध्यावर्णनावसरे ।

उभयोर्यथा—

'पणअकुविआणँ दोह्न वि अलिअसुत्ताणँ माणइल्लाणं ।
णिच्चलणिरुद्धणीसासदिण्णअण्णाणँ को मल्लो ॥'

अनुनयपर्यन्तासहत्वे त्वस्य न विप्रलम्भभेदता, किंतु संभोगसंचार्याख्यभावत्वम् ।

यथा—

'भ्रूभङ्गे रचितेऽपि दृष्टिरधिकं सोत्कण्ठमुद्वीक्षते
रुद्धायामपि वाचि सस्मितमिदं दग्धाननं जायते ।

प्रेम्णि । ननु प्रमोदे सति कोप एव न भवति, कथं तत्र मानलक्षणसंगतिरित्यत आह—प्रेम्ण इति । कुटिलगामित्वात् कुटिलस्वभावादित्यर्थः । कारणमन्तरेणापि । कुटिलत्वं विनापि कारणं तत्स्वभावतया कोपो भवतीति भावः । यद्वा कुटिलगामित्वाद् [illegible] ॥ अलिअ इति । 'अलीकप्रसुप्तनिमीलिताक्ष देहि सुभग ममावकाशम् । गण्डपरिचुम्बनपुलकिताङ्ग न पुनश्चिरयिष्यामि ॥' इति संस्कृतम् । मम विलम्बे तव कोपो जात इति लक्ष्यते । पुनरेवं विलम्बं न करिष्यामीति भावः । अत्र नायकस्य [illegible] ॥ पणअकुवि इति । 'प्रणयकुपितयोर्द्वयोरप्यलीकप्रसुप्तयोर्मानवतोः ([illegible]) । निश्चलनिरुद्धनिःश्वासदत्तकर्णयोः को मल्लः ॥' इति संस्कृतम् । [illegible] । [illegible] अनुनयः [illegible] । तं विना [illegible] । तस्य [illegible] । ईर्ष्या [illegible] ॥ भ्रूभङ्ग इति । [illegible]

[illegible]
[illegible]

तत्र भावी यथा मम—

'यामः सुन्दरि, याहि पान्थ, दयिते शोकं वृथा मा कृथाः,
शोकस्ते गमने कुतो मम, ततो बाष्पं कथं मुञ्चसि ।
शीघ्रं न व्रजसीति. मां गमयितुं कस्मादियं ते त्वरा,
भूयानस्य सह त्वया जिगमिषोर्जीवस्य मे संभ्रमः ॥'

भवन्यथा—

'प्रस्थानं वलयैः कृतं. प्रियसखैरस्रैरजस्रं गतं,
धृत्या न क्षणमासितं. व्यवसितं चित्तेन गन्तुं पुरः ।
यातुं निश्चितचेतसि प्रियतमे सर्वे समं प्रस्थिता
गन्तव्ये सति जीवितप्रियसुहृत्सार्थः किमु त्यज्यते ॥'

निर्धीयमानत्वात् । एवं च [illegible] ॥ याम इति । [illegible] 'पान्थ' इति सम्बोधन [illegible] 'दयिते' इत्यनेन सम्बोधनम् । [illegible] ॥ प्रस्थानमिति । [illegible] —प्रस्थानमिति । [illegible]

भूतो यथा—'चिन्ताभिः स्तिमितम्—' इत्यादि (१७८ [illegible] शापाद्यथा—'तां जानीयाः—' इत्यादि (१२३ पृ.) [2]संभ्रमो दि[illegible] मानुषनिर्घातोत्पातादिजः। यथा—विक्रमोर्वश्यामुर्वशीपुरूरवसोः।

[1]अत्र पूर्वरागोक्तानामभिलाषादीनामत्रोक्तानां चाङ्गासौष्ठवादीना[illegible] दशानामुभयेषामप्युभयत्र संभवेऽपि चिरंतनप्रसिद्ध्या विविच्य प्रति[illegible] पादनम्।

अथ करुणविप्रलम्भः—

यूनोरेकतरस्मिन्गतवति लोकान्तरं पुनरलभ्ये।
विमनायते यदैकस्तदा भवेत्करुणविप्रलम्भाख्यः॥२०९॥

यथा कादम्बर्यां पुण्डरीकमहाश्वेतावृत्तान्ते।

पुनरलभ्ये शरीरान्तरेण वा लभ्ये तु करुणाख्य एव रसः।

अत्यन्तसखित्वमित्यत्र पृथक् प्रियसखित्वोपादानम्। प्रियतमगमने गन्तुमारब्धा वलयादयः सख्योचितं कर्म कुर्वन्ति। त्वमपि प्रियस्य सुहृद्भवसीति तवापि गमनं न्याय्यमित्याह—गन्तव्ये सतीति। अत्रेयमुक्तिरनुभावः। अश्रु[illegible] विषादो व्यभिचारिभावः। प्रियतम आलम्बनम्। नायिकाया रतिर्न सामाजिके रसोत्पत्तिः॥ **तां जानीया इति** प्रोषितभर्तृकाया नायिकाया उदाहरणमिदम्। **दिव्यो** विद्युदुल्कादिः। **मानुषो** मर्त्यलोकभवो भूकम्पादिः। **निर्घात** इति नामसोपलक्षणम्। **उत्पातोऽ**निष्टसूचको दैवकृतः प्रकृतिविपर्यासः। आदिना उन्मादादिपरिग्रहः। **उर्वशीपुरूरवसोरिति**। उर्वशी हि पुरा मित्रावरुणयोः शापान्मनुष्यलोकं प्राप्य पुरूरवसो गृहे 'यदि भवन्तं सुरतसमयातिरिक्तसमये नग्नं पश्यामि तदा त्वामहं त्यक्ष्यामि, मम मेषद्वयं भवता रक्षणीयम्' इति नियमं कृत्वा स्थिता। तदनन्तरं देवैरन्धतमसे मेषद्वयमपहृतम्। तच्छ्रुत्वा पुरूरवाः ससंभ्रमं वस्त्रमपरिधायैव खड्गपाणिर्मेषापहर्तृन् पश्चाद्धावित। एतस्मिन्नन्तरे विद्युद्भिर्नग्नमवलोक्योर्वशी स्वर्गं गतेति ग्रन्थस्य वर्तुलार्थः। अत्र देवकृतमेषापहरणरूप[illegible] दिव्योत्पातेन पुरूरवसः संभ्रमः, तेनोर्वश्या विरहेऽपि गतित्वम्॥ **उभयत्र** पूर्वरागे प्रवासे च॥ करुणविप्रलम्भमाह—**यूनोरिति**। विमनायते शोकव्याकुलचित्तत्वं[illegible] विलापं कुरुते। **पुनरलभ्य इति**। रतेर्नाशाद् उत्कटशोकसमवाय करुणाख्ये[illegible]

---

1. संभ्रम इत्यादिवृत्तिरेतस्या कारिकाभ्रमो न कार्यः।

[illegible]

किंचात्राकाशसरस्वतीभाषानन्तरमेव शृङ्गारः, संगमप्रत्याशया रतेरुद्भवात् । प्रथमं तु करुण एव, इत्यभियुक्ता मन्यन्ते । यच्चात्र 'संगमप्रत्याशानन्तरमपि भवतो विप्रलम्भशृङ्गारस्य प्रवासाख्यो भेद एव' इति केचिदाहुः, तदन्ये 'मरणरूपविशेषसंभवात्तद्भिन्नमेव' इति मन्यन्ते ।

अथ संभोगः—

दर्शनस्पर्शनादीनि निषेवेते विलासिनौ ।
यत्रानुरक्तावन्योन्यं संभोगोऽयमुदाहृतः ॥ २१० ॥

आदिशब्दादन्योन्याधरपानचुम्बनादयः । यथा—'शून्यं वासगृहम्—' (२३ पृ.) इत्यादौ ।

संख्यातुमशक्यतया चुम्बनपरिरम्भणादिबहुभेदात् ।
अयमेक एव धीरैः कथितः संभोगशृङ्गारः ॥ २११ ॥
तत्र स्यादृतुषट्कं चन्द्रादित्यौ तथोदयास्तमयः ।
जलकेलिवनविहारप्रभातमधुपानयामिनीप्रभृतिः ॥२१२॥
अनुलेपनभूषाद्या वाच्यं शुचि मेध्यमन्यच्च ।

रसः, न पुनर्विप्रलम्भ इति भावः । अत्र विशेषमाह—किं चेति । निषेवेते कुरुतः । एकतरस्यानुरागाभावे शृङ्गाराभास इति तद्वारणाय—अन्योन्यमिति ॥ शून्यमिति । व्याख्यातमेतत्प्राक् (२३ पृ.) एक एकप्रकारः । संभोगोद्दीपनविभावानाह—तत्रेति । संभोग इत्यर्थः । स्याद् उपयुक्तं भवति । वाच्यं संभोगोद्दीपकतया वर्णनीयम् । शुचि मेध्यमत्यन्तं निर्मलम् । अन्यदन्यादि ॥ संख्यातुं

---

1. अत्रेति । अत्र कादम्बर्यां चन्द्रापीडं प्रति स्ववेदनं पुण्डरीकस्येतिवृत्तं वर्णयन्त्या महाश्वेताया वाक्येष्वित्यर्थः । [illegible] करुणस्यैव प्राधान्याद्विप्रलम्भः । [illegible] तु संचारिमात्रम् । [illegible] करुणस्यैव प्राधान्यमिति करुण एव । यदा तु [illegible] [illegible] इव विप्रलम्भ एव । [illegible] इति नव्याः ॥

2. केचिदिति । [illegible] प्रवास[illegible] [illegible] ॥

3. विलासिनाविति । विलासिनी च विलासी च विलासिनौ [illegible] ॥

[illegible]

साहि० १६

तथा च भरतः—'यत्किंचिल्लोके शुचि मेध्यमुज्ज्वलं दर्शनी[illegible]
वा तत्सर्वं शृङ्गारेणोपमीयते (उपयुज्यते च)' इति।

किं च।

कथितश्चतुर्विधोऽसावानन्तर्यात्तु पूर्वरागादेः ॥ २१३ ॥

यदुक्तम्—

'न विना विप्रलम्भेन सम्भोगः पुष्टिमश्नुते।
कषायिते हि वस्त्रादौ भूयान्रागो विवर्धते ॥' इति।

तत्र पूर्वरागानन्तरं सम्भोगो यथा कुमारसम्भवे पार्वतीपरमेश्वरयोः।
प्रवासानन्तरं सम्भोगो यथा मम तातपादानाम्—

'क्षेमं ते ननु पक्ष्मलाक्षि—किमिअ खेमं महग्घ दिट्ठं,
एतावद्धृशता कुतः—तुह पुणो पुट्ठ सरीरं जदो।
केनाहं पृथुलः प्रिये—पणइणीदेहस्स संमेलणात्,
त्वत्तः सुभ्रु न कापि मे—जइ इअं खेमं कुदो पुच्छसि ॥'

एवमन्यत्राप्यूह्यम्।

[illegible] सम्भोगभेदाभावात् —किं चेति। [illegible]
सूचनम्। आदिना मानप्रवास[illegible] ॥ [illegible]
[illegible] पूर्वरागादिकं विनापि सम्भोगः सम्भवतीति सूचितम्। [illegible]
[illegible] सम्भोगो द्विविधः। विप्रलम्भानन्तरं सम्भोग [illegible]
[illegible] चतुर्विधः। [illegible] ॥ क्षेमं ते इति। [illegible]
[illegible]

अथ हास्यः—

विकृताकारवाग्वेषचेष्टादेः कुहकाद्भवेत् ।
हास्यो हासस्थायिभावः श्वेतः प्रमथदैवतः ॥ २१४ ॥
विकृताकारवाक्चेष्टं यमालोक्य हसेज्जनः ।
तमत्रालम्बनं प्राहुस्तच्चेष्टोद्दीपनं मतम् ॥ २१५ ॥
अनुभावोऽक्षिसंकोचवदनस्मेरतादयः ।
निद्रालस्यावहित्थाद्या अत्र स्युर्व्यभिचारिणः ॥ २१६ ॥
ज्येष्ठानां स्मितहसिते मध्यानां विहसितावहसिते च ।
नीचानामपहसितं तथातिहसितं तदेष षड्भेदः ॥ २१७ ॥
ईषद्विकासिनयनं स्मितं स्यात्स्पन्दिताधरम् ।

ालिङ्ग्य माम् । इत्याकर्ण्य निमीलितार्धनयन स्मेर शनैराननं सोत्साह वदनाम्बुजं मुद्वहन् स्मेर चुचुम्बे प्रिय ॥' हास्यरसमाह—**विकृतेति** । विकृता आकारा-दयो यस्य तस्मात्कुहकात् नर्तकात् । एतदुपलक्षणम् । विकृताकारादिविषयक-काव्यादपि । 'कुतुकात्' इति पाठे विकृताकारादिजन्यात्कौतुकादित्यर्थः । अत्र हास्यरसे । **तच्चेष्टा** विकृताकारादिपुरुषचेष्टा । हास्यरसस्थायिभावस्य हासस्य भेदानाह—**ज्येष्ठानामिति** । उत्तमानामित्यर्थः । **तदिति** । हास्यभे-दा इत्यर्थः । **एष** हास्यरस । स्मितादीनां लक्षणमाह—**ईषदिति** । तत्र हासेषु

---

1. हास्य इति । [illegible]

[illegible]

अनुभावा दैवनिन्दाभूपातक्रन्दितादयः ।
वैवर्ण्योच्छ्वासनिःश्वासस्तम्भप्रलपनानि च ॥ २२४ ॥
निर्वेदमोहापस्मारव्याधिग्लानिस्मृतिश्रमाः ।
विषादजडतोन्मादचिन्ताद्या व्यभिचारिणः ॥ २२५ ॥

शोच्यं विनष्टबन्धुप्रभृति ।

यथा मम राघवविलासे—

'विपिने क्व जटानिबन्धनं तव चेदं क्व मनोहरं वपुः ।
अनयोर्घटनाविधेः स्फुटं ननु खड्गेन शिरीषकर्तनम् ॥'

अत्र हि रामवनवासजनितशोकार्तस्य दशरथस्य दैवनिन्दा । एवं बन्धुवियोगविभवनाशादावप्युदाहार्यम् । परिपोषस्तु महाभारते स्त्रीपर्वणि द्रष्टव्यः ।

अस्य करुणविप्रलम्भाद्भेदमाह—

शोकस्थायितया भिन्नो विप्रलम्भादयं रसः ।
विप्रलम्भे रतिः स्थायी पुनः संभोगहेतुकः ॥ २२६ ॥

इष्टनाशश्च पुत्रादेर्विच्छेदो मरणं च वित्तादेर्नाशश्च ॥ **अनयोर्**जटाधारणशरीरसौन्दर्ययोः **घटना** योजना । **खड्गेन** शिरीषकर्तनमिवेत्यर्थः । अत्र प्रकरणाद्दशरथो नायको लभ्यत इति । निरूपयति—**अत्रेति** । अनुचिताचरणमेव दैवस्य निन्दा सैवानुभावः । बन्धुवियोगो बन्धुमरणम् । तत्र यथा—'गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ । करुणाविमुखेन मृत्युना हरता त्वां वद किं न मे हृतम् ॥' अजेन्दुमतीमरणजनितशोकार्तस्याजस्य मृत्युनिन्दा । विभवनाशो यथा—'प्रातर्भवामि वसुधाधिपचक्रवर्ती सोऽहं व्रजामि विपिने जटिलस्तपस्वी । यच्चिन्तितं तदिह दूरतरं प्रयाति यच्चेतसा न गणितं तदिहाभ्युपैति ॥' अत्र नष्टराज्यस्य रामस्य परिदेवनम् ॥ **स्थायीभाव** इति शेषः । **पुनः** संभोगो हेतुर्यस्य

---

1. यथेति । यथा वा मम—'[illegible]' इति ।

---

*. [illegible]

अथ रौद्रः—

[1]रौद्रः क्रोधस्थायिभावो रक्तो रुद्राधिदैवतः ।
[1]आलम्बनमरिस्तत्र तच्चेष्टोद्दीपनं मतम् ॥ २२७ ॥
मुष्टिप्रहारपातनविकृतच्छेदावदारणैश्चैव ।
संग्रामसंभ्रमाद्यैरस्योद्दीप्तिर्भवेत्प्रौढा ॥ २२८ ॥
भ्रूविभङ्गौष्ठनिर्दंशबाहुस्फोटनतर्जनाः ।
आत्मावदानकथनमायुधोत्क्षेपणानि च ॥ २२९ ॥
उग्रतावेगरोमाञ्चस्वेदवेपथवो मदः ।
अनुभावास्तथाक्षेपक्रूरसंदर्शनादयः ॥ २३० ॥
मोहामर्षादयस्तत्र भावाः स्युर्व्यभिचारिणः ।

यथा—

'[2]कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः ।
नरकरिपुणा सार्धं तेषां सभीमकिरीटिना-
मयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम् ॥'

यस्य स ॥ रौद्ररसमाह—रौद्र इति । तच्चेष्टा रिपुचेष्टा । तां विशिनष्टि मुष्टीति । विकृतं विरुद्धाचरणम् । छेदः खड्गादिना । अवदारणं शूलादिना । अस्य रौद्रस्य । 'अवदानं कर्मवृत्तम्' इत्यमरः ॥ कृतमिति । द्रोणशिरश्छे[illegible] क्रुद्धस्याश्वत्थाम्नोऽर्जुनं प्रति सर्वोऽप्योक्तिरियम् । इदं मत्पितृशिरश्छेदरूपं गुरुपा[illegible] तत्कारणं कर्म यैरुद्यतायुधैर्मर्यादाशून्यैरत एव मनुजपशुभिर्भवद्भिः कृतमनु[illegible] दृष्टं वा, नरकरिपुणा कृष्णेन सार्धं भीमकिरीटिसहितानां तेषां मेदोमांसैरसृ[illegible] [illegible] दिगवस्थितभूतानां बलिं करोमीत्यर्थः । अयमेतल्लक्षणवर्त्मैव । अत्राश्वत्थ[illegible] [illegible] । तदकार्यमुद्दीपनम् । तादृशगर्जनमनुभाव [illegible] ॥

1. रौद्र इति । [illegible]स्थायिभावको [illegible] [illegible] गर्वादिव्यभिचारिको रौद्र इति ॥

2. कृतमिति । [illegible] रौद्ररसव्य[illegible] वृत्तिर्नास्ति, अत '[illegible] [illegible] [illegible] वृश्चति । अद्य पुनु [illegible] [illegible] मम परशवो [illegible] ॥' इत्युदाहरणम् । [illegible] [illegible] । अत्र [illegible] वृत्तौ रौद्रस्य परिपुष्णाति ॥

---

1. '[illegible] विरोधी स्यात्' ग । 2. '[illegible]' इति ग

अस्य युद्धवीराद्भेदमाह—

रक्तास्यनेत्रता चात्र भेदिनी युद्धवीरतः ॥ २३१॥

अथ वीरः—

उत्तमप्रकृतिर्वीर उत्साहस्थायिभावकः ।
महेन्द्रदैवतो हेमवर्णोऽयं समुदाहृतः ॥ २३२ ॥
आलम्बनविभावास्तु विजेतव्यादयो मताः ।
विजेतव्यादिचेष्टाद्यास्तस्योद्दीपनरूपिणः ।
अनुभावास्तु तत्र स्युः सहायान्वेषणादयः ॥ २३३ ॥
संचारिणस्तु धृतिमतिगर्वस्मृतितर्करोमाञ्चाः ।
स च दानधर्मयुद्धैर्दयया च समन्वितश्चतुर्धा स्यात् ॥ २३४ ॥

स च वीरो दानवीरो धर्मवीरो युद्धवीरो दयावीरश्चेति चतुर्विधः ।
तत्र दानवीरो यथा परशुरामः —

पुंष्टिस्तु महाभारतादौ द्रष्टव्यौ ।

निरहंकाररूपत्वाद्दयावीरादिरेष नो ॥ २४९ ॥

दयावीरादौ हि नागानन्दादौ जीमूतवाहनादेरन्तरा मलयवत्यादिअनुरागादेरन्ते च विद्याधरचक्रवर्तित्वप्राप्तेर्दर्शनादहकारोपशमो न दृश्यते । शान्तस्तु सर्वाकारेणाहकारप्रशमैकरूपत्वान्न तत्रान्तर्भावमर्हति । ततश्च नागानन्दादेः शान्तरसप्रधानत्वमपास्तम् । ननु

'न यत्र दुःखं न सुखं न चिन्ता न द्वेषरागौ न च काचिदिच्छा ।
रसः स शान्तः कथितो मुनीन्द्रैः सर्वेषु भावेषु समप्रमाणः ॥'

इत्येवरूपस्य शान्तस्य मोक्षावस्थायामेवात्मस्वरूपापत्तिलक्षणायां प्रादुर्भावात्तत्र सचार्यादीनामभावात्कथं रसत्वमित्युच्यते—

युक्तवियुक्तदशायामवस्थितो यः शमः स एव यतः ।
रसतामेति तदस्मिन्संचार्यादेः स्थितिश्च न विरुद्धा ॥५०॥

बीजीकृत–' इति पाठेऽपि बीज वासना तच्छून्यीकृतेत्यर्थः । करट काक ॥ ... शान्ते दयाद्यतिशयसंभवेन दयावीरादिरेवायमित्यत आह—निरहंकाररूपत्वादिति । आदिना धर्मवीरदेवताविषयरतिप्रभृतीना ग्रहणम् । एष शान्त... । तथा चाहकारसवलितो दयादिर्न दयावीरादेर्वेटक । तदित' शान्तरस... विशेष । ततश्चैतद्दशविशेषावधारण च । नागानन्दे दयावीरादिप्रधाने ग्रन्थशेषे ॥ न यत्रेति । द्वेषो रिपूणामपचिकीर्षा । राग सुहृदामुपचिकीर्षा । इच्छा ...चित्तसुखतदुपायेच्छा । भावेषु पदार्थेषु लोष्टकाञ्चनादिविभावादिषु रात्सु रागद्वेषराहित्येन समसविषमं प्रमाण प्रतीतिर्येन । 'शमप्रधान' इति पाठस्तु न मनो..., अर्थासगते । तादृशदशाया व्यभिचारिभावादीनामसंभवात् । शम एव ...यितया प्रधानं यत्र स । आत्मस्वरूपापत्तिलक्षणाया परमात्मस्वरूपप्राप्ति...दशायाम् ॥ युक्तवियुक्तेति । विषयेभ्य प्रत्याहृत्य साक्षात्कर्तव्ये वस्तुनि मनो ...वाय वर्तमानश्चिन्तासंतानवान् युक्त । यस्य योगजधर्मसहकृतेन मनसा जिज्ञासितवस्तुसाक्षात्कारो जायते । यश्च भूतेन्द्रियजयी अणिमाद्या कामसिद्धीर्दूरश्रवणाद्याश्चेन्द्रियसिद्धीरासादितवान् समाध्यि... । यस्य च योगजधर्मस-

---

1. स एवेति । तादृशशम एव स्थायि... भवत इत्यर्थ ।

---

१ 'पुष्टि–' इति पङ्क्तिका नास्ति ग पुस्तके ... दे सकाशान्निदमाह' इत्यधिकं पुस्तके ३ 'नागानन्दादौ' इति नास्ति ... '–वाहनादौ' क-घ ५ आदि... द्वो नास्ति क घ पुस्तकयो ६ 'प्र...' ...स्यभिचिन्तुमर्हति' ग ८ 'नन्दे' घ ९ 'शमप्रधान' क ख ग १... कान्तरे ११ 'लोष्टकाञ्चनादि' ...स्ति पुस्तकान्तरे १२ 'राग–' इत्य... पाठो नास्ति पुस्तकान्तरे

द्राक्पर्यस्तकपालसंपुटमिलद्ब्रह्माण्डभाण्डोदर-
भ्राम्यत्पिण्डितचण्डिमा कथमहो नाद्यापि विश्राम्यति ॥'

अथ शान्तः—

शान्तः शमस्थायिभाव उत्तमप्रकृतिर्मतः ॥ २४५ ॥
कुन्देन्दुसुन्दरच्छायः श्रीनारायणदैवतः ।
अनित्यत्वादिनाशेषवस्तुनिःसारता तु या ॥ २४६ ॥
परमात्मस्वरूपं वा तस्यालम्बनमिष्यते ।
पुण्याश्रमहरिक्षेत्रतीर्थरम्यवनादयः ॥ २४७ ॥
महापुरुषसङ्गाद्यास्तस्योद्दीपनरूपिणः ।
रोमाञ्चाद्याश्चानुभावास्तथा स्युर्व्यभिचारिणः ॥ २४८ ॥
निर्वेदहर्षस्मरणमतिभूतदयादयः ।

यथा—

'रथ्यान्तश्चरतस्तथा धृतजरत्कन्थालवस्याध्वगैः
सत्रासं च सकौतुकं च सदयं दृष्टस्य तैर्नागरैः ।
निर्व्याजीकृतचित्सुधारसमुदा निद्रायमाणस्य मे
निःशङ्कः करटः कदा करपुटीभिक्षां विलुण्ठिष्यति ॥'

दिति। यथा लोके मौल्यादिगतं मुकुटादि मस्तकाद्यलंकारत्वेन व्यपदिश्यते तथा काव्येऽपीत्यर्थः॥ दूषयति—**तदन्ये इति**। शब्दाभेदादर्थश्लेप इति यदुक्तं तद्दूषयति–**न चेति**। दर्शनस्य प्रामाण्यानभ्युपगमे त्वाह–**किं चेति**। **कविप्रतिभया** कवीनामनुभवेन **उट्टङ्कनाद्** विषयीकरणात्। शब्दस्यान्वयानुविधायित्वं प्रदर्श्य व्यतिरेकानुविधायित्वं दर्शयति—**विसदृशेति**। बन्धे चेति चकारस्य वैचित्र्याभावश्चेत्यन्वयः। ननु वैचित्र्यस्य शब्दान्वयव्यतिरेकानुविधायित्वेन किमायातमत आह—**वैचित्र्यस्यैवेति**। अलंकारत्वादलंकारनियामकत्वात्। **अर्थमुखप्रेक्षितया** अर्थानुसंधानसापेक्षत्वेन [3]**अर्थालंकारत्वे** अर्थालंकारत्वाङ्गीकारे। **रसादिपरत्वेन** रसाद्युत्कर्षाभिप्रायप्रयोज्यत्वेन। **शब्दभेदेऽपीति**। 'विधौ' इत्यादौ स्वरभेदाभावेन एकप्रयत्नेनैव शब्दद्वयोच्चारणादर्थद्वयप्रतीतिरिति भावः। **उभयत्र**

पुराणवार्ता इति तु युक्तम्॥ तथा च शिवमहिम्नः स्तवे—'रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो रथाङ्गे चन्द्रार्कौ रथचरणपाणिः शर इति'॥

1. शब्दार्थेति। पर्यायान्तरपरिवृत्तिसहत्वासहत्वाभ्यां शब्दार्थगतव्यवस्थितिरिति भावः॥

2. दर्शनादिति। 'यावन्त एवनर्थाः स्युः शब्दास्तावन्त एव हि।' इत्याद्युक्तिभूमिकादित्यर्थः॥

3. शब्दभेद इति। विधिविधुशब्दयोः पार्थक्येऽपीत्यर्थः॥

4. श्लेपत्वेति। श्लेपत्वखण्डना श्लेपभङ्गः॥

---

१. 'अर्थ' इति नास्ति कच्चपुस्तके। २. 'लोके' इति मुद्रितपुस्तके नास्ति. ३. 'अर्थालंकारत्वे' इति पुस्तकान्तरे नास्ति.

लम्–' इत्यादौ च नोपमाप्रतिभोत्पत्तिहेतुः श्लेषः । पूर्णोपमाया निर्विषयत्वापत्तेः । 'कमलमिव मुखं मनोज्ञमेतत्' इत्याद्यस्ति पूर्णोपमाया विषय इति चेत् । न । यदि 'सकल–' इत्यादौ शब्दश्लेषतया नोपमा तत्किमपराद्धं 'मनोज्ञम्' इत्यादावर्थश्लेषेण ।

'स्फुटमर्थालंकारावेतावुपमासमुच्चयौ, किं तु ।
आश्रित्य शब्दमात्रं सामान्यमिहापि संभवतः ॥'

इति रुद्रटोक्तदिशा गुणक्रियासाम्यवच्छब्दसाम्यस्याप्युपमाप्रयोजकत्वात् । ननु गुणक्रियासाम्यस्यैवोपमाप्रयोजकता युक्ता, तत्र साधर्म्यस्य वास्तवत्वात् । शब्दसाम्यस्य तु न तथा, तत्र साधर्म्यस्यावास्तवत्वात् । ततश्च पूर्णोपमाया अन्यथानुपपत्त्या, गुणक्रियासाम्यस्यैवार्थश्लेषविषयत-

मित्यादौ चेति । श्लेषो नोपमाबाधक इति भावः । तत् तदा । शब्दमात्रं सामान्यमाश्रित्यापीहालंकारमध्ये संभवत इत्यन्वयः । यद्यपि 'सकलकलम्–' इत्यादावेकप्रयत्नेन शब्दद्वयोत्पत्त्या शब्दस्याप्येकत्वं न संभवति, तथाप्येकानुपूर्व्यवच्छिन्नत्वेन शब्दयोरेकत्वप्रतिभास इति भावः । समुच्चयालंकारे एकधर्माभिसंबन्धस्य निवेशाभावात्तत्समुच्चयपदमत्र तुल्ययोगितापरं दीपकपरं च तयोस्तत्संभवात् । नन्वेवं 'किं च तुल्ययोगितायाम्–' इत्यादिना श्लेषतुल्ययोगितयोर्यो विषयविभागः कृतः स न संगच्छते 'येन ध्वस्त–' इत्यादावपि शब्दरूपैकधर्मसंबन्धस्य सत्त्वेन तुल्ययोगिताया विषयत्वसंभवादिति चेत् । सत्यम् । यत्रानेकस्यैकधर्मसंबन्धावगमे द्विवचनबहुवचनचकाराद्यपेक्षा तत्रैव दीपकतुल्ययोगितयोर्विषयः । 'येन ध्वस्त–' इत्यादौ तु द्विवचनाद्यपेक्षाविरहेण तुल्ययोगिताया विषय एव नास्ति । एवं ययोरेकधर्मसंबन्धस्तयोरनेकप्रयत्नोच्चार्यपदवाच्यत्वं दीपकतुल्ययोगितालक्षणे निवेशनीयमतो नातिप्रसङ्गः । एवं च 'स्वेच्छोपजातविषयोऽपि–' इत्यादिदीपकस्य 'किरणा हरिणाङ्कस्य–' इत्यादि, 'विकसन्नेत्रनीलाब्जे–' इत्यादि च तुल्ययोगितायाश्च विषय इति ध्येयम् । गुणक्रियासाम्यवद्गुणक्रियासाम्यस्येव । तत्र गुणक्रियासाम्यप्रयुक्तोपमायाम् । वास्तवत्वाद् वस्तुसमवेतत्वात् । न तथा नोपमाप्रयोजकता । तत्र शब्दसाम्यप्रयुक्तोपमायाम् । साधर्म्यस्य शब्दरूपसामान्यस्य धर्मस्य । अवास्तवत्वाद् उपमानोपमेयरूपवस्तुनोरसमवेत-

1. कमलेति । 'कमलमिव मुखं मनोज्ञमेतत्कचतितराम्' इत्यत्र मनोज्ञत्वलक्षणस्य गुणस्य, प्रकाशलक्षणायाः क्रियायाः, गुणक्रिययोर्वा साम्यात्पूर्णोपमाविषयोऽस्तीत्यर्थः ॥

2. मनोज्ञमिति । मनोज्ञत्वस्योपमानोपमेयभूतयोः कमलमुखयोर्भेदेन श्लिष्टत्वादर्थश्लेष इत्यर्थः ॥

१. 'रुद्रटोक्त' क. २. 'च' इति नास्ति ख-पुस्तके. ३. 'दस्यते' ख. ४. 'विषयता' ग. ५. 'यत्र यदि नैकानेकपदार्थसंबन्धबोधकत्वं तत्र द्विवचनचकाराद्यपेक्षा' इति पुस्तकान्तरे. ६. 'एवं च पूर्वोक्तनिरूपणे च तत्त्वार्थ' इति पुस्तकान्तरे पाठः. ७. 'अत्र' इति पुस्तकान्तरे.

'प्रकृतिप्रत्ययौ स्वस्वार्थबोधकौ' इति च मतद्वयेऽपि वत्यादिक्यङाद्योः साम्यमेवेति। यच्च केचिदाहुः—'वत्यादय इवाद्यर्थेऽनुशिष्यन्ते, क्यङादयस्त्वाचाराद्यर्थे' इति। तदपि न। न खलु क्यङादय आचारमात्रार्थाः, अपि तु सादृश्याचारार्था इति। तदेवं धर्मलोपे दशप्रकारा लुप्ता।

उपमानानुपादाने द्विधा वाक्यसमासयोः।

उदाहरणम्—

'तस्या मुखेन सदृशं रम्यं नास्ते न वा नयनतुल्यम्।'

दितं प्रकृतिप्रत्ययसमुदाय, **वाचकं** प्रकृत्यर्थविशिष्टप्रत्ययार्थप्रतिपादकम्। **स्वस्वार्थबोधकौ** क्रमेण स्वार्थप्रतिपादकौ। **वत्यादीति**। आदिपदेन कल्पादिपरिग्रह। **साम्यमेवेति**। सादृश्यवाचकत्वेन साम्यमित्यर्थः। **आचाराद्यर्थ इति**। 'अनुशिष्यन्ते' इत्यन्वय.। **अपि त्विति**। किन्त्वित्यर्थ.। 'अपि तर्हि' इति पाठे किं तर्हीत्यर्थ। उपसंहरति—**तदेवमिति**। वस्तुतस्तु 'चन्द्रायते शुक्लरुच्यापि हंस' इत्यादौ साधारणधर्मोपादानेऽपि क्यङादियोगे उपमादर्शनादार्थ्या उपमायास्तद्धितादित्रितयगतत्ववत् क्यजादिपञ्चकगतत्वेन विशेषो बोध्य। एवं चाष्टप्रकाराया आर्थ्या धर्मलोपालोपाभ्यां षोडशप्रकारत्वं बोध्यम्। क्यजादिपञ्चके धर्मलोपे उदाहरण यथा—'वीर. प्रीतिकरत्वेन पर्यङ्कीयति मञ्चके। मित्रीयति परं प्रेम्णा भक्त्या देवायते नृणाम्॥ देवदर्शं जनै साधु प्रतीक्ष्यत्वेन दृश्यते। कृपया विष्णुसचार नित्यं सचरति क्षितौ॥' अत्र तृतीयान्तपदार्थाना क्यजाद्यर्थे सादृश्येऽभेदेनान्वय॥ उपमानलुप्तामुपमामाह—**उपमानेति**। 'लुप्तोपमा' इत्यनुपङ्ग॥ **न वेति**। न वा नयनतुल्यरम्यमास्त इत्यन्वयः। अन्यथा

त्वनिष्टमेव। अन्यथा उपास्यते हरः, अनुभूयते सुखम्, इत्यादौ धात्वर्थासनभवनक्रिययोरकर्मकत्वेन कर्मलकारोपपत्तिर्न स्यात्। इवादीना तु वाचकत्वमेव। उपमानोपमेयतावाचिनामिवादिवाचकताया प्रतिबन्धकराहित्येन दृष्टान्तवैषम्यस्य सद्भावाद् विशेषणविशेष्ययोरेकविभक्तिकत्वे 'विशेष्येण सहैकार्थं मनेयत्र विशेषणम्। तत्र लिङ्गादय: प्रायो विशेष्यस्या विशेषणे॥' इत्यनुशासनस्येवोपमानोपमेययोरपि तत्र 'लिङ्गसंख्याविभेदेऽपि उपमानोपमेयता। विभक्ति पुनरेकैव उपमानोपमेययो.॥' इत्यनुशासनस्य जागरूकत्वेन 'शरैरुस्रैः—' इत्यादावुपमानपदोत्तरतृतीयादेः सूपपादकत्वाच्च। प्रायोग्रहणेन 'श्रूयन्ते मदमलिनगण्डाः करटिनः करिण्यः कारुण्यास्पदम्—' इत्यादौ विशेष्यविशेषणयोर्लिङ्गादिभेदेऽपि न काचिदनुपपत्तिरित्यन्यत्र विस्तरः॥

1. क्यङादय इति। अयमभिप्रायः—'कर्तुं क्यङ् सलोपश्च' इत्यत्र 'उपमानादाचारे' इत्यत उपमानपदमनुवर्तते, तेनेवार्थसादृश्यादपि बोधे सादृश्याचारार्थः क्यङिति।

---

1. 'स्वार्थबोधकौ' क. 2. 'षोडशप्रकारा बोध्या' इति मुद्रितपुस्तके.

अत्र मुखनयनप्रतिनिधिवस्त्वन्तरयोर्गम्यमानत्वादुपमानलोपः । अत्रैव च 'मुखेन सदृशं' इत्यत्र 'मुखं यथेदं', 'नयनतुल्यं' इत्यत्र 'दृगिव' इति पाठे श्रौत्यपि संभवतीति । अनयोर्भेदयोः प्रत्येकं श्रौत्यार्थीत्वभेदेन चतुर्विधत्वसंभवेऽपि प्राचीनानां रीत्या द्विप्रकारत्वमेवोक्तम् ।

औपम्यवाचिनो लोपे समासे क्विपि च द्विधा ॥ २० ॥

क्रमेणोदाहरणम्—

'वदनं मृगशावाक्ष्याः सुधाकरमनोहरम् ।'

'गर्दभति श्रुतिपरुषं व्यक्तं निनदन्महात्मनां पुरतः ।'

अत्र 'गर्दभति' इत्यत्रौपम्यवाचिनः क्विपो लोपः । न चेहोपमेयस्यापि लोपः । 'निनदन्' इत्यनेनैव निर्देशात् ।

द्विधा समासे वाक्ये च लोपे धर्मोपमानयोः ।

'तस्या मुखेन' इत्यादौ 'रम्यं' इति स्थाने 'लोके' इति पाठेऽनयोरुदाहरणम् ।

क्विप्समासगता द्वेधा धर्मेवादिविलोपने ॥ २१ ॥

धर्मोपमानलोपोदाहरणमिदं स्यात् । **प्रतितिनिधीति** । [illegible] ॥ [illegible]माह—**औपम्येति** । [illegible] द्विवि[illegible]मुदिष्यते ॥ **वदनमिति** । [illegible] इवार्थस्य [illegible] । [illegible] धर्मोपमानलोपोदाहरणम् । सुधाकर इव मनोहरमिति [illegible] इति कर्मधारय । [illegible]—**गर्दभतीति** । गर्दभ इवाचरतीत्यर्थे क्विपि [illegible] । [illegible] इत्यादौ क्विपो लोपेऽपि [illegible] । [illegible] । **निर्देशादिति** । [illegible]

1. सुधाकरेति । [illegible]

2. गर्दभतीति । [illegible]

यथा—

'चन्द्रायते शुक्लरुचापि हंसो हंसायते चारुगतेन कान्ता।
कान्तायते स्पर्शसुखेन वारि वारीयते स्वच्छतया विहायः॥'

मालोपमा यदेकस्योपमानं बहु दृश्यते।

यथा—

'वारिजेनेव सरसी शशिनेव निशीथिनी।
यौवनेनेव वनिता नयेन श्रीर्मनोहरा॥'

क्वचिदुपमानोपमेययोर्द्वयोरपि प्रकृतत्वं दृश्यते—

'हंसश्चन्द्र इवाभाति जलं व्योमतलं यथा।
विमलाः कुमुदानीव तारकाः शरदागमे॥'

'अस्य राज्ञो गृहे भान्ति भूपानां ता विभूतयः।
पुरंदरस्य भवने कल्पवृक्षभवा इव॥'

तस्योपमानता यदि स्यादित्यर्थः। इयं साधारणधर्मस्याभेदे भेदे च संभवतीति द्विधा॥ तत्राद्या यथा—'महात्मनो वदान्यस्य भारतीवामला मतिः। चेष्टा मतिरिव स्वच्छा चेष्टेव गुणसंततिः॥' अत्र स्वच्छत्वमेकमेव साधारणो धर्मः॥ द्वितीयामाह—**चन्द्रायत इति**। चन्द्र इवाचरतीत्यर्थः॥ मालोपमामाह—**मालोपमेति**। बह्वित्येकाधिकपरम्। तेन 'तां हंसमालाः शरदीव गङ्गां महौषधीं नक्तमिवात्मभासः। स्थिरोपदेशामुपदेशकाले प्रपेदिरे प्राक्तनजन्मविद्याः॥' इत्यादावुपमाद्वयेऽपि मालात्वमक्षतम्। इयमपि पूर्ववद्द्विधा। तत्राद्यामाह—**वारिजेनेति**। अत्र मनोहरत्वमेकमेव सादृश्यहेतुः। द्वितीया यथा—'ज्योत्स्नेव नयनानन्दः सुधेव मदकारणम्। प्रभुतेव समाकृष्टसर्वलोका नितम्बिनी॥' अत्र नेत्रानन्दजननादयो विभिन्नधर्मा एव सादृश्यानां हेतवः॥ उपमेयस्य प्रकृतत्वमुपमानस्याप्रकृतत्वं प्रायिकमित्यभिप्रायेणाह—**क्वचिदिति**। प्रकृतत्वं वर्णनीयस्योत्कर्षाधायकत्वेनाकाङ्क्षितत्वम्॥ **हंस इति**। हंसादय इव चन्द्रादयोऽपि वर्णनीयशरत्कालस्योत्कर्षाधायकत्वेनाकाङ्क्षिताः। 'विमलाः' इति पाठो न रमणीयः, मम [illegible] कुमुदानीत्युपमानान्वयायोग्यत्वात्। तस्मात् 'लसन्ति' इति पाठो द्रष्टव्यः॥ प्राचीनसमतानाक्षेपोपमादीनुपमाप्रकारान्वैचित्र्यातिशयानाधायकत्वेनोपेक्षमाण आह—**अस्य राज्ञ इति**। कल्पवृक्षभवाः कल्पवृक्षोत्पन्ना विभूतय इत्यर्थः॥

1. **मालेति**। यथा काचिन्माला सजातीयैः कुसुमैः काचिच्च विजातीयैर्निर्मीयते तथैवेयमपि सजातीयैर्विजातीयैर्वा बहुभिरुपमानैरिति भावः। एकस्य उपमेयस्येत्यर्थः॥

१. 'यथा' पुस्तकान्तरे नास्ति। २. 'वस्तुतस्तु प्रकृतयोरेकधर्माभिसंबन्धरूपतुल्ययोगितेयं न तूपमा। एव चात्र यथेवशब्दप्रयोगस्तुल्ययोगिताद्योतकत्वार्थत्वेन न गौणः पर्वेत्यवधेयम्।' इति मुदितपुस्तकेऽधिकम्।

तत्रैकदेशविवर्ति श्लिष्टं यथा मम—

(करमुदयमहीधरस्तनाग्रे गलिततमःपटलांशुके निवेश्य ।
विकसितकुमुदेक्षणं विचुम्बत्ययममरेशदिशो मुखं सुधांशुः ॥)

समस्तवस्तुविषयं यथा—अत्रैव 'विचुम्बति—' इत्यादौ 'चुचुम्ब हरिदबलामुखमिन्दुनायकेन' इति पाठे । न चात्र श्लिष्टपरम्परितम् । तत्र हि[1] 'भूभृदावलिदम्भोलिः—'(५२३) इत्यादौ राजादौ पर्वतत्वाद्यारोपं[2] विना वर्णनीयस्य राजादेर्दम्भोलितादिरूपाणां सर्वथैव सादृश्याभावा[3]दसंगतम् । तर्हि कथं 'पद्मोदयदिनाधीशः—' इत्यादौ परंपरितम्, राजादेः सूर्यादिना सादृश्यस्य तेजस्वितादिहेतुकस्य संभवात्—इति न वाच्यम् । तथा हि—राजादेस्तेजस्वितादिहेतुकं सुव्यक्तं सादृश्यं न न प्रकृते विवक्षितम् । पद्मोदयादेरेव द्वयोः साधारणधर्मतया विवक्षितत्[4] । इह तु महीधरादेः स्तनादिना सादृश्यं पीनोत्तुङ्गत्वादिना सु[व्यक्तम्] एव—इति न श्लिष्टपरम्परितम् । क्वचित्समासाभावेऽपि रूपकं दृश्यते—

'मुखं तव कुरङ्गाक्षि सरोजमिति नान्यथा ॥'

क्वचिद्वैयधिकरण्येऽपि यथा—

'सौजन्याम्बुमरुस्थली सुचरितालेख्यद्युभित्तिर्गुण-
ज्योत्स्नाकृष्णचतुर्दशी सरलतायोगश्वपुच्छच्छटा ।
यैरेषापि दुराशया कलियुगे राजावली सेविता
तेषां शूलिनि भक्तिमात्रसुलभे सेवा कियत्कौशलम् ॥'

सितच्छत्रत्वारोपे निमित्तम् ॥ **करमिति** । कर किरणमेव हस्तम् ॥ **पद्मोदयादेरेव** पद्मोदयादिशब्दस्यैव । **द्वयो** रूप्यरूपकयो राजादिसूर्याद्यो: ॥ नन्वत्र शब्दसाम्यविवक्षावशात्प्रसिद्धतेजस्वितादिरूपसाम्यविवक्षायास्तु 'त्रैलोक्यमण्डपस्तम्भा' इत्यादौ तु दीर्घत्वपीवरत्वादिसाम्यसम्भवेनात्र तन्मूलक एव स्तम्भत्वाद्यारोपोऽस्तु त्रैलोक्यादौ मण्डपत्वाद्यारोपस्य तत्कारणत्वस्वीकारेण किमिति चेत् । न । स्तम्भा यथा मण्डपभारसहिष्णवस्तथा हरिवाहवस्त्रैलोक्यभारसहिष्णव इति साम्यस्यैव प्रकृते विवक्षितत्वात् । तच्च त्रैलोक्यादौ मण्डपत्वाद्यारोपं विना दुर्बोधम् । **समासाभावेऽपीति** । अत एव दण्डिना व्यस्तं समस्तं व्यस्तसमस्तं चेति त्रिविधं रूपकमुक्तम् । 'शूलतया' इत्यभेदे तृतीया । अन्यथा तादात्म्यारोपो न स्यात् ॥ सुचरितमे-

1. 'हि' इति क-पुस्तके नास्ति. 2. '—रूपम' ख-घ. 3. 'असंभवात्' ख घ. 4 'शालिनि' क

इदं मम[1] । अत्र[2] केषांचिद्रूपकाणां शब्दश्लेषमूलत्वेऽपि रूपकविशेषत्वादर्थालंकारमध्ये गणनम् । एवं वक्ष्यमाणालंकारेषु बोध्यम् ।

अधिकारूढवैशिष्ट्यं रूपकं यत्तदेव तत् ।

तदेवादिकारूढवैशिष्ट्यसंज्ञकम्[3] । यथा मम—

'इदं वक्त्रं साक्षाद्विरहितकलङ्कः शशधरः
सुधाधाराधारश्चिरपरिणतं बिम्बमधरः ।
इमे नेत्रे रात्रिंदिवमधिकशोभे कुवलये
तनुर्लावण्यानां जलधिरवगाहे सुखतरः ॥'

अत्र कलङ्कराहित्यादिनाधिकं वैशिष्ट्यम्[4] ।

विषयात्मतयारोप्ये प्रकृतार्थोपयोगिनि ॥ ३४ ॥

दार्ढ्यं चित्रम्, घुनितिराकारकुड्यम् । सरलता कौटिल्यराहित्यमेव दाक्षिण्यम् । तस्या योगे श्वपुच्छच्छटा कुक्कुरलाङ्गूलकुण्डली । भक्तिमात्रतुलने केवलयापि भक्त्या प्राप्ये ॥ **अत्र केषांचिदिति** । साधनस्य श्लेषस्य शब्दालंकारत्वेऽपि साध्यत्वेन प्रधानस्यार्थालंकारमध्ये गणनमिति भावः । वक्ष्यमाणानां श्लेषापह्नवादीनाम् ॥ अधिकारूढवैशिष्ट्यं रूपकमाह—**अधिकारूढेति** । अधिकमत्यर्थमारूढं वैशिष्ट्यं विशेषणं यत्र तदित्यर्थः ॥ सुधाधाराधार इति बिम्बस्य विशेषणम् । कलङ्करहितत्वादिविशेषणं चन्द्रादेरत्यन्तासंभवीति तत्र तदारोपणादधिकारूढवैशिष्ट्यम् । 'कलङ्कराहित्यादिना' इत्यभेदे तृतीया । परिणामालंकारमाह—**विषयात्मतयेति** ।

---

1. वैशिष्ट्यमिति । अत्रेदमप्यनुसंधेयम्—"विषय्यभेदताद्रूप्यरञ्जनं विषयस्य यत् । रूपकं तत्त्रिधाऽधिक्यन्यूनत्वानुभयोक्तिभिः" ॥ (१) अयं हि धूर्जटिः साक्षात् येन दग्धाः पुरः क्षणात् । (२) अयमास्ते विना शम्भुस्तार्तीयीकं विलोचनम् ॥ (३) शम्भुर्विश्वमवत्यद्य स्वीकृत्य समदृष्टिताम् । (४) अस्या मुखेन्दुना लब्धे नेत्रानन्दे किमिन्दुना ॥ (५) साध्वीयमपरा लक्ष्मीरसुधासागरोदिता । (६) अयं कलङ्किनाङ्कजन्मा मुखचन्द्रोऽतिरिच्यते ॥" इति । इत्येतेषु राज्ञो विषयस्य पूर्वमनुक्तविशेषणेन [illegible] भावतो धूर्जटिविषयिणोऽभेदकथनात्, उपमानोपमेययोः न्यूनाधिक्याभाववर्णनाच्च प्रथममनुभयाभेदरूपकम् ॥ तार्तीयीकविलोचनराहित्यरूपन्यूनताकथनेन द्वितीयं न्यूनाभेदरूपकम् । 'तीयादीकक् स्वार्थे वाच्यः' इति वार्तिकेन स्वार्थे ईकक् ॥ समदृष्टितास्वीकारेण विश्वावनरूपस्य भावतो [illegible] आधिक्याभेदरूपकम् । अत्र समदृष्टिरिव [illegible] ॥ एवमस्या मुखेन्दुत्वे [illegible] मुखेन्दोश्च नेत्रानन्द[illegible] न्यूनत्वाधिक्ययोरनुपादानादनुभयताद्रूप्यरूपकं चतुर्थम् ॥ [illegible]

---

१ 'इदं मम' इति क्वचित् पुस्तके नास्ति । २ 'अत्र च' ग. ३ 'संज्ञकम्' घ. ४ '[illegible]' इति क्वचित् पुस्तके.

दण्डापूपिकयान्यार्थागमोऽर्थापत्तिरिष्यते ।

मूषिकेण दण्डो भक्षित इत्यनेन तत्सहचरितमपूपभक्षणमर्थादायातं भवतीति नियतसमानन्यायादर्थान्तरमापततीत्येष न्यायो दण्डापूपिका । अत्र च क्वचित्प्राकरणिकादर्थादप्राकरणिकस्यार्थस्यापतनं क्वचिदप्राकरणिकार्थात्प्राकरणिकार्थस्येति द्वौ भेदौ । क्रमेणोदाहरणम्—

'हारोऽयं हरिणाक्षीणां लुठति स्तनमण्डले ।
मुक्तानामप्यवस्थेयं के वयं स्मरकिंकराः ॥'

'विललाप स बाष्पगद्गदं सहजामप्यपहाय धीरताम् ।
अतितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिणाम् ॥'

अत्र च समानन्यायस्य श्लेषमूलत्वे वैचित्र्यविशेषो यथोदाहृते 'हारोऽयं—' इत्यादौ । न चेदमनुमानम् । समानन्यायस्य संबन्धरूपत्वाभावात् ।

विकल्पस्तुल्यबलयोर्विरोधश्चातुरीयु(य)तः ॥ ८३ ॥

अर्थापत्त्यलंकारमाह—**दण्डापूपिकयेति** । दण्डापूपन्यायेनेत्यर्थः । अन्यार्थागमो भिन्नार्थप्रतीतिः ॥ दण्डापूपन्यायमाह—**मूषिकेणेति** । इतिशब्दो हेतौ । अनेन मूषिकेण तत्सहचरितं दण्डभक्षणसहचरितमर्थाद्[illegible]दायातमवगतं भवतीत्यनन्तरं 'तदन्यत्रापि' इति पूरणीयम् । **नियतेति** । नियतस्य तद्व्रत्वेन निश्चितस्य समानन्यायात्तुल्यसामर्थ्यादर्थान्न तु शब्दात् । आपतति प्रतीतिविषयो भवति । मूषिकस्य हि दण्डभक्षणं दुष्करं तन्निष्पत्तौ तत्सहचरितापूपभक्षणमतिसुकरत्वादयत्नसंपाद्यते तथात्रापि सहचारित[illegible]संभाव्यत इति भावः ॥ **हारोऽयमिति** । मुक्तानां हारघटकरत्नविशेषाणां निवृत्तसंसार[illegible] च । मुक्तानां तावदीदृशी[illegible] दुर्घटं [illegible] तस्मादिति पुंस्त्वमत्र समानो धर्मः । मुक्तानां वर्णनीयत्वेन प्राकरणिकत्वम् ॥ **विललापेति** । सोऽजः । [illegible] समानो धर्मः । [illegible] वर्णनीयत्वाभावादप्राकरणिकत्वम् । **संबन्धरूपत्वाभावादिति** । व्याप्तिरूपत्वाभावादित्यर्थः । व्याप्तिश्च [illegible] । प्रकृते तु एकस्य [illegible] प्रतीतिरिति भावः ॥ विकल्पालंकारमाह—**विकल्प इति** । तुल्यबलत्वं [illegible]।

---

1. दण्डेति । [illegible] ॥

प्रभुर्धनपरायणः सततदुर्गतः सज्जनो
नृपाङ्गनगतः खलो मनसि सप्त शल्यानि मे ॥'

इह केचिदाहुः—'शशिप्रभृतीनां शोभनत्वं खलस्याशोभनत्वमपि सदसद्योगः' इति । अन्ये तु—'शशिप्रभृतीनां स्वतःशोभनत्वं धूसरत्वादीनां त्वशोभनत्वमिति सदसद्योगः ।' अत्र हि शशिप्रभृतिषु धूसरादेरत्यन्तमनुचितत्वमिति विच्छित्तिविशेषस्यैव शोभनत्वे प्रक्रमादिति । इह च खलेकपोतवत्सर्वेषां कारणानां साहित्येनावतारः । समाध्यलङ्कारे त्वेककार्यं प्रति साधके समग्रेऽप्यन्यस्य काकतालीयन्यायेनापतनमिति भेदः ।

'अरुणे च तरुणि नयने तव मलिनं च प्रियस्य मुखम् ।
मुखमानतं च सखि ते ज्वलितश्चास्यान्तरे स्मरज्वलनः ॥'

अत्राद्येऽर्धे गुणयोर्यौगपद्यम्, द्वितीये क्रिययोः । उभयोर्यौगपद्ये यथा—

'कलुषं च तवाहितेष्वकस्मात्सितपङ्केरुहसोदरश्रि चक्षुः ।
पतितं च महीपतीन्द्र तेषां वपुषि प्रस्फुटमापदां कटाक्षैः ॥'

गतत्वपर्यन्तानां ग्रहणम् । खलस्य तु स्वतोऽशोभनत्वं नृपाङ्गनगतत्वस्य शोभनत्वमिति वैपरीत्येन सदसद्योगः । मनोदुःखं प्रति धूसरत्वादिविशिष्टाश्चन्द्रादयः कारणानि कारणीभूतानां विशेष्याणां विशेषणानां च यथासंभवं सतामसतां च योग एव सदसद्योग इति भावः । अन्येषां मतमुपपादयति—**अत्र हीति** । विच्छित्तिविशेषस्यैवेत्येवकारेण मनसीत्यादेर्व्यावृत्तिः । नन्वेतन्निरर्थकमत आह—मनसीति । तथा च वाक्यसमापकत्वेनैव तत्सार्थकमिति भावः । प्रथममतं दूषयति—नृपाङ्गनगत इति । विशेषस्यैवेत्येवकारेण विशिष्टव्यवच्छेदः । तथा चात्र विशेष्यविशेषणयोर्योग एव वैचित्र्यावहो न तु विशिष्टानां योगः । कृतभेदरूपदोषावहत्वादिति भावः । समाध्यलंकारादस्य भेदमाह—**इहेति** । साहित्येन मिलितत्वेनावतारः । **समग्रे** समर्थे पर्याप्ते काकतालीयन्यायेन अप्रतिसंहितत्वेनापतनमुपस्थापनम् । यत्र कार्यविशेषं मिलितान्येव कारणानि जनयन्ति समुच्चयस्य विषयः । यत्र त्वेकस्मिन्कारणे फलसाधनायानुष्ठीयमाने दैवादुत्पन्नेन कारणान्तरेण तत्फलस्य सुकरत्वं स समाधिरिति भावः ॥ गुणयौगपद्ये समुच्चयमाह—**अरुणे चेति** । नायिकां प्रति सख्या उक्तिरियम् । नयने स्तः इति शेषः ॥ **कलुषमिति** । रोषकषायितमित्यर्थः । सितपङ्केरुहस्य सोदरी सदृशी श्रीः शोभा यस्य तत् । अस्य वैयधिकरण्ये एव प्रयोगप्राचुर्यं विच्छित्तिविशेषजनकत्वं च । क्वचि-

१. 'मनस्यानं' इति क्वचित्पुस्तकेऽधिकम् ।

SÂHITYA-DARPAṆA

BY

VIS'VANÂTHA KAVIRÂJA

With the commentary of

RÁMACHARANA TARKAVÂGÎS'A BHATTÂCHÂRYA



ANNOTATED

With Introduction and Explanatory Commentaries

BY

MAHAMOHAPADHYAYA

PANDIT DURGÂPRSÂDA DVIVEDA

Principal, Maharaja's Sanskrit College, Jaipur

Member of the Court and Faculty of Oriental Learning of the Benares Hindu University.

Fourth Edition.

PUBLISHED BY

PÂNDURANG JÂWAJÎ,

Proprietor of the "Nirnaya-Sâgar" Press,

BOMBAY.

1922.

Price 4 Rupees.

SÂHITYA-DARPAṆA

BY

VIS'VANÂTHA KAVIRÂJA

With the commentary of

RÁMACHARAṆA-TARKAVÂGÍS'A BHATTÁCHÁRYA.



ANNOTATED

With Introduction and Explanatory Commentaries

BY

MAHAMOHAPADHYAYA

PANDIT DURGÂPRSÂDA DVIVEDA

Principal, Maharaja's Sanskrit College, Jaipur

Member of the Court and Faculty of Oriental Learning of the Benares Hindu University

Fourth Edition

PUBLISHED BY

PÂNDURANG JÂWAJI,

Proprietor of the "Nirnaya-Sâgar" Press,

BOMBAY

1922.

Price 1 Rupee

साहित्यदर्पणः ।



श्रीविश्वनाथ-कविराज-प्रणीतः ।

श्रीरामचरण-तर्कवागीश-भट्टाचार्य-कृतया

विवृत्या समेतः ।

जयपुरराजकीयसंस्कृतकालेजाध्यक्ष-काशीहिन्दुयूनिवर्सिटी-

सभास्तार-सत्संप्रदायाचार्य-महामहो-

पाध्यायपदभाजा

श्रीदुर्गाप्रसादद्विवेदेन

संकलितया छायाख्यविवृतिपूर्त्या परिष्कृतः ।



स च

मुम्बय्यां निर्णयसागराख्ययन्त्रालये तदधिपतिनाङ्कयित्वा

प्राकाश्यं नीतः ।

४ संस्करणम् ।

शके १८४४, सन १९२२.

मूल्यं ४ रूप्यकाः



इति । तदेतद्, सूक्तिरत्नैस्य [illegible] [illegible] [illegible] भावकत्व [illegible] [illegible] [illegible] एवं च [illegible] [illegible], [illegible] प्रतिभान परिभावनीयम् । तथा—[illegible], [illegible] वा [illegible] वा [illegible] [illegible] वा [illegible] वा प्रतिभानिनो वा [illegible], [illegible] [illegible] वा [illegible] वा [illegible] । प्रकृते [illegible] [illegible] [illegible] [illegible] । तत्र शिक्षा तावत्—(१) [illegible] वा शिक्षा [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] पतञ्जलिना [illegible]—[illegible] —' इत्यादि (प) । तथा प्राकृत [illegible]—[illegible] [illegible]' (गाथा १।२) इत्यादि । एतदनन्तरं [illegible] —

'अनभ्रवृष्टिः श्रवणामृतस्य
　सरस्वती विभ्रम-जन्मभूमिः ।
वैदर्भरीतिः [illegible]
　[illegible] ।'
'जयति [illegible]
　[illegible] ।
[illegible]

ऽति निरवाचि । निघण्टुप्रभृतीनां मध्वादीनामेतदनुसारेणैव व्युत्पादनम् । बहुत्र ग्रन्थान्तरे सत्स्वप्यहोरात्रादिनो होगैरिदवद्व्युत्पादनमेतदुपदर्नेव निर्धीयत इत्यलं ग्रन्थान्तरेण । प्रकृते चैतानि स्वार्तानि चोदाहरणानि बहूनि । तत्रिदन्तु—

> 'मधुकैटभदानवेन्द्रमेदः-
> स्रुवविन्स्रा विषमेव मेदिनीयम् ।
> अधिवास्य यदि स्वकैर्यशोभि-
> र्भिरसैनामुपभुञ्जते नरेन्द्राः ॥' (अनर्घ. १।२४)

इत्यादिकमूह्यम् । एवं च मेदसो मेदिनीति नैरुक्ता । मिद्यतेस्तु वैयाकरणाः ॥

(५) छाद्यते, वा छाद्यतेऽनेनेति छन्द इति नैरुक्ताः । चन्दतेऽनेनेति तु वैयाकरणाः । तत्र वेदस्तावदपि कुत्सितु पापकेभ्य: ... कर्माणि ... छादयतीति ... । ...—

> 'द्विजपुरपरिभवकारी यो
> नरपतिरतिधनलुब्धात्मा ।
> ... निपतति पापोऽसौ
> ... पवनहतं वृन्तात् ॥'

पुरुषस्त्वमेव किल पञ्चविंशकः
स्फुटचूलिकार्थवचनैर्निगद्यसे ॥'
(हरविजये ६।१८)

'मैत्र्यादिचित्तपरिकर्मविदो विधाय
क्लेशप्रहाणमिह लब्धसबीजयोगाः ।
ख्यातिं च सत्त्वपुरुषान्यतयाऽधिगम्य
वाञ्छन्ति तामपि समाधिभृतो निरोद्धुम् ॥'
(शिशु. ४।५५)

[illegible] —

'श्रौतं शुभे जागरूकमसि फलयोगे ऋतुमतां
क्रतौ ध्वस्ते प्रध्वस्तं फलति पुरुषाराधनमृते ।
अतस्त्वां संप्रेक्ष्य क्रतुषु फलदानप्रतिभुवं
श्रुतौ श्रद्धां बद्ध्वा कृतपरिकरः कर्मसु जनः ॥'
[illegible] ।

[illegible] ।
[illegible] ॥'

'कालः स्वभावो नियतिर्यदृच्छा
भूतानि योनिः पुरुष इति चिन्त्या।
संयोग एषां न त्वात्मभावा-
दात्माप्यनीशः सुखदुःखहेतोः॥' (१।२)

इति कालस्वभावादिवादवादिन्या **श्वेताश्वतराणां** मन्त्रोपनिषदा व्यक्ततरमवसीयते। एवं **वाजसनेयिना** ब्राह्मणोपनिषदा—'इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानि' इति। एवमेव **छान्दोग्योपनिषदापि**—'इतिहासपुराणं पञ्चमो वेदानां वेदः पित्र्यो राशिर्दैवो निधिर्वाकोवाक्यमेकायनं देवविद्या ब्रह्मविद्या भूतविद्या क्षत्रविद्या नक्षत्रविद्या सर्पदेवजनविद्या' इति। साहित्यप्रतिपाद्यं दृश्यकाव्यमधिकृत्य भगवता **भरतेन** तु स्पष्टमाम्नातम्—

'जग्राह पाठ्यमृग्वेदात्सामभ्यो गीतमेव च।
यजुर्वेदादभिनयान्रसानाथर्वणादपि॥'
(नाट्यशा० १।१७)

आग्नेये तु श्रव्यदृश्ये उभे अपि काव्ये सम्यग् व्युत्पादिते इत्युपरिष्टान्निवेदयिष्यते। एतेनान्यशास्त्रवत् साहित्यस्यापि वेदोपजीवकत्वम्, तत एव साहित्यमूलस्य वेदाङ्गोपाङ्गसमानकालिकत्वं च प्रतिपत्तव्यम्॥

तत्रभवतो **राजशेखरस्य** काव्यमीमांसायां कविरहस्ये तु निरूपितार्थो महतार्थवाचेन प्रस्तूयते—"यथोपदिदेश श्रीकण्ठः परमेष्ठिवैकुण्ठादिभ्यश्चतुःषष्टये शिष्येभ्यः। सोऽपि भगवान् स्वयम्भूरिच्छाजन्मभ्यः स्वान्तेवासिभ्यः। तेषु सारस्वतेयः वृन्दीयसामपि वन्द्यः काव्यपुरुष आसीत्। तं च सर्वसमयविदं दिव्येन चक्षुषा भविष्यदर्थदर्शिनं भूर्भुवःस्वस्त्रितयवर्तिनीषु प्रजासु हितकाम्यया प्रजापतिः काव्यविद्याप्रवर्तनार्थं प्रायुङ्क्त। सोऽष्टादशाधिकरणीं दिव्येभ्यः काव्यविद्यास्नातकेभ्यः सप्रपञ्चं प्रोवाच। तत्र कविरहस्यं सहस्राक्षः समाम्नासीत्, औक्तिकमुक्तिगर्भः, रीतिनिर्णयं सुवर्णनाभः, आनुप्रासिकं प्रचेतायनः, यमकानि-चित्रं चित्राङ्गदः, शब्दश्लेषं शेषः, वास्तवं पुलस्त्यः, औपम्यमौपकायनः, अतिशयं पाराशरः, अर्थश्लेषमुतथ्यः, उभयालङ्कारिकं कुबेरः, वैनोदिकं कामदेवः, रूपकनिरूपणीयं भरतः, रसाधिकारिकं नन्दिकेश्वरः, दोषाधिकरणं धिषणः, गुणौपादानिकमुपमन्युः, औपनिषदिकं कुचमार इति। ततस्ते पृथक् पृथक् स्वशास्त्राणि विरचयांचक्रुः।

इत्थं गुरुभ्यो गिरः पुण्याः पुराणीः शृणुमः स्म, यस्मिन् **धिषणं** शिष्याः कथाप्रसङ्गे पप्रच्छुः, कीदृशः पुनरसौ **सारस्वतेयः** काव्यपुरुषो वो गुरुरिति। स तान् बृह-

---

* काल इति कालवादिनः, स्वभाव इति लौकायतिकाः, नियतिरिति मीमांसकाः, [illegible]ति [illegible]ः, भूतानीति [illegible]वादिनः, योनिरिति प्रकृतिवादिनः, पुरुष इत्यात्मवादिनः कारणं प्रतिपेदिरे॥

तापतिरुचे । पुरा पुत्रीयन्ती सरस्वती तुषारगिरौ (तपस्यामास) प्रीतेन मनसा तां विरिञ्चिः प्रोवाच–पुत्रं ते सृजामि । अथैषा काव्यपुरुषं सुषुवे । सोऽभ्युत्थाय सपादोपग्रहं छन्दस्वतीं वाचमुदचीचरत् ।

यदेतद्वाङ्मयं विश्वमर्थमूर्त्या विवर्तते ।
सोऽस्मि काव्यपुमानम्ब पादौ वन्देय तावकौ ॥

तामाम्नायदृष्टचरीमुपलभ्य भाषाविषये छन्दोमुद्रां देवी ससंभ्रममङ्कपर्यङ्केनादाय तमुदलापयत् । वत्स, सच्छन्दस्काया गिरः प्रणेतः, वाङ्मयमातरमपि मातरं मां विजयसे । प्रशस्यतमं चेदमुदाहरन्ति यदुत 'पुत्रात्पराजयो द्वितीयं पुत्रजन्म' इति । त्वत्तः पूर्वे हि विद्वांसो गद्यं ददृशुर्न पद्यम् । त्वदुपज्ञमथातः छन्दस्वद्वचः प्रवर्त्स्यति । अहो श्लाघनीयोऽसि । शब्दार्थौ ते शरीरम्, संस्कृतं मुखम्, प्राकृतं बाहुः, जघनमपभ्रंशः, पैशाचं पादौ, उरो मिश्रम् । समः प्रसन्नो मधुर उदार ओजस्वी चासि । उक्तिचणं च ते वचः, रस आत्मा, रोमाणि छन्दांसि, प्रश्नोत्तर-प्रवह्लिकादिकं च वाक्केलि, अनुप्रासोपमादयश्च त्वामलंकुर्वन्ति । भविष्यतोऽर्थस्याभिधात्री श्रुतिरपि भवन्तमभिस्तौति—

चत्वारि शृङ्गा त्रयो अस्य पादा
द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति
महो देवो मर्त्यां आ विवेश ॥ (ऋ सं. ३ अष्ट. ८ अ. १० व.)

'तथापि संवृणु प्रगल्भस्य पुंसः कर्म, बालोचितं चेष्टस्व' इति निगद्य निवेद्य चैनमनोकहाश्रयिणि गण्डशैलतलतल्पे स्नातुमभ्रगङ्गां जगाम । तावच्च कुशान् समिधश्च समाहर्तुं निःसृतो महामुनिरुशनाः परिवृत्ते पूषण्युष्मोपहतं तमद्राक्षीत् । कस्यायमनाथो बाल इति चिन्तयन् स्वाश्रमपदमनैषीत् । क्षणादाश्वस्तश्च स सारस्वतेयस्तस्मै छन्दस्वतीं वाचं समचारयत् । अकस्माद्विस्मापयन् स चाभ्युवाच—

या दुग्धापि न दुग्धेव कविदोग्धृभिरन्वहम् ।
हृदि नः संनिधत्तां सा सूक्तिधेनुः सरस्वती ॥ इति ।

तत्पूर्वकमध्येतॄणा च सुमेधस्त्वमादिदेश । ततः प्रभृति तमुशनसं सन्तः कविरित्याचक्षते । तदुपचाराच्च कवयः कवय इति लोकयात्रा कविशब्दश्च 'कवृ वर्णे' इत्यस्य धातोः काव्यकर्मणो रूपम् । काव्यैकरूपत्वाच्च सारस्वतेयोऽपि काव्यपुरुष इति भक्त्या प्रयुज्यते । ततश्च विनिवृत्ता वाग्देवी तत्र पुत्रमपश्यन्ती मध्येहृदयं चक्रन्द । प्रसङ्गतश्च वाल्मीकिर्मुनिवृषा सप्रश्रयं तमुदन्तमुदाहृत्य भगवत्यै भृगुसूनोराश्रमपदमदर्शयत् । सापि प्रस्नुतपयोधरा पुत्रायाङ्कपालीं ददाना शिरसि च चुम्बन्ती स्वस्तिमता चेतसा प्राचेतसायापि महर्षये निभृतं सच्छन्दांसि वचांसि प्रायच्छत् । अनुप्रेषितश्च स तया निषादनिहतसहचरीकं क्रौञ्चयुवानं करुणकेङ्कारयाणिरं क्रन्दन्तमुदीक्ष्य शोकवाञ्श्लोकमुज्जगाद—

[illegible] । तमात्मदेवं शरण प्रपद्ये संसारसागरनिमज्जनत्रासत्रम [illegible] । [illegible] योगदर्शने—'क्लेशकर्मविपाकाशयैरपरामृष्ट' [illegible] ' (१ । २४) इत्येष लक्षणत सूत्रित पुनर्व्याचिख्यासायां— [illegible] ' (१ । २६) इत्यनेन गुणप्राधान्यविभक्त [illegible] । [illegible] न 'हिरण्यगर्भः समवर्तताग्रे—' (ऋ. सं. ८ [illegible]) [illegible] 'स वै शरीरी प्रथम स वै पुरुष उच्यते। [illegible] ॥' इति स्मृत्या प्रथमशरीरिणो ब्रह्मणो [illegible] प्रतीयते । तत्र पूर्वं द्वितीयस्य शरीरिण श्रवणस्मरणा [illegible] हरि वेदा प्रादुर्बभूवुरिति । तत एव 'तेने [illegible]' इत्यादि स्मर्यते गोप्यमादिकालो ब्रह्मद्वारको वेदाना [illegible] । [illegible]—'यज्ञेन वाच पदवीयमायन्तामन्व [illegible]' ([illegible] ८. २. २३) इति । 'युगान्तेऽन्तर्हितान्वे [illegible] । [illegible] पूर्वमनुज्ञाता स्वयंभुवा ॥' इति ।

[illegible] सृष्ट्यादिरपि तत्प्रणयनकालो न भवितु [illegible] 'वाचा विरूप नित्यया' (ऋ. स. ६. ५. २५) [illegible] । एतदेवाकलय्य भगवता जैमिनिना पूर्वमी [illegible]' (१ । १ । ६) इत्यादिद्वादशसूत्रैरनित्यत्वं [illegible] परार्थत्वात्' (१ । १ । १८) इत्यादि [illegible] । [illegible]मीमांसायामपि भगवता पाराशर्येण [illegible] सूत्रयताऽपि । 'अत एव च नित्यत्वम्' [illegible] व्यवस्थापितम् ।

[illegible]—'उतासि मैत्रावरुणो वसि[illegible] । [illegible] ब्रह्मणा दैव्येन विश्वेदेवा पुष्करे [illegible]) इति । [illegible] निरुक्तम् (५. अ [illegible]) इति च, [illegible] निरुक्त ([illegible]) [illegible] म[illegible] । [illegible]

[illegible]

उपलभ्यन्ते । तथाहि—**छान्दोग्ये** "यो ह वै वसिष्ठं वेद, वसिष्ठो ह स्वानां भवति. वाग्वाव वसिष्ठः" इति **वसिष्ठपदार्थव्युत्पादनम्** । एवमन्येषामपि व्यवस्था द्रष्टव्या । **निरुक्ते** "—इन्द्रशत्रुः तत्को वृत्रो मेघ इति नैरुक्ताः, त्वाष्ट्रोऽसुर इत्यैतिहासिकाः अपां च ज्योतिषा च मिश्रीभावकर्मणो वर्षकर्म जायते तत्रोपमार्थेन युद्धवर्णा भवन्ति, अहिवत्तु खलु मन्त्रवर्णा ब्राह्मणवादाश्च—" (२. ५. २) इति **वृत्रवधतत्त्वम्** । एवं **प्रजापतेः** सुतानुगमनम्, **इन्द्रस्य** अहल्योपगमनम्, इत्यादि निगूढतात्पर्यतया [illegible]मुपलभ्यते । श्रूयते हि ऋक्संहितायां 'इम [illegible] उषो न जार—' (१. ५. १३) इति । 'उषो न जार [illegible]—' (५ २ १३) इति च । एतदेव पुनर्ऋक्संहितायाः **ऐतरेये** ब्राह्मणे—'प्रजापतिर्वै स्वां दुहितरमभ्यध्यायद् दिवमित्यन्य आहुरुषसमित्यन्ये तामृश्यो भूत्वा रोहितं भूतामभ्यैत्—' इति कथारूपेण निरूपितम् । अत्र कुमारिलभट्टास्तन्त्र**वार्तिककाराः**—'प्रजापतिस्तावत्प्रजापालनाधिकारादादित्य एवोच्यते । स चारुणोदयवेलायामुषसमुद्यन्नभ्यैत् । सा तदागमनादेवोपजायत इति तद्दुहितृत्वेन व्यपदिश्यते । तस्यां चारुणकिरणाख्यबीजनिक्षेपात्स्त्रीपुरुषयोगवदुपचारः इत्यादि' । [illegible] 'प्रजानाथ [illegible] स्वां दुहितरं [illegible] रिरंसुम् [illegible] वपुषा । [illegible] दिवमपि [illegible] ॥' इति [illegible] । एवमेव **ऋक्संहितायां** 'उदीरय पितरा जार [illegible]—' (७. ३ १०) इति । [illegible] **तैत्तिरीयारण्यके** '—[illegible], [illegible] जार. [illegible]—' (१. १२) इति **पाणिनि**-सूत्रे [illegible] (१ । २ । २७) तथा **शतपथ**ब्राह्मणे (३. ३. ४. १८) । [illegible] (१ ४८-४९) [illegible] **निरुक्तकाराः**—'[illegible] जार उच्यते [illegible]—' (३. ३ ४) । **वार्तिककाराः** [illegible]—'[illegible]

[illegible]

[illegible]



भूमिका ।

...तस्यसत्यापूर्तिरपि [illegible] विवेचनीयात्र । अतो नित्या वेदा इत्येत्र [illegible] ऋग्वेदादिभाष्यभूमि-
स्थितम् ॥

यत्वत्र साम्प्रतिका वेदव्याख्यातारो दयानन्दस्वामिन [illegible] त्रेधा भ्रमोऽस्ति । [illegible] काणां वेदानां नित्यत्व[illegible] तदुत्पत्तिगणनात्मकाद्यन्तत्र [illegible] उत्पत्तिकालप्रदर्शने स्वायंभुवादिमन- नित्यस्योत्पत्तिकालप्रदर्शनं प्रथमो भ्रमः । एतावद्वर्षपर्यन्तम् [illegible] परिगणितो द्वितीयो [illegible] मन्वन्तराधिकालस्य (१२०९६०००) [illegible] मनु [illegible] चतुर्दश भ्रमः । [illegible] भवति ७१×१४=९९४ । तत्पूर्वं [illegible] मन्व एवं [illegible] उत्पत्तिकालोऽपि यदि [illegible] वेदनित्यत्वं [illegible] घटते । [illegible] तीयो भ्रमः । परं नहि [illegible] [illegible] मानुषयुगानि ।

[illegible]पद्धति —

दैवयुगानि ।

१२००००=(३६०×१२००००)=४३२००००

[illegible]=(१०००×४३२००००)=४३२००००००० [illegible]

ब्र. दि=१०००×१२०००००=[illegible] ४३२४०८००००

अथवा, एवमनुमान [illegible] चतुर्दशगुणं [illegible]

[illegible] =५९२००००=[illegible]१५७२८००० [illegible]

[illegible]—

[illegible]=२०६७२००००

७१×मनु ४३२००००=१८४०३२००००

६×२०६७२००००= १२०९६०००

७×[illegible] १२०९६००० = [illegible]

=७×४३२०००० = १७२८०००

[illegible] = १२९६०००

त्रेता = ८६४०००

द्वापरम् = [illegible]

[illegible] = [illegible]

[illegible]

न च वेदविहारोऽयं संश्राव्यः शूद्रजातिषु ।
तस्मात्सृजापरं वेदं पञ्चमं सार्ववर्णिकम् ॥
एवमस्त्विति तानुक्त्वा देवराजं विसृज्य च ।
सस्मार चतुरो वेदान् योगमास्थाय तत्त्ववित् ॥
धर्म्यमर्थ्यं यशस्यं च सोपदेशं ससंग्रहम् ।
भविष्यतश्च लोकस्य सर्वकर्मानुदर्शकम् ॥
सर्वशास्त्रार्थसंपन्नं सर्वशिल्पप्रवर्तकम् ।
नाट्याख्यं पञ्चमं वेदं सेतिहासं करोम्यहम् ॥
संकल्प्य भगवानेवं सर्वान्वेदाननुस्मरन् ।
नाट्यवेदं ततश्चक्रे चतुर्वेदाङ्गसंभवम् ॥'

(१ अ. २—१६ श्लो)

एतेन वैवस्वताख्यस्य सप्तमस्य मनोः कस्मिंश्चित्त्रेतायुगे राज्ञो नहुषस्य राज्य[illegible], यद्वा [illegible] प्राग् द्वापरयुगे प्रोक्तेभ्यः पुराणेभ्यः पूर्वं त्रेतायुगे नाट्यशास्त्रस्य प्रणयनमिति व्यक्तम् । तत्र प्रथमकोटावन्यो नहुषो द्वितीयको[illegible] [illegible] । नहुषश्च आयुषः पुत्रो ययातेः पितेति महाभारतम् (आदिपर्व. ९५ अध्या ७ ग.) ॥

अत्र मनुष्यस्य यावदायु संभाव्यते तावतो बहुधिकनिबन्धनादिदानींतना इतिहासपुराणेषु [illegible]ऽन्यथा गमयन्तोऽपि वस्तुतो न विश्रान्तिं संधत्ते । [illegible] । यद् यथोत्पादितं तत् तथैव परीक्षितं स्वरूपप्रतिष्ठितं भवति । [illegible] तु [illegible]प्रतिष्ठितमेव । नहि मृद्व्यतिरेकेण निभा[illegible] [illegible] । एवमस्माकमार्यावर्तभुवामितिहास पुराणं [illegible], किंतु पात[illegible]लादिप्रख्यातयोगवि[illegible] (यो ० सि पा) तत्रतत्र विलक्षणदेशकालपात्रघटितमपि [illegible] । अत एव भगवता वेदव्यासेन—

'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति ॥

(म. भा. आदिप. १ अ, २६७ श्लो.)

[illegible] निर्धार्यते । न स्यादप्येवमादरसूरिति[illegible], यदि [illegible] प्रवर्तमानं सिध्येत् । [illegible] । अत एव यत्र प्रमेयानवबोधेन कुतर्का[illegible] [illegible] न पश्यति' इत्यनेन परिक्षिप्यते ।

[illegible] प्रयोगेन [illegible]

[illegible] नवसंयम ।

[illegible], [illegible]

यदि चात्र सांप्रतिकपर्यालोचनदृष्ट्या कालसंकोचचिकीर्षया मीमांसकानां सहस्रसंवत्सरशब्दस्य सहस्रदिनपरताधिकरणन्यायोऽवतार्येत (जैमिनिद. ६ अ. ७ पा. १३ अधि.), तदापि विसंवादाधिक्यदवस्थ एवाभिलक्ष्यते । यतस्तत्र साधारण्येनाधिकारिचिन्तायां ब्राह्मणानुगृहीतः कालसंकोच आश्रीयते; इह पुनरविशेषेण कालकलनायां गमकाननुगृहीतः कालसंकोचो विकाशो वा कथमाश्रीयेत । या च शतायुःश्रुतिः, सापि युगपरतया मन्वादिभिः स्मर्यते (म. स्मृ. १ अ. ८१–८४ श्लो.), इत्थं सेतिहासपुराणाभ्यामेव किमपराद्धम् । यत्तदुक्तजातं गमकानुपलम्भेऽप्यन्यथा नीयते । एतेन हि भगवन्तं **रामभद्रं** तत्पितरं तत्रभवन्तं **दशरथं** चाभिलक्ष्यीकृत्य प्रवृत्तम्—

'दशवर्षसहस्राणि दशवर्षशतानि च ।
रामो राज्यमुपासित्वा ब्रह्मलोकं प्रयास्यति ॥'

रा. वा. का. १. स. ९७ श्लो.

'षष्टिर्वर्षसहस्राणि जातस्य मम कौशिक ।'

(रा. वा. का. २० स. १० श्लो.)

इत्यादिवाक्यं नासंगतं मन्तव्यम् । बलादन्यथानयने तु सौरमानेन $\frac{१०१००}{३६०}$= २८$\frac{१}{१८}$ इति $\frac{६००००}{३६०}$=१६६$\frac{२}{३}$ इति तयोः कालावागच्छतः । अत्र द्वितीयस्याश्रद्धेयत्वेऽपि प्रथमः सर्वथाऽनुपपन्न एव । तथा तत्रैव **रामायणे** 'ऊनषोडशवर्षो मे रामो राजीवलोचनः' इत्येवमादिरप्येककालो दिनत्वेन परिणममानोऽतितरामनुपपन्नो द्रष्टव्यः । नैवमत्रैवानुपपत्त्या पराक्रम्यते । यानि पुनर्ज्यौतिषे **होरा**स्कन्धे नानाप्रकाराणि योगोत्थितानि पुरुषायुषाणि पठितानि तत्रापि विसंवादगलप्रहान्न मुच्यामहे । जैमिनीयन्यायोऽपि स्वातन्त्र्येणावतार्यमाणः कालकलनासु प्रमाणपदवीं नाधिरोहतीत्यपि दर्शितमेव । देशकालविषयविप्रकृष्यमाणानेकस्वरालापोऽपि दूरदर्शिभिरेकहेल्याऽवहेलयितुमशक्यः । प्रक्षेपोऽपि साक्षात्कारान् विशिष्य मूलस्कन्धादि कर्णेहत्य परीक्षणीयम् । तस्माद् वेदेष्विव तदङ्गोपाङ्गेष्वपि यद् यथा स्मर्यते व्यवस्थाप्यते वा तत् तथैव नीयमानं पूर्वापरं भवितुमर्हतीति स्थितम् ॥

इत्थमपि पुरातत्त्वं प्रकृत पर्यालोच्यम्—

'श्रुतौ शतायुः पुरुषः प्रदिष्टो
बहुत्वयोगी शतशब्दशक्त्यः ।
रामादिकानामधिकायुराप्तौ
युक्तं प्रतीमः फलितेऽमितायुः ॥' इति ।

बहुधं चात्र स्वमतानुसारेण अभिधातव्यम् । इदं च [illegible]
पुनरिदमपि पर्यालोच्यमेव—

'स धार्मिको [illegible] ([illegible])-

तत्रापरं (न्तिमं) ब्राह्मणगौरवेण (दर्शनेन)
स स्वीचकारेति विरोधभङ्गः ॥' इति ।

अथवा भवृत्तीयापरभोगस्य प्रथमान्तत्वे । महर्षिणाग्राहि (ऽमानि) विरोधशान्त्यै' इत्येवं चरमपाद पठनीयः ॥

प्रास्तावयं च प्राक् (भूमि. १८ पृ.) साहित्यस्य प्रबन्धा वन्धकाश्च क इति । तत्रावशिष्यते **पौराणिकी** कोटि । यत्र सूक्ष्मेक्षिकया निरीक्षणायामनेके वैज्ञानिका विषया पुरस्क्रियन्ते । इदानीं तु प्रस्तुतमुपक्षिप्यते यत्पुराणेष्वन्यतममाग्नेयमिति । इह विषयान्तरवत् साहित्यविषयोऽपि **भामहा**दिग्रन्थेभ्यस्तत्पूर्वेभ्यो वा संक्रामित , आहोस्विद् वेदार्थोपवृंहकेभ्य आग्नेयादिभ्य एव भामहादिग्रन्था व्यधायिषत । तत्राद्यकोटिर्विशीर्यते **बृहत्कथा**रघुवंशादिपर्यालोचनेन तत्कर्तृकालेऽपि कविकर्मपद्धतेरवश्यंभावाद्, यत्प्रयातान्येतानि **गुणाढ्य**कालिदासादिसूक्तान्यसाकमवलम्बनानीति । आलंकारिकेषु भामहवर्जं नान्य कश्चन चिरतनत्वेन सम्प्रति सभावनामारूढ इति वहव । भामहग्रन्थस्तदुपज्ञमित्यपि न सिध्यति । यस्मात्तस्मादेव—

'रूपकादिरलंकारस्तस्यान्यैर्बहुधोदितः ।
न कान्तमपि निर्भूषं विभाति वनिताननम् ॥ १३ ॥
रूपकादिमलंकारं बाह्यमाचक्षते परे ।
सुपां तिङां च व्युत्पत्तिं वाचां वाञ्छन्त्यलंकृतिम् ॥ १४ ॥
तदेतदाहुः सौशब्द्यं नार्थव्युत्पत्तिरीदृशी ।
शब्दाभिधेयालंकारभेदमिष्टं द्वयं तु नः ॥ १५ ॥'

(१ परिच्छे)

इत्येवेन, तथा—

'इति निगदितास्तास्ता वाचामलंकृतयो मया
बहुविधकृतीर्दृष्ट्वान्येषां स्वयं परितर्क्य च ।
प्रथितवचसः सन्तोऽभिज्ञाः प्रमाणमिहापरे
गुरुतरधियामस्याराध्यं मनोऽकृतबुद्धिभिः ॥ १६ ॥

(१५ परिच्छे)

इत्येवमन्तिमेन च पद्येन सूचित प्राचां काव्यानुशासनानां ज्ञापनात् । नाट्यशास्त्रे हि—

'उपमा दीपकं चैव रूपकं यमकं तथा ।
काव्यस्यैते ह्यलंकाराश्चत्वारः परिकीर्तिताः ॥'

(१६ अ ४१ श्लो.)

[illegible] उद्दिश्य तथैव तत्र—

गूढार्थमर्थान्तरमर्थहीनं
भिन्नार्थमेकार्थमभिप्लुतार्थम् ।

[illegible] ष्वभ्युद्धृतम् ।'

न्यायादपेतं विषमं विसंधि
शब्दच्युतं वै दशकाव्यदोषाः ॥'
(१६ अ. ८४ श्लो.)

श्लेषः प्रसादः समता समाधि-
र्माधुर्यमोजः पदसौकुमार्यम्।
अर्थस्य च व्यक्तिरुदारता च
कान्तिश्च काव्यार्थगुणा दशैते ॥'
(१६ अ. ९२ श्लो.)

[illegible] दश दोषान्तरवन्तो गुणा उद्दिष्टा यथोद्देशं लक्षिताश्च। एत एव काव्या[illegible] [illegible]—'[illegible]प्रसाद[illegible]समतासमाधिमाधुर्यसौकुमार्योदारता[illegible]व्यक्ति[illegible] [illegible]गुणा' ([illegible] १ अध्या ४ सू) इति वामनेनोक्ता 'मा[illegible] [illegible] इति प्रकाशकारादिभि[illegible] प्रसादेन [illegible] [illegible] प्रसाद [illegible] न पुनर्दश [illegible]। परमेते (दश गुणा) वामनत [illegible] [illegible]। [illegible]वामन[illegible]तो गुणा[illegible] [illegible] दण्डिन काव्यादर्शेऽपि सन्ति। [illegible] ख्यातिनारदपुष्कराद्दीना [illegible] [illegible]। [illegible] इति [illegible] (२।२।११८—[illegible] [illegible] एतेऽपि [illegible] [illegible]। [illegible] 'पारसर्ष्व[illegible] [illegible] शिलालिकृशा[illegible] [illegible] इति पाणि[illegible] [illegible]। दण्डिन [illegible]। एव [illegible]

[illegible]

वर्षाणां द्वादशशती षष्टिः षड्भिश्च संयुता ।
भूभुजां कालसंख्यायां तद्द्वापञ्चाशतो मता ॥'

इत्ययं द्वापञ्चाशतो राज्ञां कालः =१२६६ स च न संवदति । एतदुक्तं भवति— यदि नाम प्रकृतोपयुक्ता सप्तर्षीणां गतिर्नोपलभ्यते, तर्हि तया युधिष्ठिरकालनिर्णयोऽशक्यः । अत्र सिद्धान्ततत्त्वविवेके कमलाकरभट्टाः ।

'अद्यापि कैरपि नरैर्गतिरार्यवर्यै-
    र्दृष्टा न या च कथिता किल संहितासु ।
तत्काव्यमेव हि पुराणवदत्र तज्ज्ञा-
    स्तेनैव तत्त्वविषयं गदितुं प्रवृत्ताः ॥'

(भग्रह. ३२)

इत्यादि निर्णयन्ति । तथा सिद्धान्तदर्पणे चन्द्रशेखराचार्या अपि—

'सप्तर्षीणां ध्रुवः प्राग्भिर्नोक्तः संचारसंभवात् ।
तथाप्यनुभवात्तेषां व्यवस्था क्रियतेऽधुना ॥
पूर्वाग्रं शकटाकारमुदक्स्थमुडुसप्तकम् ।
सप्तर्षिमण्डलं प्रोक्तं व्यक्तं विश्वनमस्कृतम् ॥
तत्पूर्वोन्नतरेखाग्रे मरीचिः पश्चिमे ततः ।
वसिष्ठोऽरुन्धतीयुक्तस्तत्पश्चादङ्गिराः स्थितः ॥
तत्पश्चाच्चतुरस्रस्य शम्भुदिश्यत्रिरस्य तु ।
पुलस्त्यो दक्षिणे तस्य पश्चिमे पुलहः स्थितः ॥
क्रतुस्तदुत्तरस्थानस्तत्प्रोक्तौ पुलहक्रतू ।
ध्रुवसूत्रेण यद्भस्थौ तद्भक्षस्था महर्षयः ॥
कथ्यन्ते सांप्रतं (४९७०)सिंहे भूभुजां(२१)शान्तगौ हि तौ ।
कालांशैर्विश्वकैः १३ प्राच्यां पुलस्त्यो वर्तते ततः ॥
ततस्तैः सायके (५) रत्रिरङ्गिरा नवभि(९)स्ततः ॥
ततोऽष्टाभि(८)र्वसिष्ठोऽस्मान्मरीचिर्वर्ततेऽष्टभिः(८) ॥'

[illegible]—

'प्रत्यब्दं प्राग्गतिः प्रोक्ता पुराणैरष्टलिप्तिकाः ।
नैषां नो निश्चिता पूर्वानुभवाद्दर्शनान्मया ॥'

[illegible] । एतेन [illegible]भावात् ६५३ एतावत्कलिगतमानं तदानीं [illegible] । [illegible] वर्षानन्तरमेव ६५३ वर्षानन्तरमपि [illegible] सप्तर्षिसंवत् (लौकिकाब्द·) इव कलियुगसंवत् ([illegible]) [illegible] । नहि ३१७५-२५२२=६५३ [illegible], वा [illegible], [illegible] युधिष्ठि[illegible] । तस्मात्—

भारतं द्वापरान्तेऽभूद्वार्तयेति विमोहिताः ।
केचिदेतां मृषा तेषां कालसंख्यां प्रचक्रिरे ॥'

इत्यन्यथा परिणतां महामात्यचण्यकसूनोः कल्हणस्य कृतिमुपेक्ष्यात्रायमष्ट-नृपावल्यां ६५२ एतावन्ति वर्षाणि सङ्कल्प्य ३१७९ एतावदेव सर्वसमत्या कलि-गतं (कलियुगसंवत्) शकारम्भसमये मन्तव्यम् । एवमप्यत्र नीलमुनिरात्मन काश्मीरिकपुराणमतं न जहातीति परीक्षणीयम् । इत्थंच पूर्वदत्तसंहितावाक्ये युधिष्ठिर इत्यत्र लक्षणया कलिंश्चित्तत्सुताने नृपर्नाः पृथ्वीं शासतीत्युन्नेयम् । किंवा, यथाश्रुतार्थे 'गोद्विसूगाङ्कत्रियुतः' इति पाठश्च स्यादिति संक्षेपः ॥

अथात्र किञ्चिदैतिहासिकदृष्ट्यापि विविच्यते—राज्ञः शंतनोर्गङ्गायां गाङ्गेयो भीष्मो जज्ञे (म. भा. आदिप. १०० अ.) । कन्या पराशरात् सत्यवत्या पारा-शर्यो व्यासः कानीनश्च (म. भा. आदिप. १०५ अ.) शंतनुर्विवाहितायां सत्यवत्यां चित्राङ्गदविचित्रवीर्यौ जनयामास । तत्र विचित्रवीर्योऽम्बिकाऽम्बा-लिके काशिराजसुते उपयेमे । ततश्च—

'ताभ्यां सह समाः सप्त विहरन्पृथिवीपतिः ।
विचित्रवीर्यस्तरुणो यक्ष्मणा समगृह्यत ॥
सुहृदां यतमानानामाप्तैः सह चिकित्सकैः ।
जगामास्तमिवादित्यः.

(म. भा. आदि प. १०२ अ) । मातुः सत्यवत्या आज्ञया पाराशर्यो विचित्रवी-र्यस्य क्षेत्रेऽम्बिकायां धृतराष्ट्रं तथाम्बालिकायां पाण्डुमुत्पादयामास (म. भा. आदिप. १०६ अ.) । पाण्डोर्युधिष्ठिरादयः (म. भा. आदिप. १२३ अ) 'सव्य-साचिनोऽर्जुनाद् अभिमन्युः, अभिमन्योः परीक्षित्, परीक्षितो जनमेजयः' । एवं पाण्ड-वानां वंशजो जनमेजय, येन पृष्टः पाराशर्यो महाभारतं (जय) चक्रे (म. भा. आदि-प. १ अ.) । [illegible] जनमेजय [illegible] ३६ वर्षाणि [illegible], तथा—

'आकर्णपलितः श्यामो वयसाशीतिपञ्चकः (८५)
रणे पर्यचरद् द्रोणो वृद्धः षोडशवर्षवत् ।'

(म. भा. द्रोणप. १२५ अ. ७२ श्लो.) इत्यनेन, तथा—

'वयः प्राप्य परीक्षित्तु [illegible] च । ३६ ।'
[illegible] सर्वास्त्राण्युपलब्धवान् ।
[illegible] । १४ ।
षष्टिं (६०) वर्षाणि [illegible] ।'

(म. भा. [illegible] अ.) [illegible] ८५-६०-३६=१०९ [illegible] महाभारत [illegible] । [illegible]
[illegible] —

'[illegible] ।
[illegible] ।'

(म. भा. [illegible]) [illegible]

र्थात् ३१००—४८७=२६१३ कलिगतम् । एष च—'यदुदुम्बरवर्णानां मण्डलं महत् । पीतं न गमयेत्स्वर्गं तत्किं क्रतुगतं नयेत् ॥' इत्येवमुक्तवान् शायाम्—'प्रमत्तगीत एष तत्रभवतो यस्त्वप्रमत्तगीतस्तत्प्रमाणम्' इत्येवं भाष्यकारेण प्रत्युच्यते । यद्युक्तो बुद्धनिर्वाणकालः सर्ववादिसंमत. तीर्थंकर-**महावीर**सत्ताकालो व्यक्त एव, यतो वीरनिर्वाणसंवत्—५२७ ऊर्ध्वम् अर्थात् कलिगतम् २५७३। 'चन्द्रगुप्तसभा' इति प्रत्युदाहरणं तु महाभाष्ये काशिकायामपि न दृश्यते, केवलं सिद्धान्तकौमुद्याम् । चन्द्रगुप्तत्वेन तया संभाव्यमानः पुष्यमित्रो वर्तमाने लट्सूत्रभाष्ये—'इह पुष्यमित्रं याजयामः' (३।२।१२३) इत्येवं स्मृतोऽपि कुशकाशावलम्बनायितः । नहि देवदत्तेन्द्रदत्तेन्द्रपालितप्रायैरुदाहरणे (८।२।८३) केचन नियता व्यक्तिविशेषा भाष्यकाराभिमता भवितुमर्हा इति दिक् ।

अथ किंचिद्दर्शनान्तरमुपक्षिप्य भूय. प्रकृतप्रघट्टकफलं दर्शयिष्यते । दर्शनेष्वनुयोगितया प्रतियोगितया वा परस्परस्य परस्परं प्रवेशो लक्ष्यते । सोऽयं शब्देऽर्थेऽर्थस्त इति यथोत्तर भूयान् प्रेक्षाविषयः । तद्बीजं तु—'कालः स्वभावो नियतिर्यदृच्छाभूतानि योनि—' पृ. ८) इत्येवं जातीया भगवती श्रुतिरेव । नहि श्रुतिरुपालभ्या, तदनुवर्तिप्रमातृणा प्रवृत्तिर्वा, यदेष प्रमेयस्य प्राकृतिको दोषः स्वभावो वा यथार्थं विचार सहते, तथागत्या तैर्थिकैर्नीयत इति । अत्रेदं स्थूलं पर्यालोचनम्—

वैशेषिकं न्यायश्चेति द्वये दर्शने समानतन्त्रे तत्र उलूकापरनाम्ना महामुनिना **कणादेन** विशेषं पञ्चमं पदार्थभेदमधिकृत्य कृतो ग्रन्थो वैशेषिकम् । नित्यद्रव्यसाधर्म्यैतरेभ्यो व्यावर्तनाय प्रभवतीति वैशेषिकस्तत्प्रमाता । तथाचोक्तमौलूक्यदर्शने **माधवाचार्य**—'द्वित्वे च पाकजोत्पत्तौ विभागे च विभागजे । यस्य न [illegible] बुद्धिर्न वै वैशेषिकं विदु. ॥' इह भूतात्मपुरस्कारेण पदार्थानां साधर्म्य [illegible] प्रथमपर्यन्तिकी परमात्मचिन्ता । अत्र दश अध्यायाः । [illegible] द्वे आह्निके । सर्वसूत्राणि ३६६। इदं न्यायदर्शनतः प्राचीनं तत्रेयं तुलना—

वैशेषिक.	न्यायद.
[illegible] आत्मनो [illegible] ३।२।४ ॥ [illegible] २।२।२ ॥	इच्छाद्वेषप्रयत्नसुखदु खज्ञानान्यात्मनो लिङ्गम् १।१।१० ॥ नित्य [illegible] र्थानिष्पत्तेः [illegible] ४।३।८ ॥

[illegible]—'अप्रसिद्धोऽनपदेश'—(३।१।१५-१७) इत्यादिना [illegible] अत एव हेत्वाभासा दर्शिताः । न्याये तु—'सव्यभि

[illegible] इदं [illegible] शास्त्रदर्शिभिः, [illegible] । [illegible], औलूक्य । [illegible]

चार—' (१।२।४५—५०) इत्यादिना पश्चाप्युपदिष्टाः । एतेन पूर्वं त्रय एव हेत्वाभासा आकल्पिताः, पश्चात् पञ्चत्वमुपनीता इति व्यक्तम् । अत्र 'विरुद्धासिद्धसंदिग्धमलिङ्गं काश्यपोऽब्रवीत्' इति वैशेषिक-पदार्थधर्मसंग्रहकारः प्रशस्तपादाचार्योऽपि उवाच । एवं वृत्तौ जयनारायण-तर्कपञ्चाननोऽपि । तदेतन्महामहोपाध्याय-चन्द्रकान्तभट्टाचार्यः स्वभाष्यभूमिकायां स्पष्टमुक्तवान् । किञ्च, न्यायसूत्रापेक्षया वैशेषिकसूत्राणां ग्रथनशैलीसारल्यमपि तत्प्राचीनतामवगमयतीति प्रत्यक्षं परीक्षकाणाम् । एतदपि न्यायकोशभूमिकायां महामहोपाध्यायभट्टभीमाचार्येण विपरीतमुच्यते तन्न हृदयारोहीति द्रष्टव्यम् ।

प्रमाणैः प्रमेयपरीक्षणं न्यायः, नीयते प्रमेयसिद्धिरनेनेति वा । एषोऽक्षपादापरनाम्ना महामुनिना गोतमेन न्यरूपि । इहान्तरात्मपुरस्कारेण पदार्थतत्त्वज्ञानान्निःश्रेयसपर्यन्तिकी परमात्मचिन्ता । अत्र पञ्च अध्यायाः । प्रत्यध्यायमाह्निकद्वयम् । सर्वसूत्राणि ५३१ । भगवतो गोतमस्य समये आयुर्वेद इव मन्त्रकाण्डोऽपि दृष्टफलप्रद आसीत्, तत एव दृष्टान्तविधया द्वयोरप्युपादानं वेदप्रामाण्याय कृतम्—'मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात् २।१।६८' इति । सारस्वातिरिक्तेषागमविधया मन्त्रा लभ्यन्ते । आगम च—'आगतं शिववक्त्रेभ्यो गतं च गिरिजामुखे । मतं श्रीवासुदेवस्य तस्मादागम उच्यते ॥' इति शब्दार्थचिन्तामणौ निरुक्तम् । वक्त्राणि—तत्पुरुष-घोर-सद्योजात-वामदेवे-शानरूपाणि पूर्वदक्षिणपश्चिमोत्तरोर्ध्वरूपाणि पञ्च । तत्पुरुषादिवक्त्रप्रतिपादका मन्त्रास्तु तैत्तिरीये आरण्यके दशमप्रपाठके श्रूयन्ते ॥

सांख्यं योगश्चेति समानतन्त्रे । तत्र तत्त्वानां समाख्या यत्र स [illegible] कपिलेनोपदिष्टः । तथा चोक्तम्—'पञ्चमे कपिलो नाम सिद्धेशः कालविप्लुतम् । प्रोवाचासुरये सांख्यं तत्त्वग्रामविनिर्णयम् ॥' इति भागवते (१ स्क. ३ अ. १० श्लो.) । [illegible]

[illegible]

१. [illegible]

नैमित्तिकी । शब्दादिनिमित्तेन चतुर्धा त्रिधा भूमितो भवति ॥ द्रव्याश्रयश्चाश्रितो भवति गुणो निरवलम्बितस्वभाव । सत्त्वाऽऽश्रयोऽवच्छिन्नस्वभावविशेषादथ त्रेधा ॥ नित्यं क्रियानुबन्धा व्यभिचारेण भवति भावार्थः । साध्यमाना द्वेधा सकर्मिकाऽकर्मिका चेति ॥ विशेषितासुर्वेष्वपि वस्तुषु द्रव्येषु भिन्नवानेषु । एकाकारा बुद्धिर्भवति यत सा भवेज्जातिः ॥” इत्येवं शब्दविभाग । एष एवालङ्कारिकाणामभिमतो जातिगुण-क्रियाद्रव्याणामुपरक्तत्वेन निरूपणात् । शब्दोऽर्थो रसश्च मुख्यः । शब्दो वाचक, लाक्षणिकव्यञ्जकाभ्यां प्रागुपस्थानात्; अर्थो वाच्य, लक्ष्यव्यङ्ग्य-तात्पर्येभ्यः प्रागवगमनात्, मुख्यान्मुख्य इति व्यपदिश्यते । रसस्तु सर्ववादि-नामादरास्पदं मुख्य एव । रसादिशब्दस्य रसादिप्रत्यायने संकेताभावान्नाभिधा-व्यापार प्रभवति । अत एवाभिधेयेन अविनाभूतस्य प्रतीतिराहित्याल्लक्षणापि नाक्रमते । अभिधापूर्वको हि लक्षणाव्यापार इति । अतएव च “साक्षात्संकेत-विषयो मुख्य ॥ मुख्यार्थबाधे निमित्ते प्रयोजने च भेदाभेदाभ्यामारोपितो गौण । मुख्यार्थसम्बद्धत्वेन लक्ष्यमाणो लक्ष्य ॥” इति सूच्यते । अथ तात्पर्याख्या वृत्तिरपि संसर्गमात्रे विरतव्यापारा । इत्थमत्रा अभिधादिपथातिशायिनी तुरीया व्यञ्जनावृत्ती रसादिबोधने स्फोटायनमतानुसारिभिरालङ्कारिकैरङ्गीकृता । यद्यपि रसो न केनापि निह्नोतुं पार्यते तथापि तस्य बोधनव्यापारे वैमत्याद् विकल्पा । व्यञ्जनावृत्तिप्रतिपाद्यो व्यङ्ग्यो हि वस्त्वलंकाररसादिलक्षणः, स तावत्प्रतीयमान एव (छा० २३८ पृ०) । अन्येनाप्यन्वयाचि—‘मुख्यादव्यतिरिक्तः प्रतीयमानो व्यङ्ग्यो ध्वनि. ।’ ध्वनति, ध्वन्यते, ध्वननं चेति यथायोगमवधातव्यम् । अस्य व्यतिरेकविधा, यथा खलु ध्वनिकारेण अङ्कुरिता, आलोककारेण पल्लविता; लोचनकारेण पुष्पिता, तथैव प्रकाशकारेण फलिता, नान्येन केनापि कोऽपि विशेषोऽद्यावधि वस्तुतोऽत्र प्राकाशि ॥

अथ प्रतीयमानो व्यङ्ग्यो ध्वनिरित्यपि रसादिवेदनभङ्गिमात्रम्, न प्रत्येक-मर्थान्तरम् । यथा खलु व्यवहारभूमौ वाच्यस्तात्पर्यार्थो लक्ष्यो वेति । ‘विभावानु-भावव्यभिचारिसंयोगाद् रसनिष्पत्तिः’ (छा० ७२ पृ०) इति सर्ववादिसमता भारतीया रसनीती । एतदुक्तं भवति—कारणादीनां विभावनादिव्यापारवत्त्वाद् विभावादिपदाभिधाने दृष्टान्तमर्यादया विभावादिविभागलाभ । संयोगादिति सौत्र-पञ्चम्या विभावानुभावव्यभिचारिण. समूहालम्बनतया रसं प्रति हेतुता प्रतिपन्नाः । तत्र शब्दोपहितरूपाणां विभावादीनां व्यापाराद् उत्पाद्योत्पादक–गम्यगमक–पोष्य-पोषक–व्यङ्ग्यव्यञ्जकरूपा भावा वादिभिरादृता. । रसबोधने निरूपितदशा अभि-धातात्पर्ये निरस्ते अपि पुनर्मीमांसकमतेन लोल्लटादिभिरुत्प्रेक्ष्यमाणोऽभिधाया दीर्घदीर्घतरो व्यापारो रसस्यानुकार्यगतत्वं च निरस्यते (सा. द. ८९ पृ० २५३ पृ०) “भट्टलोल्लटादयस्तु—रसस्य व्यङ्ग्यत्वमेवाङ्गीकुर्वन्ति” इति विवृतिग्रन्थस्तू-पेक्ष्यः (८० पृ०) एव संयोगादिति बुद्धो रसस्य विभावादेश्च ७८ । । ५५ सुदूर निरस्तो मन्तव्य. । लक्षणापि निरस्तैव, यत्पुनस्तार्किकमन्यै श्री २। महिमभट्टप्रभृतिभी रसोऽनुमाप्य इत्यास्थीयते, तदपि तस्यानुकर्तृगतत्वेन

स्यात्काव्याङ्गत्वं, न रूपिता ॥ शब्दप्राधान्यमाश्रित्य तत्र शास्त्रं पृथग्विदुः। अर्थतत्त्वेन युक्तं तु वदन्त्याख्यानमेतयोः ॥ द्वयोर्गुणत्वे व्यापारप्राधान्ये काव्यधीर्भवेत्। अभिधा भावना चान्या तद्भोगीकृतिरेव च ॥ अभिधाधामतां याते शब्दार्थालंकृती ततः। भावनाभाव्य एषोऽपि शृङ्गारादिगणो मतः ॥ तद्भोगीकृतिरूपेण व्याप्यते सिद्धिमान्नरः। दृश्यमानाथवा नोक्ते यालक्षलमियं स्फुटम् ॥" इति। तदित्थमन्यथान्यथा प्रतीयमानो नीत इत्यपि द्रष्टव्यम्। इति शब्दार्थीयम् ॥

अथ श्रव्यदृश्यीयस्य शब्दार्थीयस्य च विभावनाद् व्याकरणानिशायीवाच्यवाचकत्वाश्रयणान्मीमांसादिसमयातिक्रान्तस्फोटवादाभ्युपगमान्न्यायादिविप्रवादिव्यञ्जनारोहणाच्च साहित्यमलंकारशास्त्रं काव्यानुशासनं न कस्याप्यनुयायि पुच्छमङ्गं वा भवितुमर्हति, किंतु—

'प्रसक्तेर्यः पात्रं, तिलकमतिर्यं सूक्तरचना,
य आद्यः साधूनां श्रुतिचुलुकलेह्येन मधुना।
यदात्मानो विद्याः, परिणमति यश्चार्थवपुषा,
स गुम्फो वाणीनां कविवृषनिषेव्यो विजयते ॥'

इत्येवमादिनिरूपितलिङ्गबलेन प्रधानमङ्गीति सिध्यति। अत एव मयाप्यवोचि—

'शब्दार्थयोरुक्तिविशेषसत्त्वे लक्ष्येषु काव्यव्यवहारयोगात्।
न्यायादिवद् दर्शनकोटिमाप्तं साहित्यमङ्गीति वदन्ति विज्ञाः ॥

साहित्यस्य भामहालंकारादयः कतिपये प्रबन्धाः प्रागुक्ताः, (भू० ४४ पृ०) टीकाप्रबन्धा मम्मटसमयदर्शने निर्दिष्टाः, अन्येऽपि यत्र तत्र प्रसङ्गादुपात्ताः। केचिदिह लक्ष्यभूता निरूप्यन्ते—

तत्र ध्वनिग्रन्थाः।

(१) ध्वनिकारिका। (२) आलोकः। (३) लोचनम्। (४) हृदयदर्पणः। (५) व्यक्तिविवेकः। एते पञ्चापि कश्मीरजन्मानोऽत्यन्तप्रौढाः।

वृत्तिप्रकरणानि।

(१) कश्मीरवास्तव्यस्य भट्टकल्लटसूनोर्मुकुलस्य अभिधावृत्तिमातृका। (२) सुप्रसिद्धराजानक—मम्मटस्य शब्दव्यापारविचारः। (३) दाक्षिणात्यस्य अप्पयदीक्षितस्य वृत्तिवार्तिकम्।

अस्यैव शिष्यः प्रतीहारेन्दुराज उद्भटालंकारवृत्तिकर्ता, य आत्मानं कौङ्कणं नि स.

अलंकारग्रन्थाः ।

(१) काश्मीरकस्य राजानक—रुय्य[1](रु)कस्य **अलंकारसर्वस्वम्** । (२) काश्मीरकस्य राजानक—जयरथस्य[2] अलंकारविमर्शिनी । (३) काश्मीरकस्य भट्टशोभाकरमिश्रस्य **अलंकाररत्नाकरः** । (४) दाक्षिणात्यस्य अप्पय[3]दीक्षितस्य **चित्रमीमांसा** । (५) दाक्षिणात्यस्य पण्डितराज—जगन्नाथ[4]स्य **चित्रमीमांसाखण्डनम्** ।

नायिकारसप्रकरणानि ।

(१) रुद्रटस्य शृङ्गारतिलकम् । मैथिलस्य भानुदत्तमिश्रस्य (२-३) **रसमञ्जरी-रसतरङ्गिण्यौ** । (४) शिवरामत्रिपाठिनो **रसरत्नहारः** ।

कतिपयविचारप्रकरणानि ।

(१) काश्मीरिकस्य राजानक—रुय्यकस्य **सहृदयलीला** । (२-४) काश्मीरिकस्य व्यासदासापरनाम्नः क्षेमेन्द्रस्य **कविकण्ठाभरणसुवृत्ततिलकौचित्यविचारचर्चाः** । (५) राजशेखरस्य **काव्यमीमांसा** । (६) जैनयोररिसिंहामरचन्द्रयोः **काव्यकल्पलतावृत्ती**[5] । (७) देवेश्वरस्य **कविकल्पलता** । (८) पर्वतीयस्य विश्वेश्वरपण्डितेन्द्रस्य **कवीन्द्र**[6]**कर्णाभरणम्** ।

साहित्यग्रन्थाः ।

(१) धारापतेर्भोजदेवस्य **सरस्वतीकण्ठाभरणम्** । (२) महामाहेश्वरस्य **एकावली**[7]शास्त्रम् । (३) दाक्षिणात्यस्य विद्यानाथस्य **प्रतापरुद्रीयम्**[8] । (४) केशव-

---

इति। प्रतिपादयतीति प्रतिपादनं वाक्यम्, तदलभ्यस्य। मुख्यशब्दघटितवाक्येनाप्रतिपाद्यस्येत्यर्थः। तीरस्य विप्रकृष्टांशगतशीतत्वाद्यपेक्षया संनिकृष्टांशगतशीतत्वादेराधिक्यमत्रातिशयः। एवं च 'अतिशीतेऽतिपावने तीरे घोषः' इति व्यञ्जनाजन्यबोधो लाक्षणिकशब्दप्रयोगस्य प्रयोजनमिति भावः। 'काश्चिन्नैव लगन्ति' इति लक्षणाया निषेध उक्तः। अशक्तितो रूढिप्रयोजनविरहात्। यथा—'कमले चरणाघातं मुखं सुमुखि तेऽकरोत्'। अत्र निर्जितत्वं लक्ष्यते। एषा नेयार्थलक्षणा दोषतया वक्ष्यते। सा च कविप्रयोगानर्हत्वात् प्रकृतलक्षणस्य लक्ष्या न भवतीति तत्रातिव्याप्तिवारणाय चरमहेतुद्वयं न्यस्तम्। तदेव दर्शयति—**हेतुमिति**। रूढिप्रयोजनयोरन्यतरमित्यर्थः। **संबन्धिनो** मुख्यार्थसंबन्धिनः। **लक्षणे** लक्षणायाम्। उदाहरन्ति 'काव्यप्रकाशकारादयः' इति शेषः। **लाति** गृह्णाति। **व्युत्पत्तिः** प्रकृतिप्रत्ययविभागकल्पना, ताभ्यां लभ्यः प्रतिपाद्यः। **प्रकृते** कर्म-कर्मान्वये**ऽसंभवन्** योग्यताविरहात्। पदार्थस्यान्वयानुपपत्तिप्रतिसंधानाद्वा लक्षणायामनुपयोगित्वमित्यभिप्रायेणेदम्। **अन्ये इति**। स्वपक्षाभिप्रायेण दक्ष-

1 **तदन्य इति**। [illegible]

रोपा। इयमेव रूपकालंकारस्य बीजम्। रूढावुपादानलक्षणा सारोपा यथा—'अश्वः श्वेतो धावति'। अत्र हि श्वेतगुणवानश्वोऽनिगीर्णस्वरूपः स्वसमवेतगुणतादात्म्येन प्रतीयते। प्रयोजने यथा—'एते कुन्ताः प्रविशन्ति'। अत्र सर्वनाम्ना कुन्तधारिपुरुषनिर्देशात्सारोपत्वम्। रूढौ लक्षणलक्षणा सारोपा यथा—'कलिङ्गः पुरुषो युध्यते'। अत्र पुरुषकलिङ्गशब्दयोराधाराधेयभावः संबन्धः। प्रयोजने यथा—'आयुर्घृतम्'। अत्रायुष्कारणमपि घृतं कार्यकारणभावसंबन्धसंबन्ध्यायुस्तादात्म्येन प्रतीयते। अन्यवैलक्षण्येनाव्यभिचारेणायुष्करत्वं प्रयोजनम्।

यथा वा—राजकीये पुरुषे गच्छति 'राजासौ गच्छति' इति। अत्र स्वस्वामिभावलक्षणः संबन्धः। यथा वा—अग्रमात्रेऽवयवभागे

धावति'. इत्यत्रापि 'धावति' इत्यत्र 'शोभते' इति द्रष्टव्यम्। अन्यथोपादानलक्षणा न स्यादिति प्रागेव दर्शितम् (४३पृ)। अत्र निरुक्तारोपमत्त्वमुपपादयति—**अत्र हीति**। 'लक्षणाजन्यपदार्थोपस्थितेः प्राक्काले' इति शेषः। अनिगीर्णस्वरूपः प्रयुक्तशब्देन प्रतिपाद्य। **एते कुन्ता इति**। विषयस्य सामान्यवाचिना सर्वनाम्ना निर्देशेऽपि विशेषरूपेणानुपस्थितौ साध्यवसाना लक्षणेति **काव्यप्रकाशकारमतम्**। तद्भूतलमिति प्रतीतिसत्त्वे 'घटाभाववद्भूतलम्' इति प्रतीत्यनुदयात्सर्वनाम्नोऽपि विशेषरूपेणोपस्थापकत्वं कल्प्यत इत्यभिप्रायेण पूर्वमतमनङ्गीकृत्य तत्रापि सारोपा लक्षणेति दर्शयति—**अत्र सर्वनाम्नेति**। **आयुर्घृतमिति**। अत्र शक्यसंबन्धारोपं च दर्शयति—**आयुष्कारणमपीति**। अन्यवैलक्षण्येनाव्यभिचारेणेत्यत्र वाकारो बोध्यः। लक्षणाबीजं विविधं शक्यसंबन्धं दर्शयन्बहून्युदाहरणान्याह—**राजकीय इति**। अत्र राजकर्मातिशयपरिच्छदातिशयौ राजवदलङ्घ्यशासनत्वं वा प्रयोजनम्। **अवयवभागे** इत्यत्र भागशब्दः स्वरूपार्थः। अत्र प्रयोजनाभावाद्रूढिरेव। इत्य-

1. एत इति। 'इदमस्तु संनिकृष्टे समीपतरवर्ति चैतदो रूपम्। अदसस्तु विप्रकृष्टे तदिति परोक्षे विजानीयात्॥' इति, स्मरणात् भूतभविष्यद्विशेषणत्वेनमपि नियतमेकत्वतः [illegible]। तत एव 'पूर्वं प्लवामहे' 'अभूद्भूमिः' 'बभूव रक्षः' इति 'अनु पुरः पश्यसि' 'असौ मित्र त्वं' इति चैवमादयो रघुवंशशिशुपालवधप्रयोगाः।

2 अग्रेति। अग्रस्य [illegible] लाक्षणिकः। इत्यादय-

१ [illegible] सारोपा [illegible] ग पुस्तके २ [illegible] ३ [illegible] इति ग पुस्तके नास्ति ४ [illegible] ५ [illegible] ६ [illegible] ७ [illegible]

साहश्येतरसंबन्धाः शुद्धास्ताः सकला अपि ॥ ९ ॥
साहश्यात्तु मता गौण्यस्तेन षोडश भेदिताः ।

ताः पूर्वोक्ता अष्टभेदा लक्षणाः । साहश्येतरसंबन्धाः कार्यकारणभावादयः । अत्र शुद्धानां पूर्वोदाहरणान्येव[1] । रूढावुपादानलक्षणा सारोपा गौणी यथा—'एतानि तैलानि हेमन्ते सुखानि' । अत्र तैलशब्दस्तिलभवस्नेहरूपं मुख्यार्थमुपादायैव सार्षपादिषु स्नेहेषु वर्तते[2] ।

विना प्रतीयमानस्य विषयस्य निरुक्ताध्यवसानविशेष्यत्व । पूर्वोदाहरणान्येवेति । श्वेतो धावति । कुन्ताः प्रविशन्ति । कलिङ्गः साहसिकः । गङ्गायां घोषः प्रतिवसतीति । एतानीत्यर्थः । एष्वश्वादीनां विशेष्याणां शब्दं विनैव प्रतीयमानत्वात् 'गङ्गायाम्' इत्यादौ तीरं विशेष्यम् । तच्च शब्दं विनैव प्रतीयते । पुनरपि लक्षणाया द्वैविध्यमाह—**साहश्येतरेति** । साहश्यादितरे संबन्धा हेतवो यस्या इति समासः । 'साहश्यात्संबन्धात्' इति शेषः । साहश्यसंबन्धहेतुका लक्षणा गौणीत्यर्थः । तेन निरुक्तद्वैविध्येन पूर्वोदाहरणान्येवेति । 'अश्वः श्वेतो धावति' इत्यादीन्येवेत्यर्थः । **एतानीति** । हेमन्ते हि तैलाद्यभावादत्यन्तं दुःखमुत्पद्यते । तन्निराकरणेन तैलानामत्युपकारित्वमिति सूचनाय 'हेमन्ते' इत्युक्तम् । **उपादायैव** अपरित्यज्यैव । **सार्षपादि स्नेहेषु वर्तत** इति घृतादिविलक्षणद्रवत्वरूपैकधर्मसंबन्धेन सर्षपादिस्नेहान्प्रतिपादयतीत्यर्थः । 'छत्रिणो यान्ति' इतिवत्तिलस्नेहस्यापि

---

1. **गौण्य इति** । गुणेभ्य आगता गौण्य इति विग्रहः । 'तत आगतः' इत्यण् 'टिड्ढा—' इति ङीप् ॥

---

१ 'तत्र' ग. २ ग पुस्तके तु 'एव' इत्यस्मात् 'साहश्येतर—' इत्यादि पद्यस्य वर्तते, तत्र "आदिमध्यावसानेषु [illegible] साहश्यं [illegible] । क्वचित्स्वस्वामिभावात् 'राजकीयः पुरुषो राजा' इति । क्वचित्तात्कर्म्यात् 'अतक्षा तक्षा' इति । क्वचिदवयवावयविभावात् 'अग्रहस्त इत्यादौ हस्तोऽयम्' इति । क्वचित्साहचर्यात् 'छत्रिणो यान्ति' इति । एवमन्यान्यप्युदाहरणान्यूह्यानि । [illegible] पदार्था इति वचनात् । साहश्यसंबन्धात्तु ता एवाष्टधा लक्षणा गौण्यो भवन्ति ।" इति पाठान्तरं वर्तते ३ 'नैव प्रयोजनवती । नारिकेलादिस्नेहस्याकृष्टा सर्पपस्नेहादिनानीय एव प्रसिद्धा निरूढलक्षणा' इति ग-पुस्तकेऽधिकः पाठः ४ 'इति' पुस्तकान्तरे नास्ति ५ क्वचित् 'एषु यथायथमेकदा[illegible] [illegible] । [illegible] [illegible]वच्छेदेन सारोपात्वसाध्यवसानात्वादिना धर्मयोर्नित्यं न संगतम् । वस्तुतस्तु त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति' इत्यादौ 'उपदिशति कामिनीनां' इत्यादौ चाध्याहारेणापि समानविभक्तिकपदासत्त्वात् 'कदली कदली करभः करभः' इत्यादौ 'रानी[illegible]' इत्यादौ च [illegible] [illegible] व्यभिचारः । [illegible] [illegible] 'सारोपा तु ययोर्नि विषयो विषयस्तथा । [illegible] [illegible] [illegible] ॥' इति [illegible] । [illegible] [illegible] [illegible] । [illegible] सारोपा[illegible] [illegible] प्रतीयते । न तु पार्थिवानां [illegible] । एवं च 'गङ्गायां घोष' इत्यादावपि [illegible] लक्षणा संगच्छते ।" इत्यधिकं दृश्यते.

प्रयोजने यथा—राजकुमारेषु तत्सदृशेषु च गच्छत्सु 'एते राजकुमारा गच्छन्ति' । रूढावुपादानलक्षणा साध्यवसाना गौणी यथा—'तैलानि हेमन्ते सुखानि' । प्रयोजने यथा—'राजकुमारा गच्छन्ति' । रूढौ लक्षणलक्षणा सारोपा गौणी यथा—'राजा गौडेन्द्रं कण्टकं शोधयति'। प्रयोजने यथा—'गौर्वाहीकः' रूढौ लक्षणलक्षणा साध्यवसाना गौणी यथा—'राजा कण्टकं शोधयति' । प्रयोजने यथा—'गौर्जल्पति' ।

अत्र केचिदाहुः—गोसहचारिणो गुणा जाड्यमान्द्यादयो लक्ष्यन्ते। ते च गोशब्दस्य वाहीकार्थाभिधाने निमित्तीभवन्ति । तदयुक्तम् ।

[illegible]

गोशब्दस्यागृहीतसंकेतं वाहीकार्थमभिधातुमशक्यत्वाद् गोशब्दार्थमात्रबोधनाच्च । अभिधाया विरतत्वाद् विरतायाश्च पुनरुत्थानाभावात् ।

अन्ये च पुनर्गोशब्देन वाहीकार्थो नाभिधीयते । किंतु स्वार्थसहचारिगुणसाजात्येन वाहीकार्थगता गुणा एव लक्ष्यन्ते । तदप्यन्ये न मन्यन्ते । तथाहि—अत्र गोशब्दाद्वाहीकार्थः प्रतीयते, न वा । आद्ये गोशब्दादेव वा । लक्षिताद्वा गुणाद् । अविनाभावाद्वा । तत्र, न

[illegible] बोधयन्ति [illegible] आह—**गोशब्दार्थमात्रबोधनादिति** । **विरत** [illegible] प्रतीतियोग्यतावि[illegible] नष्टप्रायत्वात् । [illegible] नन्वस्य नियमस्य [illegible] पुनरपि प्रतीतियोग्यता कल्पनीयेत्यत आह—**विरताया इति** । **उत्थाना**[illegible] प्रतीतिजननोन्मुखीभावविरहात् । [illegible] धर्मान्तरे [illegible] बोधयतु । प्रकृते तु गोत्वे गृहीता शक्तिर्गोत्वाद्यर्थं बोधयित्वा [illegible] लक्ष्यार्थबोधप्रभवेन लक्षणया [illegible] । **स्वार्थेति** । स्वार्थो गोत्वम् । [illegible] । **गुणसाजात्येनेति** । [illegible] इति भाव । **आद्ये** [illegible] । **न प्रथम**, न [illegible] । **असंकेतितत्वाद्** [illegible] । **न तृतीयः**, [illegible] । **शाब्दे** [illegible] । अत्र हेतुमाह—**शाब्दीति** । [illegible] । [illegible] । [illegible] न स्यात् । न च [illegible] । [illegible] । [illegible]

1. [illegible]
2. [illegible]

प्रथमः । वाहीकार्थस्यासंकेतितत्वात् । न द्वितीयः । गोगवयचन्द्रमुखादिशब्दद्वन्द्वानामवयवप्रसादादिसाम्येऽप्यन्योन्यस्यान्यतमशब्दार्थानभिधायकत्वात् । न तृतीयः । अविनाभावलभ्यस्यार्थस्य शाब्देऽन्वये प्रवेशासंभवात् । शाब्दी ह्याकाङ्क्षा शब्देनैव पूर्यते । न द्वितीयः । यदि हि गोशब्दाद्वाहीकार्थो न प्रतीयेत, तदास्य वाहीकशब्दस्य च सामानाधिकरण्यमसंगतं स्यात् ।

तस्मादत्र गोशब्दो मुख्यया वृत्त्या वाहीकशब्देन सहान्वयमलभमानोऽज्ञत्वादिसाधर्म्यसम्बन्धाद्वाहीकार्थं लक्षयति । वाहीकस्याज्ञत्वाद्यतिशयबोधनं प्रयोजनम् । इयं च गुणयोगाद्गौणीत्युच्यते । पूर्वा तूपचारामिश्रणाच्छुद्धा । उपचारो हि नामात्यन्तं विशकलितयोः शब्दयोः सादृश्यातिशयमहिम्ना भेदप्रतीतिस्थगनमात्रम् । यथा—

र्थविप्रकर्षात्' इति जैमिनिसूत्रोक्तं न स्यात् । आक्षेपापेक्षया लक्षणाया मुख्यार्था[illegible] धारितनिबधानतापेक्षत्वेन विलम्ब्यार्थोपस्थापकत्वात् **समवाये** विरोधेऽ**विप्रकर्षा**द्विलम्ब्यार्थोपस्थापकत्वात् । 'श्रुतिर्द्वितीया क्षमता च लिङ्गं वाक्यं पदान्येव तु संहतानि । सा प्रक्रिया या कथमित्यपेक्षा[illegible] ॥' इति कारिका सूत्रार्थव्याख्या । **न द्वितीयः**, न प्रतीतिरित्यस्य पक्ष । **अस्य** गोशब्दस्य, वाहीकशब्दस्येत्यनन्तर चकारो योज्यः । **सामानाधि**करण्यमेकार्थप्रतिपादकत्वम् । [illegible]—**तस्मादत्रेति** । [illegible] । **अन्वयमिति** । [illegible] । **अज्ञत्वादीति** । [illegible] निर्देशनम् । अन्यथा [illegible] न सम्भवति । **प्रयोजनमिति** । [illegible] । **इयं चेति** । [illegible] । तदुक्तम्—'[illegible]' इति । [illegible] । **पूर्वा** [illegible] । [illegible] **अत्यन्तमिति** । [illegible] । **विशकलित**[illegible]

1. [illegible]

'स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घना
वाताः शीकरिणः पयोदसुहृदामानन्दकेकाः कलाः ।
कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे
वैदेही तु कथं भविष्यति हहा हा देवि धीरा भव ॥'

[illegible]—**धर्मोति** । धर्मो लक्ष्य । तद्वृत्तिपदार्थो धर्मं । **स्निग्धश्यामलेति** । [illegible] श्रीरामस्योक्तिरियम् । **लिप्तेति** । व्याप्तेत्यर्थः । वेल्लद्बलाका चञ्चद्बकपङ्क्तयः । पयोदसुहृदां मयूराणामानन्दजनिका आनन्दजनिता वा केकाध्वनयः ।

1. स्निग्धश्यामलेति । व्याख्यातोऽप्ययं श्लोकः चमत्कारातिशयलाभाय पुनर्व्याख्यायते—[illegible] । तथाहि—स्निग्धया [illegible] श्यामलया [illegible] कान्त्या [illegible] नियतमो ये । [illegible] बलाकाः सितपक्षिविशेषा [illegible] । [illegible] वर्णने । विशेषोऽपि तु महान् । यत [illegible] बहुवचनेन सूचितम् । [illegible]—पयोदो मेघः [illegible] केकाननकारक [illegible] केका शब्दविशेषाः [illegible]

[illegible]

विजनत्वम्, अतः संकेतस्थानमेतदिति कयापि संनिहितं प्रच्छन्नकामुकं प्रत्युच्यते[1]। अत्रैव स्थाननिर्जनत्वरूपं व्यङ्ग्यार्थवैशिष्ट्यं प्रयोजनम्[2]।

'भिन्नकण्ठध्वनिर्धीरैः काकुरित्यभिधीयते'[2] इत्युक्तप्रकारायाः काकोर्भेदा आकरेभ्यो ज्ञातव्याः। एतद्वैशिष्ट्ये यथा—

गुरुपरतन्त्रतया बत दूरतरं देशमुद्यतो गन्तुम्।
अलिकुलकोकिलललिते नैष्यति सखि सुरभिसमयेऽसौ ॥'

अत्र नैष्यति, अपि तर्हि एष्यत्येवेति काक्वा व्यज्यते।

चेष्टावैशिष्ट्ये यथा—

[3]'संकेतकालमनसं विटं ज्ञात्वा विदग्धया।
[3]हसन्नेत्रार्पिताकूत लीलापद्मं निमीलितम् ॥'

अत्र संध्या सकेतकाल इति पद्मनिमीलनादिचेष्टया कयाचिद्द्योत्यते।

सनिधि· सामानाधिकरण्यम्, तस्य प्रच्छन्नकामुकनिरूपितत्वं वैशिष्ट्यम्, उच्यते व्यज्यते। **अत्रैव** अस्मिन्नुदाहरण एव निर्जनत्वातिशयो वैशिष्ट्यं प्रयोजनं तृतीयव्यञ्जनायाः कारणम् ॥ **भिन्नेति**। शोकहर्षभयादिकृतेत्यर्थः। **आकरेभ्य** उपजीव्यभरतादिग्रन्थेभ्य ॥ **सुरभिसमये** वसन्तकाले। **अपि तर्हीति**। अपि त्वित्यर्थ· ॥ **संकेतेति**। विटमुपपतिम्। हसत्प्रफुल्लम्। नेत्राभ्यामर्पितमाकूतमात्माभिप्रायो यत्र तद्यथा स्यात्तथा निमीलितमित्यर्थ। यद्वा, हसदिति नेत्रविशेषणम्। एतदेव पद्मनिमीलनस्य नेत्रार्पिताकूतत्वं वैशिष्ट्यम्। **चेष्टादिकस्ये**त्यादिपदाच्चेष्टाविरहादिग्रह।

---

1. उच्यत इति। व्यञ्जनया प्रतिपाद्यते इत्यर्थः ॥

2. काकुरिति। कायत्यर्थान्तरमिति काकु.। यद्वा काकुर्जिह्वेति पस्पशायां भाष्यकारः। तद्व्यापारविशेषसवाद्यत्वाच्छोकहर्षभयादिभिर्ध्वनेर्विकारः काकु। तथा चोक्तम्—'वाक्यामिधेयमानेऽर्थे येनान्य प्रतिपद्यते। भिन्नकण्ठध्वनिर्धीरै· स काकुरिति कथ्यते ॥' इति ॥

3. सकेतेति। सकेतकाले मनो यस्य। त जिज्ञासुमित्यर्थः। अत एव हसद्भ्यां नेत्राभ्यामर्पितं सूचितमाकूतं रहस्य येन। हसदिति भिन्न प्रफुल्लमित्यर्थक पद्मविशेषणं वा। शेषं व्यक्तम्। इह नेत्रेङ्गितेन लक्षितो गूढाभिप्राय. कामिन्या निशासूचकेन पद्मनिमीलनेन प्रकाशित. ॥

---

1. '–व्यङ्ग्यार्थ–' ख० ग० 2. 'प्रयोजकम्' ... ग पुस्तके न 'अत्रैव–' इति ...

एवं वक्त्रादीनां व्यस्तसमस्तानां वैशिष्ट्ये बोद्धव्यम् ।

त्रैविध्यादियमर्थानां प्रत्येकं त्रिविधा मता ॥ १७ ॥

अर्थानां वाच्यलक्ष्यव्यङ्ग्यत्वेन त्रिरूपतया सर्वा अप्यनन्तरोक्ता व्यञ्जनास्त्रिविधाः । तत्र वाच्यार्थस्य व्यञ्जना यथा—'कालो मधु'—' इत्यादि । लक्ष्यार्थस्य यथा—'निःशेषच्युतचन्दनं—' इत्यादि । व्यङ्ग्यार्थस्य यथा—'उअ णिच्चल—' इत्यादि । प्रकृतिप्रत्ययादिव्यञ्जकत्वं तु प्रपञ्चयिष्यते ।

शब्दबोध्यो व्यनक्त्यर्थः शब्दोऽप्यर्थान्तराश्रयः ।
एकस्य व्यञ्जकत्वे तदन्यस्य सहकारिता ॥ १८ ॥

यतः शब्दो व्यञ्जकत्वेऽप्यर्थान्तरमपेक्षते, अर्थोऽपि शब्दम्, तदेकस्य व्यञ्जकत्वेऽन्यस्य सहकारितावश्यमङ्गीकर्तव्या ।

अभिधादित्रयोपाधिवैशिष्ट्यात्त्रिविधो मतः ।
शब्दोऽपि वाचकस्तद्वल्लक्षको व्यञ्जकस्तथा ॥ १९ ॥

तद्वैशिष्ट्ये यथा—'नादत्ते भूषणं दत्तं नाहूता [illegible]च्छति । मृगाक्षी न क्षिपत्यक्षि सादरं मयि पश्यति ॥' अत्र चेष्टाविरहेण कोपो व्यज्यते । तस्य च कान्तापराधज[illegible]त्वं वैशिष्ट्यम् । व्यस्तानां प्रत्येकं समस्तानां द्वित्र्यादिसंकीर्णानाम् ॥ **त्रैविध्यादिति** । इयं व्यञ्जना ॥ **प्रपञ्चयिष्यते** । '[illegible]उदाहरणे' इति शेषः ॥ ननु शाब्द्या व्यञ्जनायामार्थ्यामपि शब्दस्योपयोगित्वमस्त्येव [illegible] भेदकारणमत आह—**शब्दबोध्य इति** । अर्थान्तराश्रयः अर्थान्तरेणान्वि[illegible] । 'व्यनक्ति' इत्यनुषज्यते । इत्यनुपपत्तिदर्शनानन्तरमुपपत्तिमाह—**एकस्येति** । सहकारिता अप्रधानकारणत्वम् । अप्रधानत्वं च [illegible] । एवं च यत्र [illegible] इति भावः । [illegible] **अभिधेति** । [illegible]

---

१. [illegible]

अभिधोपाधिको वाचकः । लक्षणोपाधिको लक्षकः । व्यञ्जनोपाधिको व्यञ्जकः ।

किं च—

तात्पर्याख्यां वृत्तिमाहुः पदार्थान्वयबोधने ।
तात्पर्यार्थं तदर्थं च वाक्यं तद्बोधकं परे ॥ २० ॥

अभिधाया एकैकपदार्थबोधनविरमाद्वाक्यार्थरूपस्य पदार्थान्वयस्य

विर्व्यापार । अभिधया लक्षणया वा शब्दैः प्रत्येकमुपस्थापितानां पदार्थानां संसर्गो वाक्याद्भासमानस्तात्पर्याख्यां वृत्तिमपेक्षत इति प्राचीननैयायिकमतमाह—किं चेति । मतान्तरसूचनाय 'आहुः' इति । 'परे' इति परेणान्वय । इयमेवाधुनिकैः संसर्गमर्यादोच्यते । अभिधाया इति लक्षणाया उपलक्षणम् । अभिहितानामभिधया लक्षणया वा पदोपस्थापितानामन्वयबोधवादिना प्राचीननैयायिकानामित्यर्थः ।

---

1. तात्पर्येति । एतदुक्तं भवति—लाघवात्पदानां पदार्थमात्रे शक्तिः, नत्वन्वयेऽपि । गौरवादनन्यलभ्यत्वाच्च । तदंशो हि तात्पर्यार्थो वाच्याद्यर्थविलक्षणशरीरः आकाङ्क्षायोग्यतासत्तिवशादपदार्थोऽपि प्रतीयते । न चापदार्थविषयस्यापि शाब्दबोधविषयत्वे कथंचिदुपस्थितस्य गगनादेरपि तद्विषयत्वापत्तिरिति वाच्यम् । अपदार्थविषयस्य शाब्दबोधविषयतायामप्रयोजकत्वात् । इत्यभिहितान्वयवादिनो नैयायिक-भाट्ट-मीमांसकाः । तेषामयमभिप्रायः—'घटं करोति' इत्यादौ घटवृत्तिकर्मत्वानुकूला कृतिरित्यर्थो बोध्यते । तत्र घटपदस्य घटोऽर्थः, अम्प्रत्ययस्य च कर्मता, वृत्तिता तु न कस्यापि, इत्यपदार्थोऽपि वृत्तिता तात्पर्यवशादनयोः संसर्गविधया भासते । अन्विताभिधानवादिनः प्राभाकरास्तु—'अन्वयरूपे वाक्यार्थेऽपि पदानां शक्तिः । व्यवहारेणान्वितस्यैवोपस्थापनात्तत्रैव शक्तिग्रहात् । तथाहि—'देवदत्त, गामानय' इत्युत्तमवृद्धप्रयोगात्सास्नादिमन्तीं व्यक्तिं मध्यमवृद्धे संचारयति, तच्चेष्टया तस्य वाक्यस्य तदर्थबोधकतामनुमाय पश्चात् 'गां नय, अश्वमानय' इति प्रयोगे गवापसरणमश्वाहरणं च दृष्ट्वान्वयव्यतिरेकाभ्यां क्रियापदार्थान्विते कारके कारकपदस्य, कारकपदार्थान्वितायां क्रियायां च क्रियापदस्य शक्तिं बालोऽवधारयति । ततः प्रयोगकाले तस्य प्रथमत एवान्वितबुद्धिर्जायते । न च गौरवेणान्वयांशपरिहारः । प्रथमगृहीतान्वयशक्तेरुपजीव्यत्वेन तदपरित्यागात् । शाब्दबोधे तु आकाङ्क्षादिवशाद्वृत्तितादिविशेषरूपमेव भासत इति नापदार्थो वाक्यार्थः' इति वदन्ति । अत्रारुचिबीजं तु—'अन्वितत्वेन शक्तावपि अन्वयविशेषावगमाय आकाङ्क्षादिकं कारणमवश्यमङ्गीकार्यम् । एवं च विशेषाकारेण अशक्यस्यैव भानमिति तैरप्यवश्यमभ्युपेयम्' इति ॥

---

१. 'पदार्थमात्रबोधविरमात्पदार्थानामन्वयप्रतिपादिका तात्पर्याख्या शक्तिः' ग. २ 'पदानां क…' स.

बोधिका तात्पर्यं नाम वृत्तिः । तदर्थश्च तात्पर्यार्थः । तद्बोधकं च वाक्यमित्यभिहितान्वयवादिनां मतम् ॥

इति साहित्यदर्पणे वाक्यस्वरूपनिरूपणो नाम द्वितीयः परिच्छेदः ।

अत्र मूलकारिका = २० । पूर्वाभिः सह २३ ।
उदाहरणश्लोका = ९ । पूर्वैः सह १५ ।

अन्विताभिधानवादिनो मीमांसकगुरवस्तु—'क्रियाकारकयोः प्रथमत एवान्वयबोधो जायते, ततः नाकिञ्चह, पदविशेषसन्निधानात्तु विशेषस्फूर्तिरिति । किं तात्पर्याख्यवृत्तिस्वीकारेण' इत्याहुः ॥

इति श्रीरामचरणतर्कवागीशभट्टाचार्यविरचितायां साहित्यदर्पणविवृतौ
द्वितीयः प्रकाशः ।

---

1. अभिहितेति । अभिहितानां स्वस्ववृत्त्या पदैरुपस्थितानामर्थानामन्वय इति ये वदन्ति तेऽभिहितान्वयवादिन इत्यन्वर्थनामधेयम् ॥

2. अन्वितेति । पदान्यन्वितानि भूत्वानन्तरं विशिष्टमर्थं बोधयन्तीति ये वदन्ति तेऽन्विताभिधानवादिन इत्यन्वर्थं नाम ॥

---

१. 'तदर्थं च तात्पर्यार्थं' प



'रजस्तमोभ्यामस्पृष्टं मनः सत्त्वमिहोच्यते' । इत्युक्तप्रकारो बाह्यमेयविमुखतापादकः कश्चनान्तरो धर्मः सत्त्वम् । तस्योद्रेको रजस्तमसी अभिभूय आविर्भावः । तत्र हेतुस्तथाविधालौकिककाव्यार्थपरिशीलनम् । अखण्ड इत्येक एवायं विभावादिरत्यादिप्रकाशसुखचमत्कारात्मकः । अत्र हेतुं वक्ष्यामः स्वप्रकाशत्वाद्यपि वक्ष्यमाणरीत्या । चिन्मय इति स्वरूपार्थे मयट् । चमत्कारश्चित्तविस्ताररूपो विस्मयापरपर्यायः । तत्प्राणत्वं चास्मद्वृद्धप्रपितामहसहृदयगोष्ठीगरिष्ठकविपण्डितमुख्यश्रीमन्नारायणपादैरुक्तम् । तदाह **धर्मदत्तः** स्वग्रन्थे—

'रसे सारश्चमत्कारः सर्वत्राप्यनुभूयते ।
तच्चमत्कारसारत्वे सर्वत्राप्यद्भुतो रसः ।
तस्मादद्भुतमेवाह कृती नारायणो रसम् ॥' इति ।

चमत्कारसारः । **स्वाकारवदिति** । यथा स्वस्माद्भिन्नोऽपि देहोऽहं स्थूल इत्यादिभेदोल्लेखाभावेन प्रतीयते, तथा रसोऽपि ज्ञातृज्ञानभेदोल्लेखाभावेनास्वाद्यत इत्यर्थः । घटादिज्ञाने जाते वेद्मीति यथा ज्ञातृज्ञानभेदः प्रतीयते तथात्र नेति भावः । यद्वा स्वाकारवत्स्वविषयवत् । **परिणाम**वादिभिर्ज्ञानतद्विषययोर्भेदानङ्गीकारादिति भावः । कामलोभादिबीजभूतौ मनोधर्मौ रजस्तमसी, ताभ्यामस्पृष्टं स्वकार्यजननेऽसंस्पृष्टं मनो मनोधर्मः । विवृणोति—**इत्युक्त इति** । उक्तस्वरूप इत्यर्थः । **बाह्यं** बहिर्भवम् । लौकिकमिति यावत् । **मेयं** वस्तु । **विमुखता** ज्ञानानुकूलव्यापाराभावः । तस्यापादकः प्रयोजकः । ज्ञानानुकूलव्यापारश्चात्र इन्द्रियमनोयोगः । **अभिभूय** स्वकार्याक्षमे कृत्वा । **आविर्भावः** प्रतिबन्धकाभावेन स्वकार्यक्षमत्वेनावस्थानम् । **तत्र** सत्त्वोद्रेके । अलौकिको यः काव्यार्थो विभावादिस्तस्य परिशीलनमसकृदभिनिवेशः । **प्रकाशः** प्रतीतिः । ननु मिलिता विभावादयो रसस्तत्कथमस्याखण्डत्वमत आह—**अत्रेति** । अखण्डत्वादावित्यर्थः । **हेतुमिति** । समूहालम्बनज्ञानतादात्म्यमेव हेतुर्वक्ष्यते । **स्वप्रकाशत्वाद्यपी**त्यादिना सुखतादात्म्यपरिग्रहः । **स्वरूपार्थ इति** । न तु [illegible] यत्र इतिवत्प्राचुर्यार्थः । लोकातीतार्थकल्पनेन किमेतदिति [illegible] चित्तस्य [illegible] चित्तविस्तारः । दृष्टहेतुभ्योऽसम्भावितकार्यदर्शने मनोव्यापारविशेषश्चित्तविस्तार इत्यपरे । **विस्मयो** विस्मयशब्दोऽत्र [illegible] । यद्वा अपरपर्यायोऽस्य । **तत्प्राणत्वं** [illegible] । [illegible] । **सर्वत्र** शृङ्गारादौ । **चमत्कारसारत्वे**

[illegible]

कैश्चिदिति प्राक्तनपुण्यशालिभिः । यदुक्तम्—

'पुण्यवन्तः प्रमिण्वन्ति योगिवद्रससन्ततिम् ।' इति ।

यद्यपि 'स्वादः काव्यार्थसम्भेदादात्मानन्दसमुद्भवः ।' इत्युक्तदिशा रसस्यास्वादानतिरिक्तत्वम्, तथापि 'रसः स्वाद्यते' इति काल्पनिकं भेदमुररीकृत्य कर्मकर्तरि वा प्रयोगः । तदुक्तम्—'रस्यमानतामात्रसारत्वात् प्रकाशशरीरादनन्य एव हि रसः' इति । एवमन्यत्राप्येवंविधस्थले उपचारेण प्रयोगो ज्ञेयः ।

नन्वेतावता रसस्याज्ञेयत्वमुक्तं भवति । व्यञ्जनायाश्च ज्ञानविशेषत्वात् द्वयोरैक्यमापतितम् । ततश्च—

[illegible]

अथ धीरोद्धतः—

मायापरः प्रचण्डश्चपलोऽहंकारदर्पभूयिष्ठः ।
आत्मश्लाघानिरतो धीरैर्धीरोद्धतः कथितः ॥ ३३ ॥

यथा—भीमसेनादिः ।

अथ धीरललितः—

निश्चिन्तो मृदुरनिशं कलापरो धीरललितः स्यात् ।

कैला नृत्यादिका । यथा—रत्नावल्यादौ वत्सराजादिः ।

अथ धीरप्रशान्तः—

सामान्यगुणैर्भूयान्द्विजादिको धीरेशान्तः स्यात् ॥ ३४ ॥

यथा—मालतीमाधवादौ माधवादिः ।

एषां च शृङ्गारादिरूपत्वे भेदानाह—

एभिर्दक्षिणधृष्टानुकूलशठरूपिभिस्तु षोडशधा ।

तत्र तेषां धीरोदात्तादीनां प्रत्येकं दक्षिणधृष्टानुकूलशठत्वेन षोडशप्रकारो नायकः ।

एषु त्वनेकमहिलासमरागो दक्षिणः कथितः ॥ ३५ ॥

द्वयोस्त्रिचतुःप्रभृतिषु नायिकासु तुल्यानुरागो दक्षिणनायकः ।

यथा—

स्नाता तिष्ठति कुन्तलेश्वरसुता, वारोऽङ्गराजस्वसु-
र्द्यूते रात्रिरियं जिता कमलया, देवी प्रसाद्याद्य च ।

अहंकारः अहं महानिति ज्ञानविशेषः । दर्पः शौर्यवीर्याद्यतिशयः । **मृदुः** अप्रचण्डचरितः ॥ **सामान्यगुणै**र्नायकसामान्यगुणैः । धीरोदात्तादित्रितयभिन्नो नायको धीरप्रशान्त इत्यभिप्रायः ॥ **एषां** धीरोदात्तादीनाम् । **षोडशधेति** । शृङ्गारे षोडशप्रकारो नायको भवति रसान्तरे तु चतुष्प्रकार इत्यवधेयम् ॥ **स्नाता** ऋतुस्नाता । वारः सुरतार्थं नियमितदिवसः । जिता जयेनात्मसुरतार्थं प्राप्ता । देवी कृताभिषेका राजपत्नी । देवेन राज्ञा । अप्रतिपत्त्या कर्तव्यानिश्चयेन मूढं व्याकुलम्

---

1. **एभिरिति** । दक्षिणधीरोदात्तः, दक्षिणधीरोद्धतः, दक्षिणधीरललितः, दक्षिणधीरप्रशान्तः, एवं धृष्टादिपदयोगेनेन षोडशप्रकारका नायका इत्यवधेयम् ॥

---

१ ग पुस्तके [illegible] नास्ति. ख पुस्तके तु 'कला रत्नादिका' इति पाठः. २ 'धीरप्रशान्त' [illegible] ३ '[illegible]' घ. ४ '[illegible]' इति क पुस्तके नास्ति. ५ 'नायक' इति नास्ति ग पुस्तके

इत्यन्तःपुरसुन्दरीः प्रति मया विज्ञाय विज्ञापिते
देवेनाप्रतिपत्तिमूढमनसा द्वित्राः स्थितं नाडिका[2]ः ॥

कृतागा अपि निःशङ्कस्तर्जितोऽपि न लज्जितः ।
दृष्टदोषोऽपि मिथ्यावाक्कथितो धृष्टनायकः ॥ ३६ ॥

यथा[1] मम—

शोणं[3] वीक्ष्य मुखं विचुम्बितुमहं यातः समीपं, ततः
पादेन प्रहृतं तया, सपदि तं धृत्वा सहासे मयि ।
किंचित्तत्र विधातुमक्षमतया बाष्पं सृजन्त्याः सखे
ध्यातश्चेतसि कौतुकं वितनुते कोपोऽपि वामभ्रुवः ॥

अनुकूल एकनिरतः—

एकस्यामेव[2] नायिकायामासक्तोऽनुकूलनायकः ।

यथा—

अस्माकं सखि वाससी न रुचिरे, ग्रैवेयकं नोज्ज्वलं,
नो वक्रा गति, रुद्धतं न हसितं, नैवास्ति कश्चिन्मदः ।
किंत्वन्येऽपि जना वदन्ति सुभगोऽप्यस्याः प्रियो[3] नान्यतो
दृष्टिं निक्षिपतीति विश्वमियता मन्यामहे दुःस्थितम्[4] ॥

अप्राप्तिनिश्चयशून्यं वा मनो यस्य तेन ॥ **कृतागाः** कृतापराधः । मिथ्यावाक् मयैतन्न कृतमित्ययथार्थवचनः ॥ तं पादम् । अत्र प्रथमपादेन कारिकायाः प्रथमपादोक्तं द्वितीयपादेन द्वितीयपादोक्तं लक्षणं वेदितव्यम् ॥ **अस्माकमिति** । कस्याश्चिन्नायिकाया उक्तिरियम् । ग्रैवेयकं कण्ठभूषणम् । वक्रा चित्रा । उद्धतमुत्कटम् ।

---

1. **इतीति** । इति अन्तःपुरसुन्दरीः प्रति विज्ञाय यस्या यद् वक्तव्यं तदवगम्य मया विज्ञापिते विनिश्चित्य निवेदिते सति । एतदुक्तं भवति—ऋतुस्नातैव तावदनुपेक्षणीया [illegible] कुन्तलमहाराजतनया, साधारणोऽपि समयो दुर्लङ्घ्यः [illegible], सामान्येऽपि [illegible] [illegible] प्रमुक्ते । एवमुत्तरोत्तराधिककार्यसम्पादनेऽपि महाराज्ञ्याः प्रसादनं तावत्सर्वोपरीति रहस्यम् ॥

2. **नाडिका इति** । अत्यन्तसंयोगे द्वितीया ॥

3. 'वक्त्रमेत्य चुम्बितुमहं' इति [illegible] पाठः ॥

---

१. [illegible] तु [illegible] [illegible] इति [illegible] दृश्यते २. [illegible] इति [illegible] ३. [illegible] 'दुःस्थितं' इत्यधिकं [illegible].

अर्थचिन्तने सहायमाह—

मन्त्री स्यादर्थानां चिन्तायां—

अर्था[1]स्तन्त्रावापादयः। यत्त्वत्र सहायकथनप्रस्तावे— 'मन्त्री स्वं चोभयं वापि सखा तस्यार्थचिन्तने' इति केनचि[2]ल्लक्षणं कृतम्, तदपि राज्ञोऽर्थचिन्तनोपायलक्षणप्रकरणे लक्षयितव्यम्, न तु सहायकथनप्रकरणे। 'नायकस्यार्थचिन्तने मन्त्री सहायः, इत्युक्तेऽपि नायकस्यार्थत एव सिद्धत्वात्। यदप्युक्तम्— 'मन्त्रिणा ललितः शेषा मन्त्रिस्वायत्तसिद्धयः' इति, तदपि स्वलक्षणकथनेनैव लक्षितस्य धीरललितस्य मन्त्रिमात्रायत्तार्थचिन्तनोपपत्तेर्गतार्थम्। न चार्थचिन्तने तस्य मन्त्री सहायः। किं तु स्वयमेव सपादकः। तस्यार्थचिन्तनाद्यभावात्।

शरीरचेष्टाविशेष इत्यर्थ. ॥ **मन्त्रीति** । अस्य इति सहायः इति चानुषज्यते। चिन्तायामुपायनिरूपणे। स्वमण्डले क्रियमाणं कर्म तन्त्रम्। परमण्डले क्रियमाणं कर्म आवाप। आदिना शत्रुनिग्रहादय। **यत्त्विति**। स्वं चेति चकारो वार्थ। उभयं मन्त्रिसद्वयम्। **तस्य** नायकस्य। सहायकथनपरत्वे दोषमाह—**नायकस्येति**। एवं च स्वं चेत्यादि निरर्थकम्। तदनुपादानेऽपि तल्लाभात्। स्वयं चिन्तापक्षे स्वस्य सहकारित्वरूपसहायत्वानुपपत्तेरुभयचिन्ताया कारणान्तरप्रसङ्गाच्चेति भाव। सखिशब्दस्योपायार्थत्वम्, न तु सहायपरत्वमित्यवगन्तव्यम्। **मन्त्रिणेति**। आयत्तसिद्धिरित्यन्वय। ललितो धीरललित। शेषा धीरोदात्तादयः। **स्वलक्षणेति**। **चिन्तन इति**। धीरललितलक्षणनिविष्टेन तस्यार्थचिन्तनाद्यभाव.। तेन च मन्त्रिमात्रायत्तार्थसिद्धिकत्वं प्रतीयत इति भाव। **तस्य** धीरललि-

---

1. **तन्त्रेति**। तन्त्रण तन्त्रम्। स्वाधीनत्वात्स्वराष्ट्रे क्रियमाण कर्मापि तन्त्रशब्देनोच्यते। आ समन्ताद् वपन्ति इतिकर्तव्यताबीजमत्रेत्यावापः। 'डुवप् बीजतन्तुसन्ताने' 'हलश्च' इति घञ्। 'पर प्रत्यावाप फलति कृतसेकस्तरुरिव' इति ॥

2. **केनचिदिति**। दशरूपके धनञ्जयेनेत्यर्थ.। तत्राय सुगमः सन्दर्भः—अथ नेतुः कार्यान्तरसहायानाह—'मन्त्री स्व चोभय वापि सखा तस्यार्थचिन्तने। तस्य नेतुः अर्थचिन्ताया तन्त्रावापादिलक्षणाया मन्त्री वा आत्मा वा उभय वा सहाय.। तत्र विभागमाह—'मन्त्रिणा ललित, शेषा मन्त्रिस्वायत्तसिद्धय.।' उक्तलक्षणो ललितो नेता मन्त्रायत्तसिद्धि.। शेषा धीरोदात्तादय अनियमेन मन्त्रिणा स्वेन वा उभयेन वा अङ्गीकृतसिद्धय इति ॥

---

1 क पुस्तके तथा मुद्रितपुस्तकेषु 'मन्त्री स्यादर्थाना चिन्ताया तद्वदवरोधे ।' इत्यार्धे
[illegible] न 'मन्त्री स्यादर्थचिन्तायामर्थास्तन्त्रावापादय ।' [illegible]

अथान्तःपुरसहायाः—

तद्वदवरोधे ।
वामनशण्ढकिरातम्लेच्छाभीराः शकारकुब्जाद्याः ॥ ४३ ॥
मदमूर्खताभिमानी दुष्कुलतैश्वर्यसंयुक्तः ।
सोऽयमनूढाभ्राता राज्ञः श्यालः शकार इत्युक्तः ॥ ४४ ॥

आद्यग्रहणान्मूकादयः । तत्र शण्ढवामनकिरातकुब्जादयो यथा रत्नावल्याम्—

नष्टं वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपा-
मन्तःकञ्चुकिकञ्चुकस्य विशति त्रासादयं वामनः ।
पर्यन्ताश्रयिभिर्निजस्य सदृशं नाम्नः किरातैः कृतं
कुब्जा नीचतयैव यान्ति शनकैरात्मेक्षणाशङ्किनः ॥

शकारो मृच्छकटिकादिषु प्रसिद्धः । अन्येऽपि यथादर्शनं ज्ञातव्याः ।

अथ दण्डसहायाः—

दण्डे सुहृत्कुमाराटविकाः सामन्तसैनिकाद्याश्च ।

दुष्टनिग्रहो दण्डः । स्पष्टम् ।

ऋत्विक्पुरोधसः स्युर्ब्रह्मविदस्तापसास्तथा धर्मे ॥ ४५ ॥

त्वम् । सचिव एव नृपदेव निष्पादकः प्रधानकारणम् ॥ **तद्वदिति** । अवरोधेऽन्तःपुरे । वामनादयो नायकस्य सहाया इत्यर्थः । [illegible] क्लीबो वा । शकारमाह—**मदेति** । मदमूर्खताभ्यामभिमानी अहं महानिति ज्ञानवान् । मदाभिमानवान् वा ॥ **नष्टमिति** । वानरवेगेनान्तःपुरप्रविष्टं विद्रवन्तमालोक्य भयेनान्तःपुरस्थानां पलायनवर्णनमिदम् । [illegible] । वर्षवरः षण्ढः । 'सौविदल्लाः कञ्चुकिनः' इत्यमरः । [illegible] पर्यन्तदेशं [illegible] इत्यर्थः ॥ मृच्छकटिकं नाटकविशेषः । अन्ये म्लेच्छाभीरादयः । आटविका वनचारिणः ॥ **ऋत्विगिति** । धर्मे धर्मकर्मणि

---

1. [illegible]

2. [illegible]

अथ विलासः—

धीरा दृष्टिर्गतिश्चित्रा विलासे सस्मितं वचः ।

यथा—

दृष्टिस्तृणीकृतजगत्त्रयसत्त्वसारा
धीरोद्धता नमयतीव गतिर्धरित्रीम् ।
कौमारकेऽपि गिरिवद्गुरुतां दधानो
वीरो रसः किमयमेत्युत दर्प एव ॥

संक्षोभेष्वप्यनुद्वेगो माधुर्यं परिकीर्तितम् ॥ ५२ ॥

ऊह्यमुदाहरणम् ।

भीशोकक्रोधहर्षाद्यैर्गाम्भीर्यं निर्विकारता ।

यथा—

आहूतस्याभिषेकाय विसृष्टस्य वनाय च ।
न मया लक्षितस्तस्य स्वल्पोऽप्याकारविभ्रमः ॥

व्यवसायादचलनं धैर्यं विघ्ने महत्यपि ॥ ५३ ॥

यथा—

श्रुताप्सरोगीतिरपि क्षणेऽस्मिन्[1]हरः प्रसंख्यानपरो बभूव ।
आत्मेश्वराणां नहि जातु विघ्नाः समाधिभेदप्रभवो भवन्ति ॥

अधिक्षेपापमानादेः प्रयुक्तस्य परेण यत् ।
प्राणात्ययेऽप्यसहनं तत्तेजः समुदाहृतम् ॥ ५४ ॥

तादि ॥ **तृणीकृतौ** तुच्छीकृतौ जगत्त्रयस्य सत्त्वमुत्साह सारो बलं च यया सा । धीरा मन्थरा । उद्धता उद्भटा च । एतेन गतेश्चित्रत्वं नैकरूपत्वं च । अत्र नायकस्य उत्साहदर्पयोरतिशयसूचनाय वीररसत्वेन दर्पत्वेन चोल्लेख ॥ **ऊह्यमुदाहरणमिति** । यथा मम रामविलासे—'तन्निपीय कटु कर्णपदव्या खेदमाप न मनागपि राम । शूलपाणिरिव घोरमुदग्रं कालकूटपटलं किल पूर्वम् ॥' [2]**तस्य** श्रीरामस्य । **आकारो** मुखनेत्रादि तस्य विभ्रमो वैपरीत्यं येन हर्षशोकादयो लक्ष्यन्ते ॥ **व्यवसायात्** प्रारब्धकर्मणः । **अचलनम्** अप्रच्यवनम् ॥ **प्रसंख्यानपरो** योगनिष्ठ । **आत्मेश्वराणा** मनोनिरोधक्षमाणाम् ॥ **अधिक्षेपो**

1. **अस्मिन्निति** । अस्मिन्क्षणे वसन्ताविर्भावसमये ॥

घ. २. 'तस्य—' इत्यादि लक्ष्यन्ते' इत्यन्त पाठो हि 'मनोनिरोधक्षमाणाम्' इत्यत्रादर्शे

वाग्वेषयोर्मधुरता तद्वच्छृङ्गारचेष्टितं ललितम् ।
दानं सप्रियभाषणमौदार्यं शत्रुमित्रयोः समता ॥ ५५ ॥

एषामुदाहरणान्यूह्यानि ।

अथ नायिका त्रिभेदा स्वान्या साधारणस्त्रीति ।
नायकसामान्यगुणैर्भवति यथासंभवैर्युक्ता ॥ ५६ ॥

नायिका पुनर्नायकसामान्यगुणैस्त्यागादिभिर्यथासंभवैर्युक्ता भवति । सा च स्वस्त्री अन्यस्त्री साधारणस्त्रीति त्रिविधा ।

तत्र स्वस्त्री—

विनयार्जवादियुक्ता गृहकर्मपरा पतिव्रता स्वीया ।

यथा—

'लज्जापज्जत्तपसाहणाइं परभत्तिणिप्पिदामाइं ।
अविणअदुम्मेधाइं धण्णाण घरे कलत्ताइं ॥'

[illegible]

पुनश्च—

अवस्थाभिर्भवन्त्यष्टावेताः षोडशभेदिताः ।
स्वाधीनभर्तृका तद्वत्खण्डिताथाभिसारिका ॥ ७२ ॥
कलहान्तरिता विप्रलब्धा प्रोषितभर्तृका ।
अन्या वासकसज्जा स्याद्विरहोत्कण्ठिता तथा ॥ ७३ ॥

तत्र—

कान्तो रतिगुणाकृष्टो न जहाति यदन्तिकम् ।
विचित्रविभ्रमासक्ता सा स्यात्स्वाधीनभर्तृका ॥ ७४ ॥

यथा—'अस्माकं सखि वाससी—' इत्यादि (९२पृ.) ।

पार्श्वमेति प्रियो यस्या अन्यसंभोगचिह्नितः ।
सा खण्डितेति कथिता धीरैरीर्ष्याकषायिता ॥ ७५ ॥

यथा—'तदवितथमवादीः—' इत्यादि (११३पृ.) ।

अभिसारयते कान्तं या मन्मथवशंवदा ।
स्वयं वाभिसरत्येषा धीरैरुक्ताभिसारिका ॥ ७६ ॥

क्रमेण यथा—

न च मेऽवगच्छति यथा लघुतां, करुणां यथा च कुरुते स मयि ।
निपुणं तथैनमभिगम्य वदेरभिदूति काचिदिति संदिदिशे ॥

'उत्क्षिप्तं करकङ्कणद्वयमिदं, बद्धा दृढं मेखला,
यत्नेन प्रतिपादिता मुखरयोर्मञ्जीरयोर्मूकता ।

[illegible] । ईर्ष्याकषायिता ईर्ष्या [illegible] ॥ अभिसा[illegible] [illegible]—अभिसारयत इति ॥ न चेति । स [illegible] ॥ उत्क्षि-

[illegible]

[illegible]

आरब्धे रभसान्मया प्रियसखि क्रीडाभिसारोत्सवे,
चण्डालस्तिमिरावगुण्ठनपटक्षेपं विधत्ते विधुः ॥'

संलीना स्वेषु गात्रेषु मूकीकृतविभूषणा ।
अवगुण्ठनसंवीता कुलजाभिसरेद्यदि ॥ ७७ ॥
विचित्रोज्ज्वलवेषा तु रणन्नूपुरकङ्कणा ।
प्रमोदस्मेरवदना स्याद्वेश्याभिसरेद्यदि ॥ ७८ ॥
मदस्खलितसंलापा विभ्रमोत्फुल्ललोचना ।
आविद्धगतिसंचारा स्यात्प्रेष्याभिसरेद्यदि ॥ ७९ ॥

तत्राद्ये 'उरसिक्षिप्तं—'इत्यादि (१२० पृ.) । अनयोस्त्वनुदाहरणम् ।
प्रसङ्गादभिसारस्थानानि कथ्यन्ते—

क्षेत्रं वाटी भग्नदेवालयो दूतीगृहं वनम् ।
मालापञ्चः श्मशानं च नद्यादीनां तटी तथा ॥ ८० ॥

[illegible]

'तव कितव किमाहितैर्वृथा नः क्षितिरुहपल्लवपुष्पकर्णपूरैः ।
ननु जनविदितैर्भवद्व्यलीकैश्चिरपरिपूरितमेव कर्णयुग्मम् ॥'
'मुहुरुपहसितामिवालिनादैर्वितरसि नः कलिकां किमर्थमेनाम् ।
वसतिमुपगतेन धाम्नि तस्याः शठ कलिरेष महांस्त्वयाद्य दत्तः ॥'
'इति गदितवती रुषा जघान स्फुरितमनोरमपक्ष्मकेसरेण ।
श्रवणनियमितेन कान्तमन्या सममसिताम्बुरुहेण चक्षुषा च ॥'

इयं हि वक्रोक्त्या परुषवचनेन कर्णोत्पलताडनेन च धीरमध्यताधीरमध्यताधीरप्रगल्भताभिः संकीर्णा । एवमन्यत्राप्यूह्यम् ।

[1] [2] इतरा अप्यसंख्यास्ता नोक्ता विस्तरशङ्कया ॥ ८८ ॥

ता नायिकाः ।

पिवति पाति वेति व्युत्पत्तिद्वयेन सव विटपा अयमपि विटप इति तुल्ययोर्योगो योग्यो भवतीत्यर्थ. । भवद्व्यलीकैर्भवतोऽप्रियवचनं । स्फुरितो मनोरमः पक्ष्मवत्केसरो यस्य तेन । चक्षु पक्षे—पक्ष्मैव केसरो यस्य तेन । वक्रोक्त्येति । विटशब्दस्य नानार्थकल्पनाविचित्रोक्त्येत्यर्थ. ॥ इतरा अपि पद्मिनीहस्तिनीप्रभृतय. ॥

अमु विटान्पातीति विटपं पल्लवम् । 'विटपः पल्लवे पिङ्गे' इति विश्व. । ददस्व प्रयच्छ । व्रज गच्छ । यतो दानाच्चिराय सदृशोरनुरूपयोर्योगो भवतु । उभयोरपि विटपत्वादिति भाव. ॥ हे कितव धूर्त, वृथा व्यर्थमेवाहितैः । तत्कार्यस्यान्यथासिद्धत्वादिति भावः । तव सवन्धिभिः क्षितिरुहाणा पल्लवा. पुष्पाणि च तान्येव कर्णं पूरयन्तीति कर्णपूराः कर्णावतसाः । तैर्नोऽस्माक कि तत्साध्यम् । न किंचिदस्तीत्यर्थ । ननु अङ्ग, जनविदितैर्भवद्व्यलीकैस्तवाप्रियवचनैः कर्णयुग्म चिरपरिपूरित नित्य पूर्णमेव । अतः पूरितस्य पूरणायोगादलमेभिरिति ॥ अलिनादैर्मुहुरुपहसिता प्रतारणार्थेति प्रहस्यमानामिव स्थितामेना कलिका कोरकम्, अत्र कलि कलह च । 'कलहे च युगे कलि.' इति वैजयन्ती । स्त्रीप्रत्ययस्त्वविवक्षितः श्लेषे । नः अस्माक किमर्थ वितरसि । हे शठ गूढविप्रियकारिन्, तस्या· त्वत्प्रियाया धाम्नि भवने वसतिं स्थितिमुपगतेन त्वया अद्यैव वर्तमानो महान् कलि. कलहो दत्त· । स्वदत्त एव महति कलौ स्थिते किं कल्यन्तरेणेत्यर्थः ॥ इति गदितवती उक्तवती अन्या स्त्री रुषा कान्त स्फुरितान्युज्ज्वलानि मनोरमाणि च पक्ष्माणीव केसराणि । अन्यत्र केसराणीव पक्ष्माणि, यस्य तेन श्रवणे नियमितेन श्रोत्रे निरुद्धेन असिताम्बुरुहेण नीलोत्पलेन चक्षुषा च सम युगपज्जघान ताडयामासेति ॥

1. इतरा इति । तथा चोक्तम्—'पुनश्च तास्त्रिधा ज्ञेया दिव्यादिव्योभयात्मना । चतुर्धा चोद्धतोदात्ता ललिता शान्तिका तथा ॥ अक्षता च क्षता यातायाता यायावरेत्यपि ।

---

१ अयं श्लोक क-ग-घ पुस्तके नास्ति, २ 'इतरा—' इति कारिकार्धं नास्ति ग पुस्तके.

अथ विब्बोकः—

विब्बोकस्त्वतिगर्वेण वस्तुनीष्टेऽप्यनादरः ॥ १०० ॥

यथा—

'यासां सत्यपि सद्गुणानुसरणे दोषानुवृत्तिः परा,
याः प्राणान्[1]वरमर्पयन्ति, न पुनः संपूर्णदृष्टिं प्रिये ।
अत्यन्ताभिमतेऽपि वस्तुनि[2] विधिर्यासां निषेधात्मक-
स्तास्[3]त्रैलोक्यविलक्षणप्रकृतयो वामाः प्रसीदन्तु ते ॥'

अथ किलकिञ्चितम्—

स्मितशुष्करुदितहसितत्रासक्रोधश्रमादीनाम् ।
सांकर्यं किलकिञ्चितमभीष्टतमसंगमादिजाद्धर्षात् ॥ १०१ ॥

यथा—

'पाणिरोधमविरोधितवाञ्छं भर्त्सनाश्च मधुरस्मितगर्भाः ।
कामिनः स्म कुरुते करभोरूर्हारि शुष्करुदितं च सुखेऽपि ॥'

यासामिति । कंचित्कामिनं प्रति [illegible]वचनमिदम् । सद्गुण[illegible] [illegible] दोषाणामनुवृत्तिः सैव पुनः पुनर्[illegible] ॥ सांकर्यं मेलनम् ॥ पाणिरोधं [illegible] । हारि मनोहरम् । [illegible]

---

1. प्राणानिति । [illegible]
2. वस्तूनीति । [illegible] ॥
3. तास इति । [illegible]

अथ विलासः—

यानस्थानासनादीनां मुखनेत्रादिकर्मणाम् ॥ ९९ ॥
विशेषस्तु विलासः स्यादिष्टसंदर्शनादिना ।

यथा—

'अत्रान्तरे किमपि वाग्विभवातिवृत्त-
वैचित्र्यमुल्लसितविभ्रममायताक्ष्याः ।
तद्भूरिसात्त्विकविकारमपास्तधैर्य-
माचार्यकं विजयि मान्मथमाविरासीत् ॥'

अथ विच्छित्तिः—

स्तोकाप्याकल्परचना विच्छित्तिः कान्तिपोषकृत् ।

यथा—

'स्वच्छाम्भःस्नपनविधौतमङ्गमोष्ठ-
स्ताम्बूलद्युतिविशदो विलासिनीनाम् ।
वासस्तु प्रतनु विविक्तमस्त्वितीया-
नाकल्पो यदि कुसुमेषुणा न शून्यः ॥'

जूटो यस्या अस्तीति ॥ **अत्रान्तरे** नायकसंदर्शनादिसमये । वाग्विभवमतिवृत्तमतिक्रम्य स्थितं वैचित्र्यं गमनादिचातुरी यस्मात्तत् । ते प्रसिद्धा भूरिसात्त्विकविकाराः स्तम्भादयो यस्मात्तत् । आचार्यकमुपाध्यायकर्म । उपदेश इत्यर्थः ॥ **स्तोका** अल्पा आकल्परचना वेषविन्यासः । **प्रतनु** अतिसूक्ष्मम् । **विविक्तं** निर्मलम् ॥

महाकुलोत्पन्ना, कुलं स्वामिकुलमनति निष्कलङ्कम् । अयं मल्लक्षणो जनः न त्वेन स्थिरः, जीवितं च न स्थिरम् । अचिरावस्थायिनः शरीरस्य कृते मातृपितृभर्तृकुलकलङ्कनमतितरामनुचितमिति भावः ॥

1. इतीति । इत्येवंरूप इयान् एतावानेव विलासिनीनामाकल्पो नेपथ्यमस्तु । [illegible]रित्यर्थः । यदि स कुसुमेषुणा कामेन शून्यो न स्यात् । अन्यथा [illegible] [illegible] भावः ॥

[illegible] इति ग. २. 'स्तोकभूषणादौ [illegible] इति ग. ३ '[illegible]' इति ग.

अथ विब्बोकः—

विब्बोकस्त्वतिगर्वेण वस्तुनीष्टेऽप्यनादरः ॥ १०० ॥

यथा—

'यासां सत्यपि सद्गुणानुसरणे दोषानुवृत्तिः परा,
याः प्राणान्वरमर्पयन्ति, न पुनः सपूर्णदृष्टिं प्रिये ।
अत्यन्ताभिमतेऽपि वस्तुनि विधिर्यासां निषेधात्मक-
स्तास्त्रैलोक्यविलक्षणप्रकृतयो वामाः प्रसीदन्तु ते ॥'

अथ किलकिञ्चितम्—

स्मितशुष्करुदितहसितत्रासक्रोधश्रमादीनाम् ।
सांकर्यं किलकिञ्चितमभीष्टतमसंगमादिजाद्धर्षात् ॥ १०१ ॥

यथा—

'पाणिरोधमविरोधितवाञ्छं भर्त्सनाश्च मधुरस्मितगर्भाः ।
कामिनः स कुरुते करभोरूर्हारि शुष्करुदितं च सुखेऽपि ॥'

यासामिति । कंचित्कामिनं प्रति सख्युराशीर्वचनमिदम् । सद्गुणानामनुसरणे परैरुद्भावने दोषाणामनुवृत्तिः स्वय पुन पुनरुद्भावनम् ॥ **सांकर्यं** मेलनम् ॥ **पाणिरोधं** वस्त्रक्षेपणादिप्रवृत्तनायककरप्रतिबन्धम् । हारि मनोहरम् । कारणं विना रुदितं

---

1. **प्राणानिति** । मानमहत्त्वात्प्राणार्पणं तावत्कुर्वन्, न पुनः सपूर्णदृष्ट्यर्पणम् ॥

2. **वस्तुनीति** । नीवीवसनादिरूपे ॥

3. **वामा इति** । वामा योषितः । इष्टेऽपि वस्तुनि अनिष्टोद्भावनं विलक्षणप्रकृतित्वे बीजम् ।

4. **पाणीति** । करभोरूः स्त्री अविरोधितवाञ्छमनिवारितप्रियमनोरथं यथा तथा कामिनः पाणिरोधं नीवीमोक्षणे व्यापृतस्य प्रियपाणेर्निवारणं कुरुते स्म । तथा मधुरं स्मितं गर्भे अन्तर्वर्ति यासु ता मन्दहासमिश्रा भर्त्सनास्तर्जनाश्च कुरुते स्म । तथा सुखेऽपि अधरपीड-

---

१ 'गर्वाभिमानादिष्टेऽपि विब्बोकोऽनादरक्रिया । तथा वात्स्यायने —'[illegible] [illegible] [illegible] । [illegible] । [illegible] अभिनवगुप्तपादास्तु [illegible] । [illegible] (न) [illegible] [illegible] [illegible]' इति ग.
२ 'वामा—' इति श्लोको नास्ति ग-पुस्तके. ३. '[illegible] [illegible]' इति ग ४ '[illegible] [illegible]' इति ग.

यथा—

'वृद्धोऽन्धः पतिरेष मञ्चकगतः, स्थूणावशेषं गृहं,
कालोऽभ्यर्णजलागमः, कुशलिनी वत्सस्य[1] वार्तापि नो ।
यत्नात्सञ्चिततैलबिन्दुघटिका भग्नेति पर्याकुला
दृष्ट्वा गर्भभरालसां निजवधूं[2] श्वश्रूश्चिरं रोदिति ॥'

अथ श्रमः—

खेदो रत्यध्वगत्यादेः श्वासनिद्रादिकृच्च्छ्रमः[3] ।

यथा[2]—

'सद्यः[3] पुरीपरिसरेऽपि शिरीषमृद्वी
सीता जवात्त्रिचतुराणि पदानि गत्वा ।
गन्तव्यमस्ति कियदित्यसकृद्ब्रुवाणा
रामाश्रुणः कृतवती प्रथमावतारम्[4] ॥'

अथ मदः—

संमोहानन्दसंभेदो मदो मद्योपयोगजः[5] ॥ १४६ ॥

स्थूणा स्तम्भः । अभ्यर्णजलागमो निकटस्थवर्षासमयः । तैलबिन्दूनां घटिका क्षुद्रभाजनम् ॥ **सद्य इति** । वारवारं गन्तव्याध्वपरिमाणजिज्ञासया सीताया स्वल्पपथलङ्घनश्रममवधार्य श्रीरामस्य रोदनम् ॥ **संमोहानन्दयोः** संभेदो मेलक

---

1. **वत्सस्येति** । वत्सस्य पुत्रस्य ॥

2. **निजवधूमिति** । निजवधूं आत्मस्नुषाम् ॥

3. **श्रम इति** । बहुतरशारीरव्यापारजन्मा निःश्वासाङ्गसमर्दननिद्रादिकारणीभूतः खेदविशेषः श्रम इति । यदाहुः—'अध्वव्यायामसेवाद्यैर्विभावैरनुभावकैः । गात्रसंवाहनैरास्यसंकोचैरङ्गमोटनैः ॥ निःश्वासैर्जृम्भितैर्मन्दैः पादोत्क्षेपैः श्रमो मतः ॥' इति । अयं च सत्यपि बले जायते, शारीरव्यापारादेव च जायते न तु ग्लानिः । अतो ग्लानितः श्रमस्य भेदः ॥

4. **प्रथमेति** । प्रथमावतारं पूर्वाविष्करणम् ॥

5. **मद इति** । मद्याद्युपयोगजन्मा उल्लासाख्यः शयनहसितादिहेतुश्चित्तवृत्तिविशेषो

---

१ '—श्रमः खेदादिकारकः रतान्मार्गगमनादेश्च यः खेदः स श्रमः खेदमर्दनाद्यनुभावजनकः ।' इति ग. २ 'यथा' ग-पुस्तके नास्ति ३ ग-पुस्तके तु 'सद्य' इति श्लोकस्य स्थाने 'अइ पिहुलं घेत्तूण समागदम्हि कहिं तुरिअम् । समसेअसलिलणीसासणीसहा वीसमानि खणम् ॥' इति ४ 'च' घ ५ 'हर्षोत्कर्षो मदः पानात्स्खलदङ्गवचोगतिः । मद्यादिपानाद्यो हर्षोत्कर्षवचनगत्यादिस्खलनानुमापकः ।' इति ग.

अमुना चोत्तमः शेते, मध्यो हसति गायति ।
अधमप्रकृतिश्चापि परुषं वक्ति रोदिति ॥ १४७ ॥

यथा—

'[1]प्रातिभं त्रिसरकेण गतानां वक्रवाक्यरचनारमणीयः ।
गूढसूचितरहस्यसहासः सुभ्रुवां प्रववृते परिहासः ॥'

[2]अथ जडता—

अप्रतिपत्तिर्जडता स्यादिष्टानिष्टदर्शनश्रुतिभिः ।
अनिमिषनयननिरीक्षणतूष्णींभावादयस्तत्र ॥ १४८ ॥

[3]यथा मम कुवलयाश्वचरिते प्राकृतकाव्ये—

'णवरिअ तं जुअजुअलं अण्णोण्णं णिहिदसजलमन्थरदिट्ठिं ।

मद्यस्यानवस्य उपयोगाद् भक्षणाज्जात । **अमुना** मदेन ॥ **प्रातिभं** प्रागल्भ्यम् । त्रिसरकेण मद्येन । गूढं सूचितं रहस्य यत्र स चासौ हासश्चेति ॥ **अप्रतिपत्तिः** कर्तव्यानिश्चयः । तूष्णींभावो मौनम् । तत्र जडतायाम् ॥ **णवरिअ**

मद इति । तत्रोत्तमे पुरुषे स्वापोऽनुभावः । मध्यमे हसितगाने । अधमे तु रोदनपरुषोक्त्यादि । अयं च मदस्त्रिविधः । तरुणमध्यमाधमभेदात् । अव्यक्तालगनवाक्यैः सुकुमारस्खलद्गत्या च योऽभिनीयते स आद्यः । भुजाक्षेपस्खलितघूर्णनादिभिर्मध्यमः । गतिभङ्गस्मृतिनाशहिक्काछर्द्यादिभिरधमः । प्रदीपे तु 'उत्तमसत्त्वः प्रहसति गायति तद्वच्च मध्यमप्रकृतिः । परुषवचनाभिधायी शेते रोदित्यधमसत्त्वः ॥' इति व्यत्यासोऽस्ति ॥

1. प्रातिभमिति । मदानुभाववर्णनमिदम् । त्रयाणां सरकाणां समाहारस्त्रिसरकं त्रिवारमधुपानम् । 'सरकः शीधुपात्रे स्याच्छीधुपाने च शीधुनि ।' इति विश्वः । तेन त्रिसरकेण । 'त्रिपान मदाभिभूतिः' इति पाठप्रसिद्धिः । प्रतिभैव प्रातिभं प्रतिभाविशेषः । तत्प्रातिभं गतानां त्रिवारसुरापानोत्कटमदोद्रेकप्रागल्भ्यभाजां सुभ्रुवां वक्रवाक्यरचनारमणीयः वक्रोक्तिमनोरमः । गूढानि पूर्वं लज्जया गुप्तानि, सूचितानि सम्प्रति मदेन प्रकाशितानि रहस्यानि मान्मथवचश्चेष्टाप्रभृतीनि यस्मिन् स गूढसूचितरहस्यः, स चासौ सहासश्चेति विशेषणसमासः । प्रववृते प्रवृत्तः ॥

2. जडतेति । चिन्तोत्कण्ठाभयविरहेष्टानिष्टदर्शनश्रवणादिजन्यावश्यकर्तव्यार्थप्रतिसंधानविकला चित्तवृत्तिर्जडता । इयं च मोहात्पूर्वतः परतश्च जायते । यदाहुः—
'कार्याविवेको जडता पश्यतः शृण्वतोऽपि वा । तद्विभावाः प्रियानिष्टदर्शनश्रवणे रुजा ॥
अनुभावास्त्वमी तूष्णींभावविस्मरणादयः । सा पूर्वं परतो वा स्यान्मोहादिति विदां मतम् ॥' इति ॥

3. यथेति । स्कन्धकमिदम् । तदुक्तम्—'स्कन्धकमिति तन्निगदितं यत्र चतुष्प-

---

१. 'अथ जडता' इति नास्ति क्वचित्. २. 'यथा—' इत्यादिरंशो नास्ति क्वचित्.

आलेक्खओपिअं विअ खणमेत्तं तत्थ संट्ठिअं मुअसण्णं ॥'

अथोग्रता[1]—

शौर्यापराधादिभवं भवेच्चण्डत्वमुग्रता ।
तत्र स्वेदशिरःकम्पतर्जनाताडनादयः ॥ १४९ ॥

यथा—

'प्रणयिसखीसलीलपरिहासरसाधिगतै-
र्ललितशिरीषपुष्पहननैरपि ताम्यति यत् ।
वपुषि वधाय तत्र तव शस्त्रमुपक्षिपतः
पततु शिरस्यकाण्डयमदण्ड इवैष भुजः ॥'

अथ मोहः—

मोहो[2] विचित्तताभीतिदुःखावेगानुचिन्तनैः ।
मूर्च्छनाज्ञानपतनभ्रमणादर्शनादिकृत् ॥ १५० ॥

यथा—

'तीव्राभिषङ्गप्रभवेण वृत्तिं मोहेन संस्तम्भयतेन्द्रियाणाम् ।

इति । 'केवलं तद्युवयुगलमन्योन्यं निहितसजलमन्थरदृष्टि । आलेख्यार्पितमिव क्षणमात्रं तत्र संस्थितं मुक्तसंज्ञम् ॥' इति संस्कृतम् । णवरिअशब्दः केवलार्थे देशी ॥ चण्डत्वमत्यन्तासहिष्णुत्वम् । प्रणयिनी या सखी तस्याः परिहासरसेनाधिगतैः प्राप्तैः । **अकाण्डयमदण्ड इति ।** अकालयमदण्ड इत्यर्थः । अत्र मालतीशरीरे शस्त्रप्रहारं कुर्वतोऽघोरघण्टस्यापराधेन माधवस्य चण्डत्वमेतादृशोक्त्या व्यज्यते ॥ चित्तस्य निमीलनत्वं **विचित्तता** । सुषुप्तिवारणायाह—**भीतीति** । आवेगः संभ्रमः । **अनुचिन्तन**मत्यन्तचिन्ता । **अदर्शन**मज्ञानम् ॥ **अभिषङ्गः**

लगाष्टकेनार्धं स्यात् । तत्तुल्यमग्रिमदलं भवति चतुःषष्टिमात्रकशरीरमिदम् ॥' इति दामोदरमिश्राः ॥

1. **उग्रतेति ।** अधिक्षेपापमानादिप्रभवा किमस्य करोमीत्याद्याकारा चित्तवृत्तिरुग्रता । यदाहुः—'नृपापराधोऽसद्दोषकीर्तनं चोरधारणम् । विभावाः स्युरथो बन्धो वधस्ताडनभर्त्सने ॥ एते यत्रानुभावास्तदौग्र्यं निर्दयतात्मकम् ॥'

2. **मोह इति ।** भयवियोगादिप्रयोज्या वस्तुतत्त्वानवधारिणी चित्तवृत्तिर्मोहः । 'तत्त्वानवधारणवती चित्तवृत्तिः' इति तु नव्याः ॥

---

१. 'अथोग्रता' इति नास्ति क पुस्तके. २ इतोऽग्रे [illegible] । [illegible] इत्यधिकं क पुस्तके. ३ [illegible] इति ग.

अज्ञातभर्तृव्यसना मुहूर्तं कृतोपकारेव रतिर्बभूव ॥'

अथ विबोधः—

निद्रापगमहेतुभ्यो [1]विबोधश्चेतनागमः ।
जृम्भाङ्गभङ्गनयनमीलनाङ्गावलोककृत् ॥ १५१ ॥

यथा—

'[2]चिररतिपरिखेदप्राप्तनिद्रासुखानां
चरममपि शयित्वा पूर्वमेव प्रबुद्धाः ।
अपरिचलितगात्राः कुर्वते न प्रियाणा-
मशिथिलभुजचक्राश्लेषभेदं तरुण्यः ॥'

अथ स्वप्नः—

स्वप्नो निद्रामुपेतस्य विषयानुभवस्तु यः ।

[illegible] । **संलक्ष्यमदता** [illegible] । **व्यसनं** [illegible] । **निद्रापगमहेतुभ्यो** [illegible] । **नयनमीलनं** [illegible] । **चरमं** [illegible] । **पूर्वं** [illegible] । [illegible]

---

1. विबोध इति । [illegible]

2. चिरेति । [illegible]

कोपावेगभयग्लानिसुखदुःखादिकारकः ॥ १५२ ॥

यथा—

'मामाकाशप्रणिहितभुजं निर्दयाश्लेषहेतो-
र्लब्धायास्ते कथमपि मया स्वप्नसंदर्शनेन ।
पश्यन्तीना न खलु बहुशो न स्थलीदेवतानां
मुक्तास्थूलास्तरुकिसलयेष्वश्रुलेशाः पतन्ति ॥'

अथापस्मारः—

मनःक्षेपस्त्वपस्मारो ग्रहाद्यावेशनादिजः ।
भूपातकम्पप्रस्वेदफेनलालादिकारकः ॥ १५३ ॥

'आश्लिष्टभूमिं रसितारमुच्चैर्लोलद्भुजाकारबृहत्तरङ्गम् ।
फेनायमानं पतिमापगानामसावपस्मारिणमाशशङ्के ॥'

अथ गर्वः—

गर्वो मदः प्रभावश्रीविद्यासत्कुलतादिजः ।
अवज्ञासविलासाङ्गदर्शनाविनयादिकृत् ॥ १५४ ॥

तत्र शौर्यगर्वो यथा—

'धृतायुधो यावदहं तावदन्यैः किमायुधैः ।
यद्वा न सिद्धमस्त्रेण मम तत्केन साध्यताम् ॥'

भुजाक्षेपं कर्तुमर्हतीति । अस्य निद्राभङ्गो नोचित इति भाव ॥ **मामिति** । यक्षस्य मेघं प्रति प्रियायै वाचनिकार्पणमिदम् । मा यक्षम् । कथमपि महता कष्टेन । मुक्ता इव स्थूला ॥ **मनःक्षेप इति** । मनसो नाडीविशेषनिवेशेन घूर्णनमित्यर्थः । ग्रहादीत्यादिना भूतादिपरिग्रह । मध्यमादिपदेन धातुवैषम्यादिपरिग्रहः ॥ **फेनायमानं** फेनमुद्वमन्तम् । असौ श्रीकृष्णः आशशङ्के ज्ञातवान् ॥ **मद**श्चित्तविकारविशेषः । राज्ञ कोशदण्डादिजन्यः प्रतापः **प्रभावः** । श्रीरित्रि-

1. **मामिति** । मया कथमपि स्वप्नसंदर्शनेन लब्धायास्ते तव निर्दयाश्लेषहेतोः गाढालिङ्गनार्थम् आकाशप्रणिहितभुजं शून्यार्पितबाहुं मा पश्यन्तीनां स्थलीदेवतानां वनदेवतानां

१. 'मात्सर्यमयशोकादेरुन्मादस्य कारणम् । निद्राणस्यापि विषयज्ञानं स्वप्नः । मात्सर्याद्युन्मादहेतु ।' इति ग. २ 'भूयश्चाह त्वमसि शयने कण्ठलग्ना पुरा मे—'इत्युदाहरणान्तरं ग पुस्तके ३ 'आवेशो ग्रहदुःखाद्यैरपस्मारः स्मृतो बुधैः । घुर्घुरध्वनिभूपातफेनाक्रान्दोलनादिकृत् ॥' इति ग ४. 'लोलद्' ग ५ 'औद्धत्यलक्षणावज्ञाहेतुर्गोरवनादिकृत् । प्रभावादिजन्यो मदो गर्वः । आदिशब्दाद्धारण्यसौभाग्यादिः । स चाविनयाद्यनुभावहेतुः ।' इति ग. ६. 'यथा' क घ. ७ अस्याग्रे 'नमन्यदप्यूह्यम्' इत्यधिकं ग-पुस्तके

अथ मरणम्—

शराद्यैर्मरणं जीवत्यागोऽङ्गपतनादिकृत् ।

यथा—

'राममन्मथशरेण ताडिता दुःसहेन हृदये निशाचरी ।
गन्धवद्रुधिरचन्दनोक्षिता जीवितेशवसतिं जगाम सा ॥'

अथालस्यम्—

आलस्यं श्रमगर्भाद्यैर्जाड्यं जृम्भासितादिकृत् ॥ १५५ ॥

वर्गसपत्ति । अवज्ञा परस्मिन् ॥ अन्यैर्मद्भुतायुधनिन्ने ॥ रामेति । सा निशाचरी ताडका राक्षसी, सैव निशाचरी अभिसारिका नायिका । राम एव मन्मथस्तस्य शरेण हृदये वक्षसि मनसि च ताडिता सती जीवितेशो यम एव जीवितेशः प्रियस्तस्य वसतिं जगाम । कीदृशी । गन्धवद्रुधिरमेव चन्दनं तेनोक्षिता लिप्ता ॥ 'जाड्यम्' इत्यत्र क्वापि 'जड्यम्' इति पाठः । स न सम्यक् असंगतार्थापत्तेः ।

मुक्तास्थूला अश्रुलेशा नयनोदबिन्दवः तरुकिसलयेषु बहुशः न खलु न पतन्ति । अपि तु पतन्त्येव । एवंविधं मामवलोक्य वनदेवता अपि रुदन्तीति भावः ॥

1. शरेति । अत्र विशेषमाह रसगङ्गाधरकाराः 'रोगादिजन्या मूर्च्छारूपा मरणप्रागवस्था मरणम् । न चात्र प्राणवियोगात्मकं मुख्यं मरणमुचितं ग्रहीतुम् । चित्तवृत्त्यात्मकेषु भावेषु तस्याप्रसक्तेः । भावेषु च सर्वेषु कार्यसहवर्तितया शरीरप्राणसंयोगस्य हेतुत्वात् । उदाहरणम्—'दयितस्य गुणाननुस्मरन्ती शयने संप्रति या विलोकितासीत् । अधुना खलु हन्त सा कृशाङ्गी गिरमङ्गीकुरुते न भाषितापि ॥' प्रियविरहोऽत्र विभावः । वचननिरासोऽनुभावः । [illegible] भावः [illegible] । दयितस्य गुणाननुस्मरन्तीत्यनेन [illegible] [illegible] निप्रलम्भस्य [illegible] वा [illegible] । अत्र च [illegible] विप्रलम्भस्य, अन्यथा तु करुणस्य [illegible] इति विवेकः । [illegible] न वर्णयन्ति । [illegible] ।' इति । प्रदीपेऽप्युक्तम्—'[illegible] परिकीर्तितम् । [illegible] ॥' इति ॥

2. आलस्यमिति । [illegible] । अत्र च [illegible] । [illegible] । [illegible] ॥

---

१ [illegible] २. [illegible] ३. [illegible] ४. [illegible] ५. [illegible]
[illegible]

अथ मतिः—

नीतिमार्गानुसृत्यादेरर्थनिर्धारणं मतिः ।
स्मेरता धृतिसंतोषौ बहुमानश्च तद्भवाः ॥ १६३ ॥

यथा—

'असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः ।
सतां हि संदेहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः ॥'

अथ व्याधिः—

[2]व्याधिर्ज्वरादिर्वाताद्यैर्भूमीच्छोत्कम्पनादिकृत् ।

तत्र दाहमयत्वे भूमीच्छादयः । शैत्यमयत्वे उत्कम्पनादयः । स्पष्टमुदाहरणम् ।

अथ त्रासः—

[3]निर्घातविद्युदुल्काद्यैस्त्रासः कम्पादिकारकः ॥ १६४ ॥

पुनः स्मितयुक्तं वदनं स्मरामीत्यर्थः ॥ **नीतिमार्गो** नीतिशास्त्रं तस्यानुसृतिरनुगमः । आदिना अनुमानादेर्ग्रहणम् । **निर्धारणं** निश्चयः ॥ **असंशयमिति** । शकुन्तलामालोक्य दुष्यन्तस्यानुमानमिदम् । क्षत्रपरिग्रहक्षमा क्षत्रियविवाहोचिता । 'इयम्' इति शेषः । अस्यां शकुन्तलायाम् । समर्थयति—**सतामिति** । प्रमाणं निश्चयबीजम् । अन्तःकरणस्य मनसः प्रवृत्तयः सङ्कल्पादयः ॥ **वाताद्यैरिति** । आद्यपदेन पित्तश्लेष्मणोर्ग्रहणम् । भूमीच्छा भूमिपतनेच्छा । तत्र व्याध्युदाहरणं यथा मम—'प्रियजनपरिशङ्कोद्वेपमाना कृशाङ्गी [illegible] [illegible] स्वेदसिक्तगात्रीम् । विपुलपुलकलेखामाकलय्य स्मरार्तां [illegible] [illegible] ॥' **निर्घात इति** । 'यदान्तरिक्षे बलवान्मारुतो मरुता

---

1. [illegible] ॥

2. [illegible] ॥

[illegible]

[illegible]

यथा—

'परिस्फुरन्मीनविघट्टितोरवः सुराङ्गनास्त्रासविलोलदृष्टयः ।
उपाययुः कम्पितपाणिपल्लवाः सखीजनस्यापि विलोकनीयताम् ॥'

अथ व्रीडा—

धाष्टर्याभावो व्रीडा वदनानमनादिकृद्दुराचारात् ।

यथा—'मयि सकपटं—' इत्यादि (१५७ पृ.) ।

अथ हर्षः—

हर्षस्त्विष्टावाप्तेर्मनःप्रसादोऽश्रुगद्गदादिकरः ॥ १६५ ॥

हत. । पतत्यध स निर्घातो जायते वायुसंभव ॥' इत्युक्तलक्षणो निर्घात । 'वृह-च्छिखा च सूक्ष्माग्रा रक्तनीलशिखोज्ज्वला । पौरुषी च प्रमाणेन उल्का नानाविधा स्मृता ॥' इत्युक्तलक्षणा चोल्का । आद्यपदेन भूकम्पादेर्ग्रहणम् । अत्र 'मन क्षोभ' इति पूरणीयम् ॥ परिस्फुरदिति । जलविहारवर्णनमिदम् । अपिना नायकस्य

1. परीति । परितः स्फुरद्भिर्विवर्तमानैर्मीनैर्विघट्टिता ऊरवो याना ताः [illegible] त्रासविलोलदृष्टयः कम्पितपाणिपल्लवाश्च सुराङ्गना सखीजनस्यापि विलोकनीयतामुपययुः । किमुत प्रियजनस्येति भाव. ॥

2. व्रीडेति । [illegible] पुरुषमुखावलोकनादेः पुना च प्रतिज्ञाभङ्ग[illegible] वैवर्ण्याधोमुखत्वादिकारणीभूतश्चित्तवृत्तिविशेषो व्रीडा । केचित्—'चेतोनिमीलनं व्रीडा [illegible]' इत्याहुः । [illegible] ॥

3. हर्ष इति । [illegible] सुखविशेषो हर्षः । [illegible]—'[illegible] प्रसादः प्रियसंगम. । मनोरथादिसम्प्राप्तिर्[illegible] ॥ [illegible] जायते । [illegible] प्रियोक्तिः [illegible] ॥ [illegible] ।' इति ॥

[illegible]

तत्र भर्त्सनपारुष्यस्वच्छन्दाचरणादयः ॥ १६९ ॥

यथा—

'अन्यासु तावदुपमर्दसहासु भृङ्ग
लोल विनोदय मनः सुमनोलतासु ।
मुग्धामजातरजसं कलिकामकाले
व्यर्थं कदर्थयसि किं नवमालिकायाः ॥'

अथ ग्लानिः—

रत्यायासमनस्तापक्षुत्पिपासादिसंभवा ।
ग्लानिर्निष्प्राणताकम्पकार्श्यानुत्साहतादिकृत् ॥ १७० ॥

यथा—

'किसलयमिव मुग्धं बन्धनाद्विप्रलूनं
हृदयकुसुमशोषी दारुणो दीर्घशोकः ।
ग्लपयति परिपाण्डुक्षाममस्याः शरीरं
शरदिज इव घर्मः केतकीगर्भपत्रम् ॥'

अथ चिन्ता—

ध्यानं चिन्ता हितानाप्तेः शून्यताश्वासतापकृत् ।

मुष्मिकी' परलोकभवा । नीवारस्तृणधान्यम्, कृते निमित्तम्। साम्प्रतं वार्धके । अत्र तत्त्वज्ञानेन निःस्पृहत्वम् ॥ अन्यास्विति । मधुपानकालीनश्चरणप्रहारादिरुपमर्दः । पक्षे संभोगकालीनश्चुम्बनालिङ्गनादिः । लोलं सतृष्णम् । मुग्धा कोमला सुरतमूढा च । रजः परागः आर्तवं च । अकाले मकरन्दाभावदशायां बाल्ये च । अत्रोपभोक्तरि बालाया अस्थैर्यं परुषवचनेन प्रतीयते ॥ निष्प्राणता असामर्थ्यम् ॥ बन्धनात् उत्पत्तिस्थानात् । निष्प्राणत्वानौजस्यसत्त्वसंक्षयाणां बलहानिरूपत्वेऽपि

1. नवेति । सप्तलायाः 'सप्तला नवमालिका' इत्यमरः । 'नवमल्लिकायाः' इति पाठे तु मुग्धेत्यादिनैव नवत्वलाभे पुनर्मल्लिकाया नवत्वविशेषणं व्यर्थम् । नवा तुला माला अस्याः, कप् । इति भानुजिदीक्षिताः ॥

2. चिन्तेति । इष्टाप्राप्त्यनिष्टप्राप्त्यादिजनिता ध्यानापरपर्याया वैवर्ण्यभूलेखनाधोमुखत्वादिहेतुश्चित्तवृत्तिविशेषश्चिन्ता । यदाहु—'विभावा यत्र दारिद्र्यमैश्वर्यभ्रंशनं तथा ।

'त्वया विरहिता मया दृष्टा' इत्युत्तरम् ॥ त्रिगतपदव्युत्पत्तिमाह—नटादीति । आदिना नर्तकीप्रतिनटयोर्ग्रहणम् । इदं त्रिगतम् ॥ छलमाह—प्रियाभैरिति । प्रियतुल्यैरित्यर्थः । छलना वञ्चना ॥ जतुमयशरणोद्दीपनः जतुमय[illegible] अङ्गराजस्य कर्णस्य । कृष्णा द्रौपदी तस्याः केशोत्तरीययोरपनयने पटुः । [illegible] भवाव । 'आवाम' इति शेषः ॥ वाक्केलिमाह—वाक्केलिरिति । द्वित्रि[illegible] प्रत्युक्तयस्तासाम् । [illegible]प्रत्युक्तीनामनियतत्वादत्र उपलक्षणभावः । अनेकस्य [illegible] -मुत्तरमिति वाक्केलिरित्याहुरित्यन्वयः ॥ अधिबलमाह—अन्योन्येति । [illegible]

---

1. कश्चिदिति । तथा चाह दशरूपककारः—'[illegible] [illegible] पूर्वरङ्गे नियम्यते ॥' इति ॥

यथा मम प्रभावत्याम्—'वज्रनाभः—

(अस्य वक्षः क्षणेनैव निर्मथ्य गदयानया ।
लीलयोन्मूलयाम्येष भुवनद्वयमद्य वः ॥)

प्रद्युम्नः—अरेरे असुरापसद, अलममुना बहुप्रलापेन । मम खलु

अद्य प्रचण्डभुजदण्डसमर्पितोरु-
कोदण्डनिर्गलितकाण्डसमूहपातैः ।
आस्तां समस्तदितिजक्षतजोक्षितेयं
क्षोणिः क्षणेन पिशिताशनलोभनीया ॥'

गण्डं प्रस्तुतसंबन्धि भिन्नार्थं सत्वरं वचः ॥ २९० ॥

यथा वेण्याम्—'राजा—

अध्यासितुं तव चिराज्जघनस्थलस्य
पर्याप्तमेव करभोरु ममोरुयुग्मम् ॥'

अनन्तरम् '(प्रविश्य) कञ्चुकी—देव, भग्नं भग्नं—' इत्यादि ।

अत्र रथकेतनभङ्गार्थं वचनमूरुभङ्गार्थे संबन्धे सबद्धम् ।

व्याख्यानं स्वरसोक्तस्यान्यथावस्यन्दितं भवेत् ।

यथा छलितरामे—'सीता—जाद, कल्लं क्खु उअज्झाएण गन्तव्वम्, तहिं सो राआ विणएण पणमिदव्वो । लवः—अथ किमावाभ्यां राजोपजीविभ्यां भवितव्यम् । सीता—जाद, सो क्खु तुह्माणं पिदा । लवः—किमावयो रघुपतिः पिता । सीता—(साशङ्कम् ।) मा अण्णधा सङ्कध्म् । ण क्खु तुह्माणम्, सअलाए ज्जेव पुहवीएत्ति ।'

भिन्नार्थं वाक्यान्तरसंबन्धेनेत्यर्थः ॥ अस्य प्रद्युम्नस्य । वो देवानाम् ॥ गण्डमाह—प्रस्तुतसंबन्धि प्रस्तुतार्थसंबद्धम् ॥ पर्याप्तं समर्थम् ॥ संबन्धे प्रस्तुते ॥ अवस्यन्दितमाह—व्याख्यानमिति । स्वरसोक्तस्य 'स्वरसस्य' इति पाठे ॥ जाद इति । 'पुत्र, कल्ये खलु उपाध्यायेन गन्तव्यम्, तत्र स राजा विनयेन प्रणमितव्यः ।' (इति संस्कृतम् ।) 'जात, स खलु युष्माकं पिता ।' इति संस्कृतम् । 'मा अन्यथा शङ्कध्वम् । न खलु युष्माकम् । सकलाया एव पृथिव्या इति ।' इति संस्कृतम् । अत्र सीतया युष्मत्पितृत्वेन रामः पृथिव्याः पालकत्वेनोक्तं व्याख्यातम् । 'पतर.'

1. अध्यासितुमिति । उत्तरार्धं तु—'[illegible] इति मम दोर्दण्डचन्द्र[illegible] ।' इति ।

कथांशानां व्यवच्छेद आश्वास इति वध्यते ।
आर्यावक्त्रापवक्त्राणां छन्दसा येन केनचित् ॥ ३२५ ॥
अन्यापदेशेनाश्वासमुखे भाव्यर्थसूचनम् ।

यथा—हर्षचरितादिः ।

'अपि त्वनियमो दृष्टस्तत्राप्यन्यैरुदीरणात् ।' इति दण्डाचार्यवचनात्केचित् 'आख्यायिका नायकेनैव निबद्धव्या' इत्याहुः, तदयुक्तम् । आख्यानादयश्च कथाख्यायिकयोरेवान्तर्भावान्न पृथगुक्ताः । यदुक्तं दण्डिनैव—

'अत्रैवान्तर्भविष्यन्ति शेषाश्चाख्यानजातयः ।' इति ।

एषामुदाहरणम्—पञ्चतन्त्रादि ।

अथ गद्यपद्यमयानि—

गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते ॥ ३३६ ॥

यथा—देशराजचरितम् ।

गद्यपद्यमयी राजस्तुतिर्बिरुदमुच्यते ।

यथा—विरुदमणिमाला ।

करम्भकं तु भाषाभिर्विविधाभिर्विनिर्मितम् ॥ ३३७ ॥

यथा मम—षोडशभाषामयी प्रशस्तिरत्नावली ।

चरितम् ॥ दण्डाचार्यवचनादिति [illegible] ॥ गद्यपद्य [illegible] । [illegible]

इति [illegible]

[illegible] ।

---

1. [illegible]

2. [illegible]

अस्यार्थः प्रागेव स्फुटीकृतः।

तद्विशेषानाह—

ते पुनः पञ्चधा मताः।
पदे तदंशे वाक्येऽर्थे संभवन्ति रसेऽपि यत् ॥ १ ॥

स्पष्टम्।

तत्र

दुःश्रवत्रिविधाश्लीलानुचितार्थाप्रयुक्तताः।
ग्राम्याप्रतीतसंदिग्धनेयार्थनिहतार्थताः ॥ २ ॥
अवाचकत्वं क्लिष्टत्वं विरुद्धमतिकारिता।
अविमृष्टविधेयांशभावश्च पदवाक्ययोः ॥ ३ ॥
दोषाः केचिद्भवन्त्येषु पदांशेऽपि पदे परे।
निरर्थकासमर्थत्वे च्युतसंस्कारता तथा ॥ ४ ॥

परुषवर्णतया श्रुतिदुःखावहत्वं दुःश्रवत्वम्।

यथा—

'कार्तार्थ्यं[1] यातु तन्वङ्गी कदानङ्गवशंवदा ॥'

अस्यार्थ इति। प्रागेव प्रथमपरिच्छेद एव। श्रुतिदुष्टत्वादेः शब्दार्थापकर्षक[illegible] रसापकर्षकत्वमिति तात्पर्यमिति भावः॥ तद्विशेषान् दोषविभागान्। ते [illegible] तदंशे पदांशे॥ दोषविशेषान्निर्दिशति—दुःश्रव इति। अयं भावप्रधान[illegible] निर्देशः। दुःश्रवत्रिविधाश्लीलेति समस्तपाठे भावप्रत्ययस्य सर्वेषामन्व[illegible] पृथक्दोषेषु॥ उद्देशक्रमेण दुःश्रवत्वादिलक्षणं सोदाहरणमाह—परुषेति। [illegible] चित्स्पष्टत्वादुदाहरणस्यैव दर्शनम्। 'श्रुतिपतितमात्रं यदुद्वेगमावहति तत्त्वं दुः[illegible] देयमिति प्रथमं तदुपन्यासः' इत्यन्ये। परुषवर्णता वर्णानां पारुष्यं [illegible] भविष्यति। श्रोतॄणां श्रोत्रावच्छेदेन दुःखजनकत्वं श्रुतिदुःखावहत्वम्। दु[illegible] ति सह खावहं श्रुतिदुःखावहम्, तत्त्वं वा। कार्तार्थ्यमिति। अत्र [illegible] रेफयोर्योगेन पारुष्यम्। तत्प्रयुक्तं पदस्य दुःश्रवत्वं स्वाश्रयपदघटितत्वेन [illegible] मत्स्य शृङ्गारस्य प्रकर्षप्रतीतिं प्रतिबध्नाति। इदमेव 'श्रुतिकटु' इत्यभि[illegible] नन्वेतद्वर्णानां पारुष्यमेव न तु पदपारुष्यमिति चेत्। न। वाक्यघटितद्वि[illegible]

---

1. कार्तार्थ्यमिति। 'अनङ्गमङ्गलगृहापाङ्गभङ्गितरङ्गितैः। आलिङ्गितः स [illegible] कार्तार्थ्यं लभते कदा॥' इति प्रकाशोदाहरणानुरूपम्॥

---

१. 'पदम्' ख-पुस्तके नास्ति.　२. 'ग्राम्य' क　३. 'दम्' [illegible]

अश्लीलत्वं व्रीडाजुगुप्सामङ्गलव्यञ्जकत्वात्त्रिविधम्।

क्रमेणोदाहरणम्—

'दृप्तारिविजये राजन्साधनं सुमहत्तव॥'

'प्रससार शनैर्वायुर्विनाशे तन्वि ते तदा॥'

अत्र साधन-वायु-विनाश-शब्दा अश्लीलाः।

'शूरा अमरता यान्ति पशुभूता रणाध्वरे॥'

अत्र पशुपदं कातर्यमभिव्यनक्तीत्यनुचितार्थत्वम्।

पारुष्यप्रयुक्तत्वावच्छेदकत्वस्थलवत्पदघटकद्वित्रादिवर्णपारुष्यप्रयुक्तपदद्वयस्य [illegible] नी-कारात्। [illegible]र्थान्तरव्यञ्जकमश्लीलं तस्य भावस्तत्ता। पदार्थाश्लीलत्वं तु असभ्यस्मृतिहेतुत्वमेव। जुगुप्सा घृणा। अमङ्गलम् [illegible]। व्यञ्जकत्वमिह जनकत्वमेव॥ अत्रेति। सैन्ये प्रयुक्तः साधनशब्दो [illegible] श्रोतुर्लज्जाजननेन राजविषयरतिभावस्य, समीरणे प्रयुक्तो वायुशब्दः [illegible] श्रोतुर्जुगुप्साजननेन, अदर्शने प्रयुक्तो विनाशशब्दः [illegible] अमङ्गलजननेन, शृङ्गारस्य प्रवर्धमानविच्छेदः॥ अनुचितार्थत्वं क्वचिद्ग्राम्यार्थदोषप्रतिपादकत्वेन, क्वचिदश्लीलत्वेन, क्वचिद् [illegible]। [illegible]— शूरा इति। [illegible]। अत्र वाच्यार्थस्य [illegible] दोषः।

1. अश्लीलत्वमिति। [illegible]। '[illegible]-'

अप्रयुक्तत्वं तथाप्रसिद्धावपि कविभिरनादृतत्वम् । यथा—

'भाति पद्मः सरोवरे ॥'

अत्र पद्मशब्दः पुलिङ्गः ।

ग्राम्यत्वं यथा—

'कटिस्ते हरते मनः ॥'

अत्र कटिशब्दो ग्राम्यः ।

अप्रतीतत्वमेकदेशमात्रप्रसिद्धत्वम् । यथा—

'योगेन दलिताशयः ॥'

अत्र योगशास्त्र एव वासनार्थ आशयशब्दः ।

तस्य व्यञ्जकत्वात्पञ्चुपदस्यानुचितार्थत्वम् । द्वितीय यथा—'प्रज्वलन्......पतन्ति शरान्तव ।' अत्र प्रज्वलदिति पदमनुचितार्थम् । तृतीय यथा—'दि...राद्रक्षति यो गुहासु लीनं दिवाभीतमिवान्धकारम् । क्षुद्रेऽपि नूनं शरणं प्र...ममलमुच्चैः शिरसामतीव ॥' अत्रासद्भूतस्यान्धकारभयस्य समर्थकं द्वि...चितार्थम् । एवमन्यदपि ज्ञेयम् ॥ तथाप्रसिद्धावपि तेन रूपेण प्रसिद्धि...**पुंलिङ्ग इति** । 'अप्रयुक्त' इति शेष ॥ हालिकसाधारणप्रसिद्ध...**ग्राम्यः** । **कटिरिति** । अत्र शब्दस्य गूढत्वकृतचारुत्वाभावात्... रोध ॥ **योगेन** प्रकृतिपुरुषयोर्भेदचिन्तनेन दलितः खण्डित आशयो... यस्य स । आशयशब्दोऽप्रतीत इति शेष । अत्र योगशास्त्रानुशीलन... पदार्थानभिज्ञाना योगिभिन्नजनानामर्थबोधविलम्बकरत्वमप्रतीतत्वम् ॥ प्रकरणादर्थ...

---

1 पद्मेति । 'वा पुंसि पद्मम्' इत्यनेनाम्नातोऽपि पुंल्लिङ्गः पद्मशब्दः कविभिर्न ह...प्रयुक्तः । अत्र दूषकताबीजं तु तादृशकविसमयस्य तत्प्रयोजनानुसन्धानाभावे... ...ति । यमकादिप्रयोजनसत्त्वे तु नायं दोषः, अन्यथाऽसुन्दरत्वापत्तिः... ...भि. प्रयोगस्य दर्शनेन व्यञ्जनाभावादिति ॥

2 कटीति । अत्रेदं तत्त्वम्—श्रोणीनितम्बादिकमेव विदग्धैः प्रयुज्यते, कटिरिति... दग्धमात्रप्रयोज्यमिति ग्राम्यम् । पदं त्रिविधम्—ग्राम्यं नागरमुपनागरं च । नि... प्रसिद्धं नागरम्, ग्राम्यकक्षातिक्रान्तमप्राप्तनागरभावमुपनागरम्, नागरेणनागरे... ग्राम्यशब्दप्रयोगाद्वक्तुर्वैदग्ध्योन्नयनेनात्र दोषत्वम् । अत एव विदूषकादावधने वक्तृ... दोषत्वम्, तस्य तथैवौचित्येन वैरस्याभावात् ॥ अत्र प्रकाशे सम्पूर्णश्लोकः... 'राकाविभावरीकान्तसङ्क्रान्तद्युति ते मुखम् । तपनीयशिलाशोभा कटिश्च हरते मनः ॥'

3. योगशास्त्र इति । 'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः' । पातञ्जलसूत्रे (१।२४) वासनार्थक आशयशब्दः प्रयुक्तः । वासना चात्र ... निदानं मिथ्याज्ञानजन्यः संस्कारविशेषः । दूषकताबीजं तु तच्छास्त्रानभिज्ञ...

'आशीःपरम्परां वन्द्यां कर्णे कृत्वा कृपां कुरु ॥'

अत्र वन्द्यामिति किं वन्दीभूतायामुत वन्दनीयायामिति संदेहः । नेयार्थत्वं रूढिप्रयोजनाभावादशक्तिकृतं लक्ष्यार्थप्रकाशनम् ।

यथा—

'कमले चरणाघातं मुखं सुमुखि तेऽकरोत् ।'

अत्र चरणाघातेन निर्जितत्वं लक्ष्यम् ।

लेपादिनार्थजनकः शब्दः संदिग्धः । आशीरिति । कर्णे कृत्वा श्रुत्वा । अत्रेति । वन्द्यामिति पदस्य संदिग्धत्वं शाब्दबोधविलम्बेन [illegible] म्बकृत् ॥ अशक्तिकृतं कवेरसामर्थ्यप्रयुक्तम् । [illegible] ॥ चरणाघातेन चरणाघातपदेन निर्जितत्वं पराभवः । [illegible] तस्याप्यसंभव इत्यन्यथानुपपत्तिः । [illegible] भवलत्वं मुखचरणयोः संबन्धः । अत्र [illegible] ततो लक्ष्योपस्थितिः [illegible] केचित्तु—'[illegible]' इति चेत् । न । [illegible] तत एव नेयार्थत्वा[illegible] । केचित्—'[illegible]' इत्याहुः । [illegible]

[illegible]

1. [illegible]

2. [illegible]

यथा—

'नवजलधरः संनद्धोऽयं न दृप्तनिशाचरः ॥'

उक्तोदाहरणे तु तत्पुरुषसमासे गुणीभावे नञः पर्युदासतया निषेधस्य विधेयतयानवगमः । यदाहुः—

पदार्थतावच्छेदकेन सह सम्बन्धस्तत्र वाक्ये असौ नञ् । प्रसज्यप्रतिषेध इत्यर्थः ॥ उदाहरति—यथेति । नवजलधर इति । गन्धर्वेणोर्वश्या [illegible] पुरूरवसः [illegible] विरहे नवजलधरादौ निशाचरत्वादिभ्रान्तिनिरूपणमिदम् । अयं सन्नद्धो न नवजलधरः, दृप्तनिशाचर इति । अयं नवजलधरत्वाभाववानित्यर्थः । [illegible] उद्देश्यत्वम्, नञर्थस्याभावस्य विधेयत्वम्, समभिव्याहृतपदार्थ[illegible] सह नञर्थस्य सम्बन्धः । न च विधेर्भावपदार्थस्येति [illegible] । [illegible] मानित्वापत्तेः । विपर्ययेति । यथा [illegible] 'उग्र न पचतम्' इत्यादावप्युक्तोदाहरण[illegible] । न च [illegible] उक्तोदाहरणादौ [illegible] प्रसज्यप्रतिषेधत्वमेव [illegible] वाच्यम् । [illegible] पर्युदासत्वा[illegible] प्रसज्यप्रतिषेध[illegible] [illegible] । अत एव [illegible] गोपीचन्द्रे[illegible]—'[illegible] प्रसज्यप्रतिषेधो [illegible]', '[illegible] न [illegible]', '[illegible]' इति । '[illegible]' इत्यादौ [illegible] । [illegible]

[illegible]

क्वचिदनुपात्तयोर्द्वयोरपि सामर्थ्यादवगमः । यथा—

'न मे शमयिता कोऽपि भारस्येत्युर्वि मा शुचः ॥
नन्दस्य भवने कोऽपि बालोऽस्त्यद्भुतपौरुषः ॥'

अत्र योऽस्ति, स ते भारस्य शमयितेति बुध्यते ।

'यद्यद्विरहदुःखं मे तत्को वापहरिष्यति ॥'

इत्यत्रैको यच्छब्दः साकाङ्क्ष इति न वाच्यम् । तथाहि—[1]
त्यनेन केनचिद्रूपेण स्थितं सर्वात्मकं वस्तु विवक्षितम् । तथाभूतस्य
तच्छब्देन परामर्शः । एवमन्येषामपि वाक्यगतत्वेनोदाहरणं बोध्यम् ।

पदांशे दुःश्रवत्वं यथा—

'तद्गच्छ सिद्ध्यै कुरु देवकार्यम् ॥'
'धातुमत्तां गिरिर्धत्ते ॥'

र्शनीय इति ॥ द्वयोर्यत्तत्पदयोः । सामर्थ्यादाकाङ्क्षात ॥ ननु यत्र द्वितीयं यत्पदद्वयं तत्र कथमेकतरपदेन निराकाङ्क्षत्वप्रतीतिः । तत्र तत्पदद्वयस्यैव न योग्यत्वात् । यथा—'य यं कामयते कामं तं तमाप्नोति लीलया' इति । इ आह—यद्यदिति । एक इति । उत्तरवाक्ये एकतत्पदप्रयोगोऽर्ह इति नव । सर्वात्मकमिति । विरहदुःखत्वेन सामान्येन सर्वं विरहदुःखलियं ॥ तथ भूतस्य विरहदुःखत्वावच्छिन्नस्य । तथा च वीप्साया वक्तृतात्पर्यमेव निदानम् । सामान्यरूपेण उपस्थापने वक्तृतात्पर्ये सति न तत्पदे वीप्सा । तत्तदा... उपस्थापने तात्पर्ये सति तत्पदे वीप्सा । क्वचित्तु तत्पदे एव वीप्सा, न यत्पदे । यथा—'ते ते सत्पुरुषाः परार्थघटकाः स्वार्थस्य बाधेन ये ॥' एवमिति । अन्येषामनुचितार्थत्वादीनाम् । तच्च मया दर्शितमेव ॥ 'दोषाः केचिद्भवन्त्य...

---

1. यद्यदिति । परमार्थस्तु यद्यदिति न पदद्वयम् । किंतु 'नित्यवीप्सयोः' इति द्वे
या यदो द्वित्वापन्नोऽननादेशः । एवं चादेशिनैकेन यत्पदेन तत्पदेन च ...
रूपेण दुःखपरामर्शः । आदेशस्तु साकल्येनान्वये तात्पर्यग्राहक इति ...
न सबन्धभानोपपत्तौ न तत्पदेऽपि वीप्सायोगतो द्वित्वापन्न आदेशः । यत्र
तत्पदेऽपि वीप्सा तत्र न यत्पदेऽप्यादेशः । किं तूभाभ्यां रूपद्वयेन सर्वोपस्था...
तत्त्वम् ॥

2. सिद्ध्यै इति । अत्र 'सिद्ध्यै' इति चतुर्थ्यन्तपदैकदेशः श्रुतिकटुः ॥ अत्र 'सर्वे...
मर्थान्तरलभ्य एव । अपेक्षते प्रत्ययमङ्गलब्ध्यै बीजाङ्कुरः प्रागुदयादिवाम्भः ॥' इ...
वशिष्टा पादत्रयी ॥

---

1 'प्रयोगात्' पुस्तकान्तरे

अत्र मत्ताशब्दः क्षीवार्थे निहतः ।

'वर्ण्यते किं महासेनो विजेयो यस्य तारकः ॥'

अत्र विजेयं इति कृत्यप्रत्ययः क्तप्रत्ययार्थेऽवाचकः ।

'पाणिः पल्लवपेलवः ॥'

पेलवशब्दस्याद्याक्षरे अश्लीले ।

'संग्रामे निहताः शूरा वचोवाणत्वमागताः ॥'

अत्र वचःशब्दस्य गीःशब्दवाचकत्वे नेयार्थत्वम् । तथा तत्रैव वाण-
ाने शरेति पाठे । अत्र पदद्वयमपि न परिवृत्तिसहम् । जलध्यादौ

शेऽपि पदे परे' इति यदुक्तम्, तदुदाहरणमाह—तद्वच्छेति ॥ अश्लीले
ति । व्रीडाव्यञ्जके ॥ जुगुप्साव्यञ्जकं यथा—'पूयते' इति । अत्र पूयशब्द ।
मङ्गलव्यञ्जकं यथा—'अभिप्रेत' इति । अत्र प्रेतशब्द. ॥ वचोवाणत्वं
र्वाणत्वम् । गीःशब्दवाचकत्वे इति । लक्षणया गीःशब्दप्रतिपादकत्वे
र्थं । तथा नेयार्थत्वम् । तत्रैव गीर्वाणशब्द एव । परिवृत्तिसहं श्रुतरा-

---

1. अत्र धातुमत्तो भावो धातुमत्तेति पदैकदेशेन क्षीवार्थेन मत्ताशब्देन मनुष्यर्थो
न्यते । अत्र 'पश्चाप्सरोविभ्रममण्डनाना संपादयन्ती शिखरैर्बिभर्ति । बलाहकच्छेद-
नरागानकालसंध्यामिव धातुमत्ताम् ॥' इति तत्रूक्तम् ॥

2. विजेय इति । 'अर्हे कृत्यतृचश्च' इति सूत्रेणार्हार्थे 'अचो यत्' इति सूत्रेण
हितः कृत्यसंज्ञो यत्प्रत्ययो भूतत्वरूपे क्तप्रत्ययार्थेऽवाचकः ॥ अत्र 'चापाचार्यस्त्रिपुर-
जयी कार्तिकेयो विजेयः शस्त्रव्यस्तः सदनमुदधिर्भूरियं हन्तकारः । अस्त्येवैतत्
न्तु कृतवता रेणुकाकण्ठबाधा बद्धस्पर्धस्तव परशुना लज्जते चन्द्रहासः ॥'
लपनीयम् ॥

3. पेलवेति । 'पेल' इति वर्णद्वय [illegible] ॥ अत्र '[illegible]' इति प्रकाशोदाहरणं [illegible] ॥

4. जलध्यादाविति । [illegible]—'[illegible] पूर्वपदे [illegible] ॥' इति [illegible] ॥ [illegible] वचोवाणेत्युदाहरणम् [illegible] । [illegible] वचोवा [illegible] ॥

अतिविस्तृतिरङ्गस्य प्रकृतीनां विपर्ययः ।
अर्थानौचित्यमन्यच्च दोषा रसगता मताः ।

रसस्य स्वशब्दो रसशब्दः शृङ्गारादिशब्दश्च । क्रमेण यथा—

'तामुद्वीक्ष्य कुरङ्गाक्षीं रसो नः कोऽप्यजायत ॥'

'चन्द्रमण्डलमालोक्य शृङ्गारे मग्नमन्तरम् ॥'

स्थायिभावस्य स्वशब्दवाच्यं यथा—

'अजायत रतिस्तस्यास्त्वयि लोचनगोचरे ॥'

व्यभिचारिणः स्वशब्दवाच्यत्वं यथा—

'जाता लज्जावती मुग्धा प्रियस्य परिचुम्बने ॥'

अत्र प्रथमे पादे 'आसीन्मुकुलिताक्षी सा' इति लज्जाया अनुभावमुखेन कथने युक्तः पाठः ।

'मानं मा कुरु तन्वङ्गि ज्ञात्वा यौवनमस्थिरम् ॥'

अत्र यौवनास्थैर्यनिवेदनं शृङ्गाररसस्य परिपन्थिनः शान्तरसस्याङ्गं शान्तस्यैव च विभाव इति शृङ्गारे तत्परिग्रहो न युक्तः ।

'धवलयति शिशिररोचिषि भुवनतलं लोकलोचनानन्दे ।
ईषल्लसत्कटाक्षा स्मेरमुखी सा निरीक्ष्यतां तन्वी ॥'

अत्र रसस्योद्दीपनालम्बनविभावावनुभावपर्यवसायिनौ स्थिताविति कष्टकल्पना ।

[illegible] रसस्यैव । प्रकृतीनां [illegible] विपर्ययोऽन्यथा[illegible] । [illegible] अन्य[illegible] ॥ कोऽप्य[illegible] ॥ व्यभिचारिणः [illegible] एव [illegible] दोषः, [illegible] तु न दोषः । यथा [illegible] । स्वशब्दवाच्यत्वं [illegible] ॥ [illegible]—मानमिति । शान्तस्यैव चेति । [illegible] । विभाव [illegible] । तत्परिग्रहो [illegible] ॥ [illegible]—धवलयतीति । शिशिररोचिषि चन्द्रे [illegible] । स्मेरेति । [illegible]

१. मानमिति । [illegible]

२. चन्द्रेति । [illegible]

एवं च विशेषणमात्रस्य पुनरुपादाने समाप्तपुनरात्तत्वं न वाक्यान्तरस्येति विज्ञेयम् ।

गर्भितत्वं गुणः क्वापि—

यथा—

'दिङ्मातङ्गघटाविभक्तचतुराघाटा मही साध्यते
सिद्धा सापि वदन्त एव हि वयं रोमाञ्चिताः पश्यत ।
विप्राय प्रतिपाद्यते किमपरं रामाय तस्मै नमो
यस्मात्प्रादुरभूत्कथाद्भुतमिदं यत्रैव चास्तं गतम् ॥'

अत्र वदन्त एवेत्यादि वाक्यं वाक्यान्तरप्रवेशात् चमत्कारातिशयं पुष्णाति ।

पतत्प्रकर्षता तथा ॥ २८ ॥

तथेति क्वचित् गुणः । यथा—'चञ्चद्भुज–इत्यादि (३०२ पृ.) ।

अत्र चतुर्थपादे सुकुमारार्थतया शब्दाडम्बरत्यागो गुणः ।

क्वचिदुक्तौ स्वशब्देन न दोषो व्यभिचारिणः ।
अनुभावविभावाभ्यां रचना यत्र नोचिता ॥ २९ ॥

हरस्यैव पिनाकसंबन्धेन दुर्जयत्वमिति व्यञ्जकत्वाद् गुणत्वम् । नायं निक्षुर्वरयुवति नारी तिनिक्षुर्धनुष्मान्राज पुत्रो नहि नहि जटाजूटभारं दधानः । नायं व्याधो नवगुणधरः पश्य कलादकलात्पुण्येऽरण्ये नवजलधरश्यामलः कोऽयमेति ॥' अत्र द्वितीयस्य नहीति निपातसमुदायस्य वाचकत्वाभावेन कथितपदस्य न विषयः, किं त्वधिकोऽपि राजपुत्रस्य जटाधारणमत्यन्तासम्भवीति व्यञ्जकत्वाद् गुण एव ॥ **न वाक्यान्तरस्येति** । पुनरुपादाने समाप्तपुनरात्तत्वं न दोष इत्यर्थः । **दिङ्मातङ्गेति** । दिङ्मातङ्गसमूहेन विभक्ताः परिच्छिन्नाश्चत्वार आघाटाः सीमा यस्याः सा । साध्यते स्ववशीक्रियते । सिद्धा साधितापि सा मही । विप्राय प्रतिपाद्यत इत्युत्तरेणान्वयः । किमपरमिति वाच्यमिति शेषः । कथैवाद्भुतमाश्चर्यम् । **यत्रैवेति** । तथा च तत्तुल्यो न भूतो न वर्तमानो न भविष्यतीति भावः ॥ **चमत्कारातिशयमिति** । तेन युद्धवीरदानवीरयोः परिपोषः ॥ **क्वचिदिति** । अत्र पद्यार्थे सुकुमारार्थत्वं तत्रेत्यर्थः ॥ इदानीं रसदोषाणां नियमविशेषे यथायथमदोषत्वं गुणत्वं चाह—**क्वचिदिति** । रचना वर्णनम् । विभाव-

वर्णप्रत्ययलिङ्गानां प्रकृत्योः पदयोरपि ॥ ११ ॥
श्लेषाद्विभक्तिवचनभाषाणामष्टधा च सः ।

क्रमेणोदाहरणम्—

'प्रतिकूलतामुपगते हि विधौ विफल[illegible] बहुसाधनता ।
अवलम्बनाय दिनभर्तुरभू[illegible] पतिष्यतः [illegible] ॥'

अत्र 'विधौ' इति विधु-विधि-शब्दयोः [illegible] ।

'किरणा हरिणाङ्कस्य दक्षिणश्च समीरणः ।
कान्तोत्सङ्गजुषां नूनं सर्व एव सुधाकिरः ॥'

तावन्त एव शब्दा एकप्रयत्नो[illegible] भेदोपलम्भो न भवति । [illegible] प्रकरणादिभिः [illegible] एव [illegible] नानाविधा बोधने [illegible] द्विमेदेन [illegible] —वर्णेति । [illegible] ॥ प्रतिकूलतामिति । [illegible]

1. [illegible]

'महदे सुरसंधं मे तमव समासङ्गमागमाहरणे ।
हर बहुसरणं तं चित्तमोहमवसर उमे सहसा ॥'

अत्र [1]संस्कृतमहाराष्ट्रयोः ।

पदश्लेषोऽपीत्यवधेयम् ॥ भाषाश्लेषमाह—महदे इति । संस्कृतार्थो यथा—हे महदे उत्सवदे, हे उमे हे गौरि आगमाहरणे विद्याग्रहणे मे मम तं प्रसिद्धं समासङ्गं अव रक्ष । कीदृशम् । सुरसंधं देवप्रार्थनीयम् । अवसरे समये तं प्रसिद्धं चित्तमोहं सहसा झटिति हर अपनय । कीदृशम् । बहुसरणं बहुविषयगामिनम् । प्रकृतार्थस्तु—मह—मम, देसु—देहि, रस—रतिम् । धम्मे—धर्मे, तमवस—तमोवशाम्, आस—आशाम्, गमागमा—संसारात्, हर—अपनय, णे—अस्माकम्, हरवहु—शिववधू, सरणं—रक्षयित्री, तं—त्वम्, चित्तमोहं—चित्तमोह, अवसरउ—अवसरतु, मे—मम, सहसेति । भाषासमे तु भाषाणामैकरूप्यमेव, न त्वर्थभेदः ।

1. संस्कृतेति । संस्कृतप्राकृतयोरित्यर्थः । उत्कृष्टं प्राकृतं महाराष्ट्रीति व्यपदिश्यते । न तु 'भक्तिविना वश नोहे वीण्यानें वा मृदङ्गनादानें । कन्यादानफलानें केवीं पावे मृदंगनादानें ॥' इत्यादिमहाराष्ट्रजनसुप्रसिद्धगाथेति । तथा चोक्तं दण्डिना—'महाराष्ट्राश्रयां भाषां प्रकृष्टं प्राकृतं विदुः । सागरः सूक्तिरत्नानां सेतुबन्धादि यन्मयम् ॥' इति । संस्कृतमागध्योः श्लेषो यथा—'कुललालिलालवलोले शलिलेशे शालशालिलन्शूले । कमलाशवलालिवलेऽमाले दिशमन्तकेऽनिशमे ॥' 'कुलरालिरावरोल मलिन तरमारम.[illegible] । कमलामवलालिरर मारयति शाम्यतो विषमम् ॥' इति मागधी छाया । 'कुलानि लालयन्ति पोषयन्तीत्येवंशीला ये तेषां लावे छेदने लोलस्तस्मिन् । शल्नीति शला. सोयमाः ते सन्ति यत्र देशे स शली त[illegible] लिशलस्पीकरोतीति शलि[illegible] शलस्मिन् । शालैर्गृहैः शालन्ते शोभन्ते ये ताञ्छनातीति शालशालि[illegible] स चासौ शूल[illegible] चेति, [illegible] तवाभूते । [illegible] लक्ष्मीस्तस्याः शवा [illegible] लवति [illegible] सीत्येवंशील[illegible] यस्य स तस्मिन् । मलन मा[illegible], न विद्यते मा[illegible] यस्यामारमाल[illegible]स्मिन् । 'मल धारणे' । अनिवार्यं इत्यर्थः । अन्तके मृत्यौ सति स वासुदेवे शिवे वा [illegible] दिशमनिशं प्रविष्टोऽस्मि ।' इति संस्कृतपाठार्थः । मागधस्तु—'कुरा[illegible] [illegible] या आलिः पङ्क्तिस्तस्याः रोल. [illegible] यत्र तत् । [illegible] [illegible] शूर [illegible]मर्थम् । [illegible] मकरन्द ये [illegible] [illegible] । विषम [illegible] मारयति । [illegible] [illegible] विशेषय पुनरपि क्षुभ्यन्ति ।' इति । संस्कृतपैशाच्योर्यथा—'[illegible] [illegible] [illegible] ।' [illegible] [illegible] [illegible] ॥' इति पैशाचीछाया । [illegible]

[illegible]

[illegible]

पुनस्त्रिधा सभङ्गोऽथाभङ्गस्तदुभयात्मकः ॥ १२ ॥

एतद्भेदत्रयं चोक्तभेदाष्टके यथासंभवं ज्ञेयम् ।

यथा वा—

'येन ध्वस्तमनोभवेन बलिजित्कायः पुरास्त्रीकृतो
यश्चोद्वृत्तभुजंगहारवलयो गङ्गां च योऽधारयत् ।

इह त्वर्थभेदोऽपीति भेदः ॥ **यथासंभवमिति** । 'पृथुकार्तस्वर-'इत्यादौ सभङ्गः । 'नीतानाम्-'इत्यादावभङ्गः । 'नवैस्त्वं हर-'इत्यादौ सभङ्गाभङ्गः ॥ एकत्रैव तत्त्रितयमुदाहरति—**यथा वेति** । सर्वदः सर्वाभीष्टदाता माधवः, सर्वदा

दानानि यस्य तान् । तत्प्रसिद्धं [illegible] नायामासीननागिनम् । अम्बनैवं [illegible] मानो यस्य तम् । [illegible] दीप्तिर्यस्य तम् ।' इति संस्कृतवाक्यार्थः । पैशाच्यां तु 'स पुरुषो रञ्जयितुमात्मरञ्जनाय कामविषये [illegible] सुवर्णरत्नाभ्यां [illegible] दाता तथाभूतानां गणिकानामभिमानं न क्षमते न [illegible] न तदानीमादरमनि[illegible] कस्यचिदुपहृतगणिकस्योक्तिरियम् ।' इति । संस्कृतसूरसेन्योर्यथा—'तोदी [illegible] मदोऽकलहं स [illegible] विदन्तारिदम् । आर दमेदावनर [illegible] गदामारम् ॥' [illegible] गगनमदः [illegible] । [illegible] गतामारम् ॥' इति । **सूरसेनीच्छाया** । 'तुदति परानिति तोदी, [illegible] सदा सर्वकालमेव [illegible] परिभूतत्वान्निर्वैरम्, अत एव दमेदाया [illegible] यस्य तम्, [illegible] इत्यादिना [illegible] इति [illegible] गदामारम्, [illegible] आर [illegible] ।' इति [illegible] । सौरसेन्यस्तु—'आरतो [illegible] । [illegible] । [illegible] ।' इति । संस्कृतपभ्रंशयोर्यथा—'[illegible] सु ॥' 'धीरा [illegible] दुर्धरवाधिवलस्तु । [illegible] यस्य ॥' **इत्यपभ्रंश**च्छाया । 'हे [illegible], [illegible] इव [illegible] । [illegible] ।' इति संस्कृतवाक्यार्थः । 'हे धीराः, दुर्धरा [illegible] । [illegible] ।' इत्यपभ्रंशवाक्यार्थः ।

---

1. पुनरिति । [illegible] ॥

पुनस्त्रिधा सभङ्गोऽथाभङ्गस्तदुभयात्मकः ॥ १२ ॥

एतद्भेदत्रयं चोक्तभेदाष्टके यथासंभवं ज्ञेयम् ।

यथा वा—

'येन ध्वस्तमनोभवेन बलिजित्कायः पुरास्त्रीकृतो
यश्चोद्वृत्तभुजंगहारवलयो गङ्गां च योऽधारयत् ।

इह त्वर्थभेदोऽपीति भेदः ॥ **यथासंभवमिति** । 'पृथुकार्तस्वर-'इत्यादौ सभङ्गः । 'नीतानाम्-'इत्यादावभङ्गः । 'सर्वस्वं हर-'इत्यादौ सभङ्गाभङ्गः ॥ एकत्रैव तत्त्रितयमुदाहरति—**यथावेति** । सर्वद सर्वाभीष्टदाता माधवः, सर्वदा

दानानि यस्य तान् । तस्मिन्निह छल मायामात्रीनमाश्रितम् । अन्यतेर्वल्गास्तव मानो यस्य तम् । अगा अचला निकामा दीप्तिर्यस्य तम् ।' इति संस्कृतवाक्यार्थः । पैशाच्यां तु 'स पुण्यो रङ्गविनुतालरञ्जनाय कामनियमेन कृतानोदाना सुवर्णरत्नाभ्यानुच्छन्नो दान्तो दाता तथाभूतानां गणिकानामसनिमान न क्षमते न सहते न तदानीमादरमलिम्पत. कश्चिदुपकृतगणिकस्योक्तिरियम् ।' इति । संस्कृतसूरसेन्योर्यथा—'तोदी सदिगण-मदोऽकलट स स्दा बलं निरस्तादिदम् । आर दनेटावनर मानदमार गदामागम् ॥' तस्यो इष्यते गगनमः दलहतघनापरन्दिनान्तारितम् । आरतमेनावनर श्रावनमार गनाम्-रम् ॥' इति । **सूरसेनीच्छाया** । 'तुदति परानिति तोदी, देशनं दिक् उपदेश तता मद वर्तन इति तदिक् न गणेन सरादेन मदो यस्य सः, स निरु, सदा सर्वगास्मैव अर-हट परिभूतत्वादित्वरम्, अत एव दनेदाया उपशमवेदाया अनन्तरो यस्य तम्, नथाप्यन्ते क्षिप्यन्ते दलाना. स्रालाम्दनि मन्दमन्दीलासदा धातुस्यः मद निर्दर्शन इती न न-दम्, गदालारम्, इदमारम्भमित्त बन्धनस्थैपे भार ममार ।' इति संस्कृतवाक्यार्थः । सैरसेनस्तु—'आरतो निवृतो मेनकानन्दनो दन । माध्वी भारः मानो यत्र । गत आभारो यत्वद । सारसनमोक्षलम्बनम् ।' इति । संस्कृतापभ्रंशयोर्यथा—'धीरा-घट्टुने हरतुरत्वगरिन्द ह । अकलम्बनरादश्च निमिरता टेल ह ॥' 'धीरा गच्छतु मेघनामो दुर्धरत्वाभिदद्दलु । अनन्दहलरादरन रमिनिस्मान्ते यस्य ॥' **इत्यपभ्रंश-च्छाया** । 'हे हरे, अवैति नधुरेवाता इव निर्मि छिन्न निर्गतस पन्नाः रसाभून्, इदहस, [illegible] [illegible], अमे [illegible] नापनि [illegible] [illegible] मतो [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] च [illegible] च [illegible] [illegible] [illegible] [illegible] ह । [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] ।' इति [illegible] । 'हे धीरः, दुर्धत [illegible] [illegible] [illegible] [illegible] इति [illegible] । यस्य [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] ।' [illegible] ॥

---

1. पुनरिति । [illegible] विषयभेदैर्भिद्यते ॥

यस्याहुः शशिमच्छिरोहर इति स्तुत्यं च नामामराः
पायात्स स्वयमन्धकक्षयकरस्त्वां सर्वदोमाधवः ॥'

अत्र 'येन—' इत्यादौ सभङ्गश्लेषः[1]। 'अन्धक—'इत्यादावभङ्गः। अनयोश्चैकत्र संभवात्सभङ्गाभङ्गात्मको ग्रन्थगौरवभयात्पृथङ्नोदाहृतः।

अत्र[2] केचिदाहुः—'सभङ्गश्लेष एव शब्दश्लेषविषयः। यत्रोदात्तादिस्वरभेदाद्भिन्नप्रयत्नोच्चार्यत्वेन भिन्नयोः शब्दयोर्जतुकाष्ठन्यायेन श्लेषः। अभङ्गस्त्वर्थश्लेष एव। यत्र स्वराभेदादभिन्नप्रयत्नोच्चार्यतया शब्दाभेदादर्थयोरेकवृन्तगतफलद्वयन्यायेन श्लेषः। यो हि यदाश्रितः स तदलंकार एव। अलंकार्यालंकरणभावस्य लोकवदाश्रयाश्रयिभावेनोपपत्तिः' इति। तदन्ये न क्षमन्ते[3]।

उमाधवश्च त्वां पायात्। माधवपक्षे—येन अभवेन जन्मरहितेन अनः शकटं ध्वस्तं पादेन परावर्तितम्। बलेरसुरराजस्य जेता। कायः पुरा अमृतपरिवेषणावसरे स्त्रीकृतः स्त्रीत्वं प्रापितः। अमृतार्थं विवदमानानां देवासुराणाममृतपरिवेषणाय मायया नारायणेन मोहिनीरूपं धृतमिति पुराणवार्ता। यश्चोद्वृत्तस्य उन्मत्तस्य अघस्य अघासुरस्य हन्ता। यद्वा कालियस्य पीडाकरः। आरवलयः अरिसवन्धि सैन्यं यातीत्यर्थः। यद्वा उद्वृत्तभुजंगहारं बलं यस्य तेन गरुडेन यातीत्यर्थः। अगं गोवर्धनं कृष्णरूपेण, गां पृथ्वीं च कूर्मरूपेण योऽधारयत्। शशिनं मथ्नातीति शशिमद्राहुः तस्य शिरोहर इति स्तुत्यं नाम यस्य चामरा आहुः। अन्धकानां यादवानां क्षयकरो द्वारकाख्यनिवासनिर्माता। उमाधवपक्षे—येन ध्वस्तमनोभवेन विनाशितकामेन बलिजितो विष्णोः कायः पुरा स्त्रीकृतः। मोहिनीरूपदिदृक्षुणा शिवेन प्रेरितो विष्णुः पुनर्मोहिनीरूपं दधारेति पुराणवार्ता। यश्च उद्वृत्तौ उत्कर्षेण वर्तितौ भुजंगरूपौ हारवलयौ येन सः। यश्च शिरसि गङ्गामधारयत्। यद्वा शरीरार्धेन गौरीम्, शिरसि गङ्गां चेत्यभिप्रायेण चकारः। यस्य शिरः शशिमच्चन्द्रयुक्तं हर इति स्तुत्यं नाम चामरा आहुः। अन्धकस्य असुरविशेषस्य विनाशकरः॥ श्लेषस्तावच्छब्दालंकारोऽर्थालंकारश्च भवति, तयोः परमतनिराकरणपूर्वकं भेदं निरूपयति—अत्रेति जतुकाष्ठेति। पृथगुपलभ्यमानयोरपि जतुकाष्ठयोर्योगे यथैकत्वप्रतिभासस्तथेहापीत्यर्थः। लोकव-

---

1. यत्रेति। समानामभेदेनोदात्तादिस्वरभेदाद्भिन्नप्रयत्नोच्चारणयोग्ययोरपि शब्दयोः श्लेषभङ्गभयेन स्वरभेदानादरादेकप्रयत्नोच्चारणे जतुकाष्ठन्यायेन शब्दश्लेष इति भावः॥

2. यत्र स्वरेति। समानाभेदेनोदात्तादिभेदाभावादभिन्नप्रयत्नोच्चार्यत्वेन शब्दभेदाभावे केवलमर्थयोरेकवृन्तगतफलद्वयन्यायेन श्लिष्टत्वादर्थश्लेष इति भावः॥

3. पुराणवार्तेति। अर्थान्तर इति शेषः। त्रिपुरवधे विष्णुर्यस्य बाणो बभूवेति

---

१. 'येन' क पुस्तके नास्ति. २. 'इत्' घ. ३. 'मन्यन्ते' घ.

तथाहि—अत्र ध्वनिगुणीभूतव्यङ्ग्यदोषगुणालंकाराणां शब्दार्थगतत्वेन व्यवस्थितेरन्वयव्यतिरेकानुविधायित्वेन नियम इति ।" न च 'अन्धकक्षय–' इत्यादौ शब्दाभेदः, 'अर्थभेदेन शब्दभेदः' इति दर्शनात् । किं चात्र शब्दस्यैव मुख्यतया वैचित्र्यबोधोपायत्वेन कविप्रतिभयोट्टङ्कनाच्छब्दालंकारत्वमेव । विसदृशशब्दद्वयस्य बन्धे चैवंविधस्य वैचित्र्याभावाद् वैचित्र्यस्यैव चालंकारत्वात् । अर्थमुखप्रेक्षितया चार्थालंकारत्वेऽनुप्रासादीनामपि रसादिपरत्वेनार्थमुखप्रेक्षितयार्थालंकारत्वप्रसङ्गः । शब्दस्याभिन्नप्रयत्नोच्चार्यत्वेनार्थालंकारत्वे 'प्रतिकूलतामुपगते हि विधौ' इत्यादौ शब्दभेदेऽप्यर्थालंकारत्वं तवापि प्रसज्यतइत्युभयत्रापि शब्दालंकारत्वमेव । यत्र तु शब्दपरिवर्तनेऽपि न श्लेषत्वखण्डना, तत्र—

दिति । यथा लोके मौल्यादिगतं मुकुटादि मस्तकाद्यलंकारत्वेन व्यपदिश्यते तथा काव्येऽपीत्यर्थः ॥ दूषयति—तदन्ये इति । शब्दाभेदादर्थश्लेष इति यदुक्तं तद्दूषयति–न चेति । दर्शनस्य प्रामाण्यानभ्युपगमे त्वाह–किं चेति । कविप्रतिभया कवीनामनुभवेन उट्टङ्कनाद् विषयीकरणात् । शब्दस्यान्वयानुविधायित्वं प्रदर्श्य व्यतिरेकानुविधायित्वं दर्शयति—विसदृशेति । बन्धे चेति चकारस्य वैचित्र्याभावश्चेत्यन्वयः । ननु वैचित्र्यस्य शब्दान्वयव्यतिरेकानुविधायित्वेन किमायातमत आह—वैचित्र्यस्यैवेति । अलंकारत्वादलंकारनियामकत्वात् । अर्थमुखप्रेक्षितया अर्थानुसन्धानसापेक्षत्वेन अर्थालंकारत्वे अर्थालंकारत्वाङ्गीकारे । रसादिपरत्वेन रसाद्युत्कर्षाभिप्रायप्रयोज्यत्वेन । शब्दभेदेऽपीति । 'विधौ' इत्यादौ स्वरभेदाभावेन एकप्रयत्नेनैव शब्दद्वयोच्चारणादर्थद्वयप्रतीतिरिति भावः । उभयत्र

पुराणवार्ता इति तु युक्तम् ॥ तथा च शिवमहिम्नः स्तवे—'रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो रथाङ्गे चन्द्रार्कौ रथचरणपाणिः शर इति' ॥

1. शब्दार्थेति । पर्यायान्तरपरिवृत्तिसहत्वासहत्वाभ्यां शब्दार्थगतव्यवस्थितिरिति भावः ॥

2. दर्शनादिति । 'यावन्त एवार्थाः स्युः शब्दास्तावन्त एव हि ।' इत्याद्युन्मिमूकादित्यर्थः ॥

3. शब्दभेद इति । विधिविधुशब्दयोः पार्थक्येऽपीत्यर्थः ॥

4. श्लेषत्वेति । श्लेषत्वखण्डना श्लेषभङ्गः ॥

---

१. 'अर्थे' इति नास्ति कस्यचित्पुस्तके । २. 'लोके' इति कुत्रचित्पुस्तके नास्ति. ३. 'अर्थालंकारत्वे' इति पुस्तकान्तरे नास्ति.

लम्–' इत्यादौ च नोपमाप्रतिभोत्पत्तिहेतुः श्लेषः । पूर्णोपमाया निर्विषयत्वापत्तेः । 'कमलमिव मुखं मनोज्ञमेतत्' इत्याद्यस्ति पूर्णोपमाया विषय इति चेत् । न । यदि 'सकल–' इत्यादौ शब्दश्लेषतया नोपमा तत्किमपराद्धं 'मनोज्ञम्' इत्यादावर्थश्लेषेण ।

'स्फुटमर्थालंकारावेतावुपमासमुच्चयौ, किं तु ।
आश्रित्य शब्दमात्रं सामान्यमिहापि संभवतः ॥'

इति रुद्रटोक्तदिशा गुणक्रियासाम्यवच्छब्दसाम्यस्याप्युपमाप्रयोजकत्वात् । ननु गुणक्रियासाम्यस्यैवोपमाप्रयोजकता युक्ता, तत्र साधर्म्यस्य वास्तवत्वात् । शब्दसाम्यस्य तु न तथा, तत्र साधर्म्यस्यावास्तवत्वात् । ततश्च पूर्णोपमाया अन्यथानुपपत्त्या, गुणक्रियासाम्यस्यैवार्थश्लेषविषयत-

मित्यादौ चेति । श्लेषो नोपमाबाधक इति भावः । तत् तदा । शब्दमात्रं सामान्यमाश्रित्यापीहालंकारमध्ये संभवत इत्यन्वयः । यद्यपि 'सकलकलम्–' इत्यादावेकप्रयत्नेन शब्दद्वयोत्पत्त्या शब्दस्याप्येकत्वं न संभवति, तथाप्येकानुपूर्व्यवच्छिन्नत्वेन शब्दयोरेकत्वप्रतिभास इति भावः । समुच्चयालंकारे एकधर्माभिसंबन्धस्य निवेशाभावात्तत्समुच्चयपदमत्र तुल्ययोगितापरं दीपकपरं च तयोस्तत्संभवात् । नन्वेवं 'किं च तुल्ययोगितायाम्–' इत्यादिना श्लेषतुल्ययोगितयोर्यो विषयविभागः कृतः स न संगच्छते 'येन ध्वस्त–' इत्यादावपि शब्दरूपैकधर्मसंबन्धस्य सत्त्वेन तुल्ययोगिताया विषयत्वसंभवादिति चेत् । सत्यम् । यत्रानेकस्यैकधर्मसंबन्धावगमे द्विवचनबहुवचनचकाराद्यपेक्षा तत्रैव दीपकतुल्ययोगितयोर्विषयः । 'येन ध्वस्त–' इत्यादौ तु द्विवचनाद्यपेक्षाविरहेण तुल्ययोगिताया विषय एव नास्ति । एवं ययोरेकधर्मसंबन्धस्तयोरनेकप्रयत्नोच्चार्यपदवाच्यत्वं दीपकतुल्ययोगितालक्षणे निवेशनीयमतो नातिप्रसङ्गः । एवं च 'स्वेच्छोपजातविषयोऽपि–' इत्यादिर्दीपकस्य 'किरणा हरिणाङ्कस्य–' इत्यादि, 'विकसन्नेत्रनीलाब्जे–' इत्यादि च तुल्ययोगितायाश्च विषय इति ध्येयम् । गुणक्रियासाम्यवद्गुणक्रियासाम्यस्येव । तत्र गुणक्रियासाम्यप्रयुक्तोपमायाम् । वास्तवत्वाद् वस्तुसमवेतत्वात् । न तथा नोपमाप्रयोजकता । तत्र शब्दसाम्यप्रयुक्तोपमायाम् । साधर्म्यस्य शब्दरूपसामान्यस्य धर्मस्य । अवास्तवत्वाद् उपमानोपमेयरूपवस्तुनोरसमवेत-

1. कमलेति । 'कमलमिव मुखं मनोज्ञमेतत्कचतितराम्' इत्यत्र मनोज्ञत्वलक्षणस्य गुणस्य, प्रकाशलक्षणायाः क्रियायाः, गुणक्रिययोर्वा साम्यात्पूर्णोपमाविषयोऽस्तीत्यर्थः ॥

2. मनोज्ञमिति । मनोज्ञत्वस्योपमानोपमेयभूतयोः कमलमुखयोर्भेदेन श्लिष्टत्वादर्थश्लेष इत्यर्थः ॥

१. 'रुद्रटोक्त' क. २. 'च' इति नास्ति ख-पुस्तके ३ 'सङ्गच्छते' ख. ४. 'विषयता' ग. ५. 'यत्र यदि नैकधर्मसंबन्धस्तत्र [illegible] द्विवचनचकाराद्यपेक्षा' इति [illegible]पुस्तके. ६. 'एवं च पूर्वोक्तनिरूपणे च सतीत्यर्थः' इति [illegible]पुस्तके पाठः. ७. 'अत्र' इति [illegible]पुस्तके.

'प्रकृतिप्रत्ययौ स्वस्वार्थबोधकौ' इति च मतद्वयेऽपि वत्यादिक्यङाद्यो साम्यमेवेति। यच्च केचिदाहुः—'वत्यादय इवाद्यर्थेऽनुशिष्यन्ते, क्यङा दयस्त्वाचाराद्यर्थे' इति। तदपि न। न खलु क्यङादय आचारमात्रार्थाः अपि तु सादृश्याचारार्था इति। तदेवं धर्मलोपे दशप्रकारा लुप्ता।

उपमानानुपादाने द्विधा वाक्यसमासयोः।

उदाहरणम्—

'तस्या मुखेन सदृशं रम्यं नास्ते न वा नयनतुल्यम्।'

दितं प्रकृतिप्रत्ययसमुदाय, **वाचकं** प्रकृत्यर्थविशिष्टप्रत्ययार्थप्रतिपादकम्। **स्वस्वार्थबोधकौ** क्रमेण स्वार्थप्रतिपादकौ। **वत्यादीति**। आदिपदेन कल्पाि परिग्रह। **साम्यमेवेति**। सादृश्यवाचकत्वेन साम्यमित्यर्थः। **आचाराद्य इति**। 'अनुशिष्यन्ते' इत्यन्वय.। **अपि त्विति**। किन्त्वित्यर्थ.। 'अपि ता इति पाठे किं तर्हीत्यर्थं। उपसंहरति—**तदेवमिति**। वस्तुतस्तु 'चन्द्राय शुक्लरुचापि हंस' इत्यादौ साधारणधर्मोपादानेऽपि क्यङादियोगे उपमादर्शन दार्थ्या उपमायास्तद्धितादित्रितयगतत्ववत् क्यजादिपञ्चकगतत्वेन विशेषो बोध्य एवं चाष्टप्रकाराया आर्थ्या धर्मलोपालोपाभ्यां षोडशप्रकारत्वं बोध्यम्। क्यजादि पञ्चके धर्मलोपे उदाहरण यथा—'वीर. प्रीतिकरत्वेन पर्यङ्कीयति मञ्चके। मित्री यति परं प्रेम्णा भक्त्या देवायते नृणाम्॥ देवदर्शं जनै साधु प्रतीक्ष्यते दृश्यते। कृपया विष्णुसचार नित्यं सचरति क्षितौ॥' अत्र तृतीयान्तपदार्थानां क्यजाद्यर्थे सादृश्येऽभेदेनान्वय॥ उपमानलुप्तामुपमामाह—**उपमानेति**। 'लुप्तो पमा' इत्यनुपङ्ग॥ **न वेति**। न वा नयनतुल्यरम्यमास्त इत्यन्वयः। अन्यथ

त्वनिष्टमेव। अन्यथा उपास्यते हरः, अनुभूयते सुखम्, इत्यादौ धात्वर्थानभवनकि ययोरकर्मकत्वेन कर्मलकारोपपत्तिर्न स्यात्। इवादीनां तु वाचकत्वमेव। उपमेयोपमानता यामिवेवादिवाचकताया प्रतिबन्धकराहित्येन दृष्टान्तवैषम्यस्य सद्भावाद् विशेषणविशेष्ययो रेकविभक्तिरत्वे 'विशेष्येण सहैकार्थं मनेयत्र विशेषणम्। तत्र लिङ्गादयः प्रायो विशे ष्यस्या विशेषणे॥' इत्यनुशासनस्येवोपमानोपमेययोरपि तत्र 'लिङ्गसंख्याविभेदेऽपि उप मानोपमेयता। विभक्ति पुनरेकैव उपमानोपमेययो.॥' इत्यनुशासनस्य जागरूकत्वेन 'शरैरुस्रैः—' इत्यादावुपमानपदोत्तरतृतीयादेः सूपपादकत्वाच्च। प्रायोग्रहणेन 'श्रूयन्ते मदमलिनगण्डाः करटिनः करिण्यः कारुण्यास्पदम्—' इत्यादौ विशेष्यविशेषणयो- र्लिङ्गादिभेदेऽपि न काचिदनुपपत्तिरित्यन्यत्र विस्तरः॥

1. क्यङादय इति। अयमभिप्रायः—'कर्तुं क्यङ् सलोपश्च' इत्यत्र 'उपमानादाचारे' इत्यत उपमानपदमनुवर्तते, तेनेवार्थमादृत्यापि बोधे सादृश्याचारार्थः करोति।

---

1. 'स्वार्थबोधकौ' क. 2. 'षोडशप्रकारा बोध्या' इति मुद्रितपुस्तके.

अत्र मुखनयनप्रतिनिधिवस्त्वन्तरयोर्गम्यमानत्वादुपमानलोपः । अत्रैव च 'मुखेन सदृशं' इत्यत्र 'मुखं यथेदं', 'नयनतुल्यं' इत्यत्र 'दृगिव' इति पाठे श्रौत्यपि संभवतीति । अनयोर्भेदयोः प्रत्येकं श्रौत्यार्थीत्वभेदेन चतुर्विधत्वसंभवेऽपि प्राचीनानां रीत्या द्विप्रकारत्वमेवोक्तम् ।

औपम्यवाचिनो लोपे समासे क्विपि च द्विधा ॥ २० ॥

क्रमेणोदाहरणम्—

'वदनं मृगशावाक्ष्याः सुधाकरमनोहरम् ।'

'गर्दभति श्रुतिपरुषं व्यक्तं निनदन्महात्मनां पुरतः ।'

अत्र 'गर्दभति' इत्यत्रौपम्यवाचिनः क्विपो लोपः । न चेहोपमेयस्यापि लोपः । 'निनदन्' इत्यनेनैव निर्देशात् ।

द्विधा समासे वाक्ये च लोपे धर्मोपमानयोः ।

'तस्या मुखेन' इत्यादौ 'रम्यं' इति स्थाने 'लोके' इति पाठेऽनयोरुदाहरणम् ।

क्विप्समासगता द्वेधा धर्मेवादिविलोपने ॥ २१ ॥

धर्मोपमानलोपोदाहरणमिदं स्यात् । **प्रतिनिधीति** । [illegible] ॥ [illegible]माह—**औपम्येति** । [illegible] ॥ **वदनमिति** । [illegible] । [illegible] । [illegible] । [illegible] ॥ [illegible]—**गर्दभतीति** । [illegible] । [illegible] । **निर्देशादिति** । [illegible] ॥ [illegible]

---

1. सुधाकरेति । [illegible]

2. गर्दभतीति । [illegible]

यथा—

'चन्द्रायते शुक्लरुचापि हंसो हंसायते चारुगतेन कान्ता ।
कान्तायते स्पर्शसुखेन वारि वारीयते स्वच्छतया विहायः ॥'

मालोपमा यदेकस्योपमानं बहु दृश्यते ।

यथा—

'वारिजेनेव सरसी शशिनेव निशीथिनी ।
यौवनेनेव वनिता नयेन श्रीर्मनोहरा ॥'

क्वचिदुपमानोपमेययोर्द्वयोरपि प्रकृतत्वं दृश्यते—

'हंसश्चन्द्र इवाभाति जलं व्योमतलं यथा ।
विमलाः कुमुदानीव तारकाः शरदागमे ॥'

'अस्य राज्ञो गृहे भान्ति भूपानां ता विभूतयः ।
पुरंदरस्य भवने कल्पवृक्षभवा इव ॥'

तस्योपमानता यदि स्यादित्यर्थः । इयं साधारणधर्मस्याभेदे भेदे च संभवतीति द्विधा ॥ तत्राद्या यथा—'महाश्रुतो वदान्यस्य भारतीवामला मतिः । चेष्टा मतिरिव स्वच्छा चेष्टेव गुणसंततिः ॥' अत्र स्वच्छत्वमेकमेव साधारणो धर्मः ॥ द्वितीयामाह—**चन्द्रायत इति** । चन्द्र इवाचरतीत्यर्थः ॥ मालोपमामाह—**मालोपमेति** । बहित्येकाधिकपरम् । तेन 'तां हंसमालाः शरदीव गङ्गां महौषधिं नक्तमिवात्मभासः । स्थिरोपदेशामुपदेशकाले प्रपेदिरे प्राक्तनजन्मविद्याः ॥' इत्यादावुपमाद्वयेऽपि मालात्वमक्षतम् । इयमपि पूर्ववद्द्विधा । तत्राद्यामाह—**वारिजेनेति** । अत्र मनोहरत्वमेकमेव सादृश्यहेतुः । द्वितीया यथा—'ज्योत्स्नेव नयनानन्दः सुधेव मदकारणम् । प्रभुतेव समाकृष्टसर्वलोका नितम्बिनी ॥' अत्र नेत्रानन्दजननादयो विभिन्नधर्मा एव सादृश्याना हेतवः ॥ उपमेयस्य प्रकृतत्वमुपमानस्याप्रकृतत्वं प्रायिकमित्यभिप्रायेणाह—**क्वचिदिति** । प्रकृतत्वं वर्णनीयस्योत्कर्षाधायकत्वेनाकाङ्क्षितत्वम् ॥ **हंस इति** । हंसादय इव चन्द्रादयोऽपि वर्णनीयशरत्कालस्योत्कर्षाधायकत्वेनाकाङ्क्षिताः । 'विमलाः' इति पाठो न रमणीयः, मन[्]ञतय कुमुदानीत्युपमानान्वयायोग्यत्वात् । तस्मात् 'लसन्ति' इति पाठो द्रष्टव्यः ॥ प्राचीनसमतानाक्षेपोपमादीनुपमाप्रकारान्वैचित्र्यातिशयानाधायकत्वेनोपेक्षमाण आह—**अस्य राज्ञ इति** । कल्पवृक्षभवाः कल्पवृक्षोत्पन्ना विभूतय इत्यर्थः ॥

---

1. **मालेति** । यथा काचिन्माला सजातीयैः कुसुमैः काचिच्च विजातीयैर्निर्मीयते तथैवेयमपि सजातीयैर्विजातीयैर्वा बहुभिरुपमानैरिति भावः । एकस्य उपमेयस्येत्यर्थः ॥

---

१. 'यथा' पुस्तकान्तरे नास्ति. २. 'वस्तुनस्तु प्रकृतयोरेकधर्माभिसंबन्धरूपतुल्ययोगितेयं न तूपमा । एव चात्र यथेवशब्दप्रयोगस्तुल्ययोगिताद्योतकत्वार्थत्वेन न गौणं पद्येत्यवधेयम् ।' इति मुद्रितपुस्तकेऽधिकम्.

तत्रैकदेशविवर्ति श्लिष्टं यथा मम—

(करमुदयमहीधरस्तनाग्रे गलिततमःपटलांशुके निवेश्य ।
विकसितकुमुदेक्षणं विचुम्बत्ययममरेशदिशो मुखं सुधांशुः ॥)

समस्तवस्तुविषयं यथा—अत्रैव 'विचुम्बति–' इत्यादौ 'चुचुम्ब हरिदबलामुखमिन्दुनायकेन' इति पाठे । न चात्र श्लिष्टपरम्परितम् । तत्र हि[1] 'भूभृदावलिदम्भोलिः–'(५२३) इत्यादौ राजादौ पर्वतत्वाद्यारोपं विना वर्णनीयस्य राजादेर्दम्भोलितादिरूपाणां सर्वथैव सादृश्याभावा[3]दसंगतम् । तर्हि कथं 'पद्मोदयदिनाधीशः–' इत्यादौ परंपरितम्, राजादेः सूर्यादिना सादृश्यस्य तेजस्वितादिहेतुकस्य संभवात्–इति न वाच्यम् । तथा हि—राजादेस्तेजस्वितादिहेतुकं सुव्यक्तं सादृश्यं न न प्रकृते विवक्षितम् । पद्मोदयादेरेव द्वयोः साधारणधर्मतया विवक्षितत्वात् । इह तु महीधरादेः स्तनादिना सादृश्यं पीनोत्तुङ्गत्वादिना सु[व्यक्तमे]व–इति न श्लिष्टपरम्परितम् । क्वचित्समासाभावेऽपि रूपकं दृश्यते—

'मुखं तव कुरङ्गाक्षि सरोजमिति नान्यथा ॥'

क्वचिद्वैयधिकरण्येऽपि यथा—

'सौजन्याम्बुमरुस्थली सुचरितालेख्यद्युभित्तिर्गुण-
ज्योत्स्नाकृष्णचतुर्दशी सरलतायोगश्वपुच्छच्छटा ।
यैरेषापि दुराशया कलियुगे राजावली सेविता
तेषां शूलिनि भक्तिमात्रसुलभे सेवा कियत्कौशलम् ॥'

सितच्छत्रत्वारोपे निमित्तम् ॥ **करमिति** । कर किरणमेव हस्तम् ॥ **पद्मोदयादेरेव** पद्मोदयादिशब्दस्यैव । **द्वयो** रूप्यरूपकयो राजादिसूर्याद्यो ॥ नन्वत्र शब्दसाम्यविवक्षावशात्प्रसिद्धतेजस्वितादिरूपसाम्यविवक्षायास्तु 'त्रैलोक्यमण्डपस्तम्भा' इत्यादौ तु दीर्घत्वपीवरत्वादिसाम्यसंभवेनात्र तन्मूलक एव स्तम्भत्वाद्यारोपोऽस्तु त्रैलोक्यादौ मण्डपत्वाद्यारोपस्य तत्कारणत्वस्वीकारेण किमिति चेत् । न । स्तम्भा यथा मण्डपभारसहिष्णवस्तथा हरिबाहवस्त्रैलोक्यभारसहिष्णव इति साम्यस्यैव प्रकृते विवक्षितत्वात् । तच्च त्रैलोक्यादौ मण्डपत्वाद्यारोपं विना दुर्बोधम् । **समासाभावेऽपीति** । अत एव दण्डिना व्यस्तं समस्तं व्यस्तसमस्तं चेति त्रिविधं रूपकमुक्तम् । 'भ्रूलतया' इत्यभेदे तृतीया । अन्यथा तादात्म्यारोपो न स्यात् ॥ सुचरितमे-

---

१. 'हि' इति क-पुस्तके नास्ति. २. '–रूपम' ख-घ. ३. 'असंभवात्' ख घ. ४. 'शनिनि' क

इदं मम । अत्र केषांचिद्रूपकाणां शब्दश्लेषमूलत्वेऽपि रूपकविशेषत्वादर्थालंकारमध्ये गणनम् । एवं वक्ष्यमाणालंकारेषु बोध्यम् ।

अधिकारूढवैशिष्ट्यं रूपकं यत्तदेव तत् ।

तदेवाधिकारूढवैशिष्ट्यसंज्ञकम् । यथा मम—

'इदं वक्त्रं साक्षाद्विरहितकलङ्कः शशधरः
सुधाधाराधारश्चिरपरिणतं बिम्बमधरः ।
इमे नेत्रे रात्रिंदिवमधिकशोभे कुवलये
तनुर्लावण्यानां जलधिरवगाहे सुखतरः ॥'

अत्र कलङ्कराहित्यादिनाधिकं वैशिष्ट्यम् ।

विषयात्मतयारोप्ये प्रकृतार्थोपयोगिनि ॥ ३४ ॥

दार्ढ्यं चित्रम्, धुनिर्तिराकाशकुड्यम् । सरलता कौटिल्यराहित्यमेव दाक्षिण्यम् । तस्या योगे श्वपुच्छच्छटा कुक्कुरलाङ्गूलकुण्डली । भक्तिमात्रसुलभे केवलयापि भक्त्या प्राप्ये ॥ **अत्र केषांचिदिति** । साधनस्य श्लेषस्य शब्दालंकारत्वेऽपि साध्यत्वेन प्रधानस्यार्थालंकारमध्ये गणनमिति भावः । वक्ष्यमाणानां श्लेषापह्नवादीनाम् ॥ अधिकारूढवैशिष्ट्य रूपकमाह—**अधिकारूढेति** । अधिकमत्यर्थमारूढं वैशिष्ट्य विशेषणं यत्र तदित्यर्थः ॥ सुधाधाराधार इति बिम्बस्य विशेषणम् । कलङ्करहितत्वादिविशेषणं चन्द्रादेरत्यन्तासभवीति तत्र तदारोपणादधिकारूढवैशिष्ट्यम् । 'कलङ्कराहित्यादिना' इत्यभेदे तृतीया । परिणामालंकारमाह—**विषयात्मतयेति** ।

---

1. **वैशिष्ट्यमिति** । अत्रेदमप्यनुसंधेयम्—"विषय्यभेदताद्रूप्यरञ्जनं विषयस्य यत् । रूपकं तत्त्रिधाऽधिक्यन्यूनत्वानुभयोक्तिभिः" ॥ (१) अयं हि धूर्जटिः साक्षाद् येन दग्धाः पुरः क्षणात् । (२) अयमास्ते विना शम्भुस्तार्तीयीकं विलोचनम् ॥ (३) शम्भुर्विश्वमवत्यद्य स्वीकृत्य समदृष्टिताम् । (४) अस्या मुखेन्दुना लब्धे नेत्रानन्दे किमिन्दुना ॥ (५) साध्वीयमपरा लक्ष्मीरसुधासागरोदिता । (६) अयं कलङ्किनाङ्कस्थमुखचन्द्रोऽतिरिच्यते ॥" इति । इहोपमेयस्य राज्ञो विषयस्य पूर्वार्धस्थविशेषणेन लक्षितस्य साक्षाद् धूर्जटेर्विषयिणोऽभेदकथनात्, उपमानस्योपमेये न्यूनाधिक्यभावावर्णनाच्च प्रथममनुभयाभेदरूपकम् ॥ तार्तीयीकविलोचनराहित्योक्त्या न्यूनत्वप्रदर्शनेन द्वितीयं न्यूनाभेदरूपकम् । 'तीयादीकक् स्वार्थे वाच्यः' इति वार्तिकेन स्वार्थे ईकक् ॥ समदृष्टितास्वीकारेण विश्वावनोक्त्या साक्षात् शम्भ्वाधिक्यप्रतिपादनात्तृतीयमधिकाभेदरूपकम् । अत्र समदृष्टित्वं श्लिष्टम् ॥ एवमस्या मुखेन्दुरूपे अभिहितेऽस्मिन्नेत्रानन्दजनकत्वरूप मुखेन्दोश्च नेत्रानन्दजनकत्वरूपसाम्ये इन्दुनाऽर्थत्वनैरर्थक्यकथनेन न्यूनत्वाधिक्ययोरनुपादानादनुभयताद्रूप्यरूपकं चतुर्थम् ॥ साध्व्या अपरालक्ष्म्या-

---

१ 'इदं मम' इति क्वचित् पुस्तके नास्ति. २ 'अत्र च' ग. ३ 'संज्ञकम्' घ. ४ 'मम' इति क्वचिन्न पुस्तके.

दण्डापूपिकयान्यार्थागमोऽर्थापत्तिरिष्यते ।[1]

मूषिकेण दण्डो भक्षित इत्यनेन तत्सहचरितमपूपभक्षणमर्थादायातं भवतीति नियतसमानन्यायादर्थान्तरमापततीत्येष न्यायो दण्डापूपिका । अत्र च क्वचित्प्राकरणिकादर्थादप्राकरणिकस्यार्थस्यापतनं क्वचिदप्राकरणिकार्थात्प्राकरणिकार्थस्येति द्वौ भेदौ । क्रमेणोदाहरणम्—

'हारोऽयं हरिणाक्षीणां लुठति स्तनमण्डले ।
मुक्तानामप्यवस्थेयं के वयं स्मरकिङ्कराः ॥'

'विललाप स बाष्पगद्गदं सहजामप्यपहाय धीरताम् ।
अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिणाम् ॥'

अत्र च समानन्यायस्य श्लेषमूलत्वे वैचित्र्यविशेषो यथोदाहृते 'हारोऽयं—' इत्यादौ । न चेदमनुमानम् । समानन्यायस्य संबन्धरूपत्वाभावात् ।

विकल्पस्तुल्यबलयोर्विरोधश्चातुरीयु(य)तः ॥ ८३ ॥

अर्थापत्त्यलंकारमाह—**दण्डापूपिकयेति** । दण्डापूपन्यायेनेत्यर्थः । अन्यार्थागमो ऽन्यार्थप्रतीतिः ॥ दण्डापूपन्यायमाह—**मूषिकेणेति** । इतिशब्दो हेतौ । अनेन मूषिकेण तत्सहचरितं दण्डभक्षणसहचरितमर्थादौचित्यादायातमवगतं भवतीत्यनन्तरं 'तदन्यत्रापि' इति पूरणीयम् । **नियतेति** । नियतस्य बद्धत्वेन निश्चितस्य समानन्यायात्तुल्यसामर्थ्यादर्थान्न तु शब्दात् । आपतति प्रतीतिविषयो भवति । मूषिकस्य हि दण्डभक्षणं दुष्करं तन्निष्पत्तौ तत्सहचरितापूपभक्षणमतिसुकरत्वाद्यथा संभाव्यते तथात्रापि सहचारितकठिनदुष्करनिर्दिष्टविलासादिसंभाव्यत इति भावः ॥ **हारोऽयमिति** । मुक्तानां हारघटकरत्नविशेषाणां निवृत्तसंसाराणां ज्ञानां च । मुक्तानां तादृशोऽपि दशाविशेषे दुर्घटं तन्निष्पत्तावमुक्तानामस्माकं सुतरां सम्भवादिति पुंस्त्वमत्र समानो धर्मः । मुक्तानां वर्णनीयत्वेन प्राकरणिकत्वम् ॥ **विललापेति** । सोऽजः । द्रवत्वमत्र समानो धर्मः । अयसो वर्णनीयत्वाभावादप्राकरणिकत्वम् । **संबन्धरूपत्वाभावादिति** । व्याप्तिरूपत्वाभावादित्यर्थः । व्याप्तिर्हि साध्यसाधनयोरव्यभिचरितसामानाधिकरण्यरूपः । प्रकृते तु एकस्य मार्गान्तरेण [illegible] ज्ञात्वान्यस्य [illegible] धर्मान्तरग्रहो भवतीति [illegible] संबन्धादिति भावः ॥ विकल्पालंकारमाह—**विकल्प इति** । तुल्यबलत्वं तदुदाहरणे [illegible] बोध्यम् ।

---

1. दण्डेति । [illegible] दण्डापूपिका । [illegible] ॥

प्रभुर्धनपरायणः सततदुर्गतः सज्जनो
नृपाङ्गनगतः खलो मनसि सप्त शल्यानि मे ॥'

इह केचिदाहुः—'शशिप्रभृतीनां शोभनत्वं खलस्याशोभनत्वमपि सदसद्योगः' इति। अन्ये तु—'शशिप्रभृतीनां स्वतःशोभनत्वं धूसरत्वादीनां त्वशोभनत्वमिति सदसद्योगः।' अत्र हि शशिप्रभृतिषु धूसरादेरत्यन्तमनुचितत्वमिति विच्छित्तिविशेषस्यैव शोभनत्वे प्रक्रमादिति। इह च खलेकपोतवत्सर्वेषां कारणानां साहित्येनावतारः। समाध्यलकारे त्वेकं कार्यं प्रति साधके समग्रेऽप्यन्यस्य काकतालीयन्यायेनापतनमिति भेदः।

'अरुणे च तरुणि नयने तव मलिनं च प्रियस्य मुखम्।
मुखमानतं च सखि ते ज्वलितश्चास्यान्तरे स्मरज्वलनः॥'

अत्राद्येऽर्धे गुणयोर्यौगपद्यम्, द्वितीये क्रिययोः। उभयोर्यौगपद्ये यथा—

'कलुषं च तवाहितेष्वकस्मात्सितपङ्केरुहसोदरश्रि चक्षुः।
पतितं च महीपतीन्द्र तेषां वपुषि प्रस्फुटमापदां कटाक्षैः॥'

गतत्वपर्यन्तानां ग्रहणम्। खलस्य तु स्वतोऽशोभनत्वं नृपाङ्गनगतत्वस्य शोभनत्वमिति वैपरीत्येन सदसद्योगः। मनोदुःखं प्रति धूसरत्वादिविशिष्टाश्चन्द्रादयः कारणानि कारणीभूतानां विशेष्याणां विशेषणानां च यथासंभवं सतामसतां च योग एव सदसद्योग इति भावः। अन्येषां मतमुपपादयति—**अत्र हीति**। विच्छित्तिविशेषस्यैवेत्येवकारेण मनसीत्यादेर्व्यावृत्तिः। नन्वेतन्निरर्थकमत आह—मनसीति। तथा च वाक्यसमापकत्वेनैव तत्सार्थकमिति भावः। प्रथममतं दूषयति—नृपाङ्गनगत इति। विशेषस्यैवेत्येवकारेण विशिष्टव्यवच्छेदः। तथा चात्र विशेष्यविशेषणयोर्योग एव वैचित्र्यावहो न तु विशिष्टानां योगः। क्रमभेदरूपदोषावहत्वादिति भावः। समाध्यलंकारादस्य भेदमाह—**इहेति**। साहित्येन मिलितत्वेनावतारः। **समग्रे** समर्थे पर्याप्ते काकतालीयन्यायेन अप्रतिसंहितत्वेनापतनमुपस्थापनम्। यत्र कार्यविशेषं मिलितान्येव कारणानि जनयन्ति समुच्चयस्य विषयः। यत्र त्वेकस्मिन्कारणे फलसाधनायानुष्ठीयमाने दैवादुत्पन्नेन कारणान्तरेण तत्फलस्य सुकरत्वं स समाधिरिति भावः॥ गुणयौगपद्ये समुच्चयमाह—**अरुणे चेति**। नायिकां प्रति सख्या उक्तिरियम्। नयने स्त इति शेषः॥ **कलुषमिति**। रोषकषायितमित्यर्थः। सितपङ्केरुहस्य सोदरीसदृशी श्रीः शोभा यस्य तत्। अस्य वैयधिकरण्ये एव प्रयोगप्राचुर्यं विच्छित्तिविशेषजनकत्वं च। क्वचि-

---

१. 'धनपातं' इति क्वचित्पुस्तके पाठः।